नोपसंहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनि ॥ १४७॥

अन्यच्च,

बालो वा यदि वा वृद्धो युवा वा गृहमागतः ।
तस्य पूजा विधातव्या सर्वस्याभ्यागतो गुरुः ॥ १४८ ॥

अन्यच्च,

अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते ।
स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥ १४९ ॥

अन्यच्च,

उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः ।
पूजनीयो यथायोग्यं सर्वदेवमयोऽतिथिः ” ॥ १५० ॥

गृध्रोऽवदत् “मार्जारा हि मांसरुचयो भवन्ति, पक्षि-शावकाश्चात्र निवसन्ति, तेनैवं ब्रवीमि” । तत् श्रुत्वा

सत्त्वेषु प्राणिषु दयां कृपां कुर्वन्ति । हि यतः चन्द्रः विधुः चाण्डाल-वेश्मनि चण्डालगृहे ज्योत्स्नां कौमुदीं न उपसंहरते प्रत्याहरति ॥ १४७ ॥

बालो वेति । बालो वा शिशुर्वा, वृद्धो वा स्थविरो वा, युवा वा तरुणो वा, यदि गृहम् आवासम् आगतः, तदा तस्य पूजा सत्कारः विधातव्या कर्त्तव्या । यतो हि अभ्यागतः गृहे उपस्थितः सर्वस्य गृह-स्थस्य गुरुः सम्माननीयः ॥ १४८ ॥

अतिथिर्यस्येति । अतिथिरभ्यागतः भग्नाशः हताशः सन् यस्य गृहात् प्रतिनिवर्त्तते प्रतिनिवृत्य गच्छति, स अतिथिः तस्मै गृहस्थाय दुष्कृतं पूर्वसञ्चितं पापसमुदायं दत्त्वा पुण्यं गृहस्थेन सञ्चितं सुकृ-तसमूहम् आदाय गच्छति ॥ १४९ ॥

उत्तमस्यापीति । उत्तमस्यापि श्रेष्ठस्यापि वर्णस्य गृहम् आगतः नीचोऽपि नीचजातीयोऽपि यथायोग्यं पूजनीयः । यतो हि अतिथिः सर्वदेवमयः सर्वदेवात्मकः ॥ १५० ॥

गृध्र इति । मांसरुचयः मांसे रुचिर्येषां ते । पक्षिशावकाः पक्षि-

मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति "कृष्ण कृष्ण। ब्रूते च, "मया धर्मशास्त्रं श्रुत्वा वीतरागेण इदं दुष्करं चान्द्रायणव्रतमध्यवसितम्। यतः, परस्परं विवदमानानामपि धर्मशास्त्राणाम् अहिंसा परमो धर्म इत्यत्रैकमत्यम्॥ ५१॥

यतः,

> सर्वहिंसानिवृत्ता ये नराः सर्वसहाश्च ये।
> सर्वस्याश्रयभूता ये ते नराः स्वर्गगामिनः॥ ५२॥

अन्यच्च,

> एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः।
> शरीरेण समं नाशं सर्वमन्यत्तु गच्छति॥ ५३॥

किञ्च,

> योऽत्ति यस्य यदा मांसमुभयोः पश्यतान्तरम्।

विगतः रागः संसारासक्तिर्यस्य तेन। दुष्करं दुःखेन क्रियते अनुष्ठीयते यत् तत् दुष्करम्। अध्यवसितम्। आचरितम्। परस्परं विवदमानानाम् विरुद्धमतं व्यवस्थापयताम् इति भावः। ऐकमत्यम् एकवाक्यता धर्मशास्त्राणामित्यत्र समागमशास्त्राणामिति वैदेशिकः पाठः॥ ५१॥

सर्वहिंसेति। ये नराः सर्वाभ्यो हिंसाभ्यो निवृत्ताः, पराङ्मुखा ये च सर्वसहा जितक्रोधा इत्यर्थः। ये नराः सर्वस्य सर्वजातीयलोकस्य आश्रयभूताः शरण्याः, ते स्वर्गगामिनः सुरलोकस्याधिकारिणः॥ ५२॥

एक एवेति। एको धर्म एव सत्कर्मानुष्ठानजनितफलभेदः सुहृत् हितकारी। यो धर्मः निधनेऽपि देहत्यागानन्तरमपि अनुयाति सह गच्छति। अन्यत् सर्वं धनधान्यस्त्रीधनादिकं शरीरेण सम सार्द्धं नाशं ध्वंसं गच्छति प्राप्नोति॥ ५३॥

योऽत्तीति। यो यदा यस्य मांसम् अत्ति भक्षयति, तयोः उभयोः खाद्यखादकयोः अन्तरं विभेदं पश्यत, यूयमवलोकयत इत्यर्थः।

एकस्य क्षणिका प्रीतिरन्यः प्राणैर्वियुज्यते ॥ १५४ ॥

अपि च,

मर्त्तव्यमिति यद्दुःखं पुरुषस्योपजायते ।
शक्यस्तेनानुमानेन परोऽपि परिरक्षितुम् ॥ १५५ ॥

शृणु पुनः,

स्वच्छन्दं वनजातेन शाकेनापि प्रपूर्य्यते ।
अस्य दग्धोदरस्यार्थे कः कुर्य्यात् पातकं महत् ॥ १५६ ॥

एवं विश्वास्य स मार्जारः तरुकोटरे स्थितः । ततो दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति । अथ येषामपत्यानि खादितानि, तैः शोकार्त्तै-र्विलपद्भिरितस्ततो जिज्ञासा समारब्धा । तत् परिज्ञाय

एकस्य भक्षकस्य क्षणिका क्षणमात्रस्थायिनी प्रीतिः परितोषः, भवतीति शेषः । अन्यः भक्ष्यः प्राणैः वियुज्यते परित्यज्यते, प्राणिमात्रस्यापि भय-जनकं मरणमाप्नोतीति भावः । वियुज्यते इत्यत्र वियुध्यते इति च पाठः ॥ १५४ ॥

मर्त्तव्यमिति । मर्त्तव्यं मर्तव्यमिति शेषः । अद्य मे मरणं भविष्यतीति इत्थं चिन्तया पुरुषस्य यत् दारुणम् अनिर्वचनीयं दुःखम् उपजायते उत्पद्यते, तेन अनुमानेन ; यदीव मे अन्तर्भविष्यतीति ज्ञानेन लोकः दुःखमनुभूयते इत्यस्य दृष्टान्तेन परोऽपि अपरोऽपि परिरक्षितुं शक्यः ॥ १५५ ॥

स्वच्छन्दमिति । वनजातेन अरण्ये स्वयमुत्पन्नेन शाकेनापि स्वच्छ-न्दम् यथाकाममेव प्रपूर्यते, यदुदरं पूर्णं भवति इत्यर्थः । अस्य दग्धो-दरस्य एतदुदरस्य अर्थे पूरणनिमित्तं को जनः महत् पातकं दुस्तरं पापं कुर्य्यात् कर्तुमिच्छेत् । स्वच्छन्दवनजातेन इति क्वचित् पाठः ॥ १५६ ॥

एवं विश्वास्य विश्वासमुत्पाद्य । स मार्जारः विडालः । तरु-कोटरे तरोः वृक्षस्य कोटरे गर्त्ते स्थितः तस्थौ । दिनेषु गच्छत्सु

मार्जारः कोटरान्निःसृत्य बहिः पलायितः। पश्चात्
पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तत्कोटरे शावक
स्थीनि प्राप्तानि। अनन्तरञ्च तेनैव जरद्गवेनास्मा
शावकाः खादिताः, इति सर्वैः पक्षिभिर्निश्चित्य मिलि
गृध्रो व्यापादितः। अतोऽहं ब्रवीमि, "अज्ञातकुलशी
स्येत्यादि"। इत्याकर्ण्य स जम्बुकः सकोपमाह, "मृग
प्रथमदर्शनदिने भवानप्यज्ञातकुलशील एवासीत्,
कथं भवता सह एतस्य स्नेहानुवृत्तिरुत्तरोत्तरं वर्द्धते
॥ १५७ ॥

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥ १५८

अन्यच्च,

अयं निजः परो वेति गणना लघुचेतसाम्।

यातेषु। आक्रम्य गृहीत्वा। अपत्यानि शावकाः, खादितानि भ
तानि। शोकार्त्तैः शोकेन अपत्यवियोगदुःखेन आर्त्तैः कातरैः। वि
पक्षिभिः परिदेवमानैः इतस्ततः जिज्ञासा प्रश्नः समारब्धा उपक्रान्
निःसृत्य निर्गत्य पलायितः प्रस्थितवान्। निरूपयद्भिः अनुसंदधद्भि
निश्चित्य स्थिरीकृत्य। व्यापादितः मारितः। सकोपं कोपेन स
अज्ञातकुलशीलः,' अज्ञातम् अपरिचितं कुलं शीलञ्च यस्य स
स्नेहानुवृत्तिः स्नेहस्य अनुरागस्य अनुवृत्तिः अनुवर्त्तनम् उत्तरो
क्रमान्वयेनैव वर्द्धते वृद्धिमाप्नोति ॥ १५७ ॥

यत्रेति। यत्र स्थाने विद्वज्जनः पण्डितो नास्ति, तत्र अल्पधीः अ
अपरिणतज्ञानोऽपि अल्पविद्योऽपीत्यर्थः। श्लाघ्यः पाण्डित्येन प्रशस्
तथाहि, निरस्तपादपे निरस्ता हीना वृक्षा यत्र तस्मिन् वृक्षरहि
देशे एरण्डोऽपि विरलाल्पगुल्मोऽपि द्रुमायते वृहद्वृक्ष इवाचरति
प्रधानवृक्षत्वेन निर्दिश्यते इति भावः ॥ १५८ ॥

उदारचरितानान्तु वसुधैव कुटुम्बकम् ॥ १५९ ॥

यथायं च मृगो मम बन्धुस्तथा भवानपि"। मृगो-ऽब्रवीत्, किमनेनोत्तरोत्तरेण, सर्वैरेकत्र विश्रम्भालापैः सुखमनुभवद्भिः स्थीयताम् ॥ १६० ॥

यतः,

न कश्चित् कस्यचिन्मित्रं, न कश्चित् कस्यचिद्रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ॥ १६१ ॥

अयमिति। अयं निजः आत्मीयः, अयं परः अनात्मीयो वा, इति लघुचेतसाम् अनुदारहृदयानां गणना अवधारणम्। नीचाशया एव कमप्यात्मीयं कमप्यनात्मीयमवधारयन्ति, न तूदारचेतस इति भाव[illegible]। उदारचरितानां तु उदारम् औदार्ययुक्तं चरितं व्यवहारो येषां तादृशानां सर्वत्र समदर्शिनां महात्मनां तु वसुधैव कुटुम्बकम्। सर्वे एवात्मीया इत्यर्थः ॥ १५९ ॥

अयं मृगः हरिणः यथा मम बन्धुः मित्रं, तथा भवान् अपि बन्धुत्वं प्राप्त इति शेषः। मृगः हरिणः, अब्रवीत् अवदत्। अनेन उत्तरोत्तरेण किम्? [illegible] । [illegible] सर्वैः एकत्र एकस्मिन् स्थाने विश्रम्भालापैः [illegible] । [illegible] । अतएव सुखम् आनन्दम् अनुभवद्भिः । [illegible] । [illegible] स्थीयताम् इति भावे प्रयोगः ॥ १६० ॥

न कश्चिदिति। कश्चित् जनः कस्यचित् जनस्य मित्रं बन्धुः न, [illegible] । [illegible] । [illegible] कस्यचित् रिपुः शत्रुः । [illegible] । [illegible] व्यवहारेण [illegible] मित्राणि [illegible] रिपवः शत्रवः जायन्ते। [illegible] ॥ १६१ ॥

काकः पुनराह, एवमस्तु। अथ प्रातः सर्वे यथाभिम देशं गताः। एकदा निभृतं शृगालो ब्रूते। "सखे! मृग एतस्मिन्नेव वनैकदेशे शस्यपूर्णं क्षेत्रमस्ति। तदहं त्वां त नीत्वा दर्शयामि" तथाकृते सति मृगः प्रत्यहं तत्र ग शस्यं खादति। ततः कतिपयैरेवाहोभिः क्षेत्रपतिना दृष्ट्वा पाशो योजितः। अनन्तरं पुनरागतो मृगस्त चरन् पाशैर्बद्धोऽचिन्तयत्, "को मामितः कालपाशादि व्याधपाशात् त्रातुं मित्रादन्यः समर्थः।" अत्रान्तरे ज कस्तत्रागत्य उपस्थितोऽचिन्तयत्, "फलितस्तावदस्म

काकः पुनराह इति। आह ब्रूते। एवम् इत्थम् अस्तु भव जम्बुकेन सार्द्धं तव ममापि मित्रता सम्पद्यताम् इति भावः। अथ अ न्तरं प्रातः प्रभाते सर्वे शृगालमृगकाकाः यथाभिमतदेशम्, अभिम अभिलषितम् अनतिक्रम्य यथाभिमतम्। अव्ययीभावः। यथाभिमतं दे यथाभिमतदेशं, स्वस्वाभीष्टप्रदेशमित्यर्थः। गताः प्रस्थिताः। एक एकस्मिन् काले शृगालः जम्बुकः, निभृतं निर्ज्जने, ब्रूते कथयति सखे! मित्र! मृग! मृग्यते अन्विष्यते योऽसौ मृगया काले। ए स्मिन् एव वनैकदेशे वनस्य अरण्यस्य एकदेशे एकांशे शस्यपूर्णं यव गोधूमादिभिः पूर्णं पूरितं क्षेत्रं कृषिकार्य्योपयोगि-भूमिखण्डः, अ विद्यते। अहं त्वां तत्र नीत्वा प्रापय्य। तत् शस्यपूर्णं क्षेत्रं दर्शया त्वदीयनयनगोचरं करोमि। तथा कृते सति क्षेत्रे दर्शिते सति। भ क्षमो। प्रत्यहं प्रतिदिनम्। अव्ययीभावः। खादति भक्षयति अहोभिर्दिवसैः। क्षेत्रपतिना क्षेत्रस्वामिना। कर्त्ता। तं मृगं द अवलोक्य पाशाः बन्धनरज्जवः योजिताः स्थापिताः। आगतः उप स्थितः। चरन् शस्यानि भक्षयन् पाशैः रज्जुभिः बद्धः जड़ितः। इत अस्मात् कालपाशात् यमपाशात् इव व्याधपाशात् व्याधानुष्ठितबन्धना त्रातुं रक्षितुं मित्रात् सुहृदः अन्यः कः समर्थः क्षमतावान्। अत्र अन्तरे जम्बुकः शृगालः तत्र क्षेत्रमध्ये आगत्य समागत्य उप

पटप्रबन्धो मनोरथसिद्धिरपि बाहुल्यान्मे भविष्यति । तस्योत्कृत्यमानस्य मांसासृगनुलिप्तानि अस्थीनि मया-वश्यं प्राप्तव्यानि"। स च मृगस्तं दृष्ट्वोल्लासितो ब्रूते "सखे! छिन्धि तावन्मम बन्धनं, सत्वरं त्रायस्व माम् ॥ १६२ ॥

यतः,

आपत्सु मित्रं जानीयात्, युद्धे शूरमृणे शुचिम् ।
भार्यां क्षीणेषु वित्तेषु व्यसनेषु च बान्धवान् ॥१६३॥

अपरञ्च,

उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ १६४ ॥

स्थितः समीपवर्ती भूत्वा अचिन्तयत् चिन्तितवान् । अस्माकं कपट-प्रबन्धः छलप्रपञ्चः फलितः सफलो जातः । मे मम मनोरथसिद्धिरपि अभीष्टसिद्धिरपि बाहुल्यात् प्राचुर्येण भविष्यति । उत्कृत्यमानस्य छिद्य-मानस्य विदारितचर्मास्थिमांसस्य वा एतस्य मृगस्य मांसासृगनुलिप्तानि मांसैः असृग्भिः शोणितैः अनुलिप्तानि अभियुक्तानि अस्थीनि मया अवश्यं निश्चितं प्राप्तव्यानि लब्धव्यानि । स च मृगः तं शृगालं दृष्ट्वा विलोक्य उल्लासितः हर्षयुक्तः ब्रूते । सखे! मित्र! छिन्धि अपनय बन्धनं पाशम् । सत्वरं शीघ्रं मां त्रायस्व उद्धर ॥ १६२ ॥

आपत्सु इति । आपत्सु विपत्कालेषु मित्रं सुहृदं, युद्धे संग्रामसमये शूरम्, ऋणे ऋणावस्थायां शुचिं विशुद्धचरितं, वित्तेषु धनेषु क्षीणेषु अपचयं गतेषु भार्यां पत्नीं, व्यसनेषु पीडाद्यभिभवेषु बान्धवान् परिजना-दीन् जानीयात् परीक्षेत ॥ १६३ ॥

उत्सवे इति । उत्सवे दुर्भिक्षादौ... व्यसने पीडाभिभवादौ, दुर्भिक्षे अन्नाभावसमये, राष्ट्रविप्लवे राजपरिवर्त्तने राज्य-विद्रोहे वा, राजद्वारे अभियोगसमये, श्मशाने शवदेहस्य दहनसमये, यः तिष्ठति सहायो भवति सः बान्धवः बन्धुः ॥ १६४ ॥

अमुष्य पाशं मुहुर्मुहुर्विलोक्याचिन्तयत्, "दृढबन्धनबद्धोऽस्मि तावदयं मृगः।" उक्तं च, "अद्य स्नायुनिर्मिताः पाशाश्चैते भट्टारकवारे कथमेतान् दन्तैः स्पृशामि मित्र! यदि चित्ते नान्यथा मन्यसे, तदा प्रभाते यत्त्वया वक्तव्यं तत् कर्त्तव्यमिति"। अनन्तरं स काकः प्रदोषकाले मृगमनागतमवलोक्य इतस्ततोऽन्विष्यन् तथाविधं दृष्ट्वोवाच, सखे! किमेतत्? मृगेणोक्तम्, अवधीरितसुहृद्वाक्यस्य फलमेतत् ॥ १६५ ॥

तथा चोक्तम्,

> सुहृदां हितकामानां यः शृणोति न भाषितम्।
> विपत् सन्निहिता तस्य स नरः शत्रुनन्दनः" ॥ १६६ ॥

अमुष इति। मुहुर्मुहुः विलोक्य पुनःपुनर्निरीक्ष्य। दृढबन्धनबद्धः दृढं च तत् बन्धनं चेति दृढबन्धनं कठिनबन्धः, तेन बद्धः आबद्धः। स्नायुनिर्मिताः स्नायुः देहान्तर्वर्त्तिचर्म्मविशेषस्तद्भागेन निर्मिताः विरचिताः पाशाः रज्जवः। इमे इति शेषः। भट्टारकवारे रविवासरे। दन्तैः स्पृशामि। धर्म्मशास्त्रानुसारेण रविवारे मत्स्यमांसाद्याहारनिषेधात् इति भावः। यदि चित्ते मनसि अन्यथा विपरीतं न मन्यसे भावयसि चिन्तयसीति यावत्। तदा प्रभाते प्रत्यूषे यत् पाशच्छेदनमन्यत् वा त्वया वक्तव्यं कथनीयं, तत् कर्त्तव्यं पालनीयं ममेति शेषः। प्रदोषकाले सायंसमये, मृगम् अनागतम् अनुपस्थितम् अवलोक्य दृष्ट्वा इतस्ततः अन्विष्यन् अनुसन्दधत् तथाविधं तादृशावस्थं मृगमिति शेषः। दृष्ट्वा विलोक्य उवाच। अवधीरितसुहृद्वाक्यस्य अवधीरितम् अवज्ञातं यत् सुहृद्वाक्यं सुहृदो वचनं तस्य फलं परिणतिः एतत् ॥ १६५ ॥

सुहृदामिति। यो जनः हितकामानां, हितः कल्याणकरः कामः अभिलाषो येषां ते तेषाम्, उपकारपरहृदयानाम् इत्यर्थः। सुहृदां मित्राणां भाषितम् उपदेशवाक्यं न शृणोति न गृह्णाति, तस्य विपत्

...को ब्रूते, स वञ्चकः कास्ते? "भगेणोक्तं मम्मां- ...तिष्ठत्वत्रैव"। काको ब्रूते, मित्र! उक्तमेव मया ॥ १६७ ॥

अपराधो न मेऽस्तीति नैतद्विश्वासकारणम् ।
विद्यते हि नृशंसेभ्यो भयं गुणवतामपि ॥ १६८ ॥

परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम् ॥ १६९ ॥

दीपनिर्वाणगन्धञ्च सुहृद्वाक्यमरुन्धतीम् ।
न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति गतायुषः ॥ १७० ॥

[illegible] ॥ १६६ ॥

काक इति । वञ्चकः वञ्चयति प्रतारयति इति वञ्चक [illegible] ॥ १६७ ॥

अपराध इति । मे मम अपराधो नास्ति, इत्येतत् न विश्वासकारणं हेतुः । [illegible] ॥ १६८ ॥

परोक्ष इति । [illegible] ॥ १६९ ॥

दीपनिर्वाणेति । [illegible]

को दीर्घं निश्वस्य, "अरे वञ्चक ! किं त्वया पाप कृतम् ? यतः, ॥ १७१ ॥

संलापितानां मधुरैर्वचोभि-
र्मिथ्योपचारैश्च वशीकृतानाम्।
आशावतां श्रद्दधताञ्च लोके
किमर्थिनां वञ्चयितव्यमस्ति ? ॥ १७२ ॥

अन्यच्च,

उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम्।
तं जनमसत्यसन्धं भगवति ! वसुधे ! कथं वहसि ? ॥१७३॥

न पश्यन्ति न गच्छन्ति। अरुन्धतीं वशिष्ठपत्नीं सप्तर्षिमण्डलान्तर्गतां ध्रुवयुगलमेकं न पश्यन्ति। दर्शनशक्तिह्रासादिति भावः ॥१७०॥

तत इति। पापं पापमयं कर्म यस्य तेन पापकर्मणा कृतम् ॥ १७१ ॥

संलापितानामिति। लोके जगति मधुरैः मिष्टैः वचोभिः वाक्यरचनैरित्यर्थः। संलापितानां सम्भाषितानाम्। मिथ्योपचारैः कपटपरिचर्य्याभिः वशीकृतानां श्रद्दधतां विश्वासवताम्, आशावतां आशायुक्तानाम्, अर्थिनां प्रयोजनवतां वञ्चयितव्यं वञ्चनीयं किम् अस्ति ? ईदृशलोकानां वञ्चना न प्रयत्नसापेक्षा इति भावः ॥ १७२ ॥

उपकारिणीति। उपकारिणि उपकारपरायणे, विश्रब्धे विश्वस्ते, शुद्धमतौ निर्मलहृदये, साधौ यः पापम् अत्याहितं, समाचरति अनुतिष्ठति। हे भगवति ! । ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना इति विष्णुपुराणम्। ऐश्वर्यमष्टविधं यथा, अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ईशित्वं च वशित्वं च तथा कामावसायिता इति। अणिमा अणुत्वं यत् प्रस्तरमपि प्रविशति। लघिमा लघुत्वं, यथा सूर्य्यमरीचिमवलम्ब्य सूर्य्यलोकं गच्छति। प्राप्तिः अङ्गुल्यग्रेण सूर्य्यमपि स्पृशति

दुर्जनेन समं सख्यं प्रीतिञ्चापि न कारयेत् ।
उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ॥ १७४ ॥
अथवा स्थितिरियं दुर्जनानाम् ।

प्राक् पादयोः पतति खादति पृष्ठमांसं
कर्णे कलं किमपि रौति शनैर्विचित्रम् ।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः
सर्वं खलस्य चरितं मशकः करोति ॥ १७५ ॥

त्यादि विधानभिज्ञुषा विहितम् । वसुधे । वसूनि धनरत्नानि धीयन्ते धीयन्ते यस्मिन् इति वसुधा पृथिवी, तत् सम्बोधनम् । असत्य म् असत्या अन्यथा सन्धा प्रतिज्ञा यस्य तं मिथ्याप्रतिज्ञं तं जनं कथं हसि ? किमर्थं धारयसि ? ॥ १७३ ॥

दुर्जनेनेति । दुर्जनेन दुष्टजनेन पापात्मना इत्यर्थः । समं सह ख्यं मित्रतां, प्रीतिं प्रणयं चापि न कारयेत् नानुतिष्ठेत् । यतः, अङ्गारः णः तापयुक्तश्चेत् करं हस्तं दहति । उष्णे अङ्गारे गृहीते हस्तो दग्धो वतीत्यर्थः । शीतः शीतलश्चेत् करं कृष्णायते कृष्णं मलिनं करोति । अयमेव भावः प्रत्ययः । दुर्जनेन समं वैरं प्रणयञ्चापि न कारयेत् त्येवं पाठ एव युज्यते ॥ १७४ ॥

प्रागिति । प्राक् प्रथमं पादयोः पतति चरणयोः पतति । खलोऽपि प्रथमं चरणपतनमाचरते । पृष्ठमांसं पृष्ठस्य मांसम् । मांस शब्देनात्र तदभ्यन्तरं शोणितं लक्ष्यते, मशकस्तु मांसभक्षणे शक्तः । खादति पिबति । खलोऽपि पृष्ठमांसं खादति, अनुपस्थितस्यापि निन्दने न्यं वस्तु वर्जं वा अपहृत्य भुङ्क्ते इत्यर्थः । कर्णे श्रवणसमीपे शनैः कोकं यदा तदा किमपि विचित्रं रमणीयं कलं मधुरं रौति शब्दा- ते । खलोऽपि कर्णे विचित्रं मधुरं वक्ति । अनन्तरं छिद्रं देहस्थं छिद्रं निरूप्य सहसा शरीरस्थात् अशङ्कः शङ्कारहितः सन् विशति शोणितपानार्थं प्रविशति । खलोऽपि छिद्रं प्राप्य तेन प्रविश्य

र्ज्जनः प्रियवादी च नैतद्विश्वासकारणम्।
धु तिष्ठति जिह्वाग्रे हृदि हालाहलं विषम्"॥

थ प्रभाते स क्षेत्रपतिर्लगुडहस्तस्तत्प्रदेशमाग
नावलोकितः। तमालोक्य काकेनोक्तं, "सखे! त्व
त्मानं मृतवत् सन्दर्श्य वातेनोदरं पूरयित्वा पा
बध्य तिष्ठ, अहं तव चक्षुषी चञ्चा लिखा
हं शब्दं करोमि, तदा त्वमुत्थाय सत्वरं पल
"। मृगस्तथैव काकवचनेन स्थितः॥ १७७॥

ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो

र्त्सल्यं करोति। अतएव मशकः खलस्य दुर्जनस्य सर्वं
ति अनुतिष्ठति अनुवर्त्तते वा॥ १७५॥

दुर्ज्जन इति। दुर्ज्जनः खलः प्रियवादी, प्रियं प्रीतिः
ति यः स प्रियवादी। एतत् प्रियवादित्वं विश्वासकारणं विश्व
ययस्य कारणं हेतुर्न। यतः, जिह्वाग्रे जिह्वायाः रसनायाः
प्रभागे मधु, हृदि अन्तःकरणे हालाहलं कालकूटं विषं तिष्ठति
र्त्तते। खलानामिति शेषः॥ १७६॥

अथ प्राभाते इति। प्रभाते प्रातःकाले क्षेत्रपतिः क्षेत्रस्य शस्याय-
न-भूखण्डस्य पतिः स्वामी। लगुडहस्तः लगुडः यष्टिः हस्ते यस्य
ादृशः। तत्प्रदेशं तत् स्थानं गच्छन् व्रजन् सन् काकेन वायसेन,
अवलोकितः दृष्टः। तम् आलोक्य दृष्ट्वा काकेन उक्तं कथितम्। मृत-
त् मृताधमदृश्यं सन्दर्श्य दर्शयित्वा, वातेन निश्वासवायुना उदरं जठरं
पूरयित्वा। उदरं स्फीतं कृत्वा इति भावः। पादान् चरणान् सम्बो-
बध्य काष्ठवत् स्पन्दरहितान् कृत्वा तिष्ठ। अहं चञ्चा ओष्ठाधराभ्यां
लिखामि विलिखामि आकर्षामीत्यर्थः। शब्दं रवं करोमि करिष्यामि,
पलायिष्यसे अपयास्यसि। काकस्य वचनेन काकवचनेन स्थितः मृतवत्
प्रसौ इत्यर्थः॥ १७७॥

ततः इति। क्षेत्रपतिना क्षेत्रस्वामिना हर्षोत्फुल्ललोचनेन

ोकितः, 'भोः, स्वयं मृतोऽसि ? इत्युक्त्वा मृगं बन्धना-
दयित्वा पाशान् संवरीतुं सयत्नो बभूव । ततः किय-
न्तरिते क्षेत्रपतौ स मृगः काकस्य शब्दं श्रुत्वा ससं
समुत्थाय पलायितः । तमुद्दिश्य तेन क्षेत्रपतिना प्रको
क्षिप्तेन लगुडेन शृगालो व्यापादितः ॥ १७८ ॥

तथा चोक्तम्,

त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः ।
अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते ॥१७९॥

अतोऽहं ब्रवीमि, "भक्ष्यभक्षकयोः प्रीतिरित्यादि" ।
कः पुनराह,

... आनन्देन उत्फुल्ले विकसिते लोचने नयने यस्य तेन । तथाविध-
स्तस्य इत्यर्थः । काकोक्तिः इयं । भोः ! आश्चर्ये मृतोऽसि ?
[illegible]सि ? इति उक्त्वा कथयित्वा । बन्धनात् मोचयित्वा मृगस्य
[illegible] इत्यर्थः । पाशात् बन्धनरज्जुः संवरीतुम् एकत्र [illegible]
[illegible] कृतः यत्नः प्रयासो येन सः, सयत्नः इत्यर्थः । कियद्दूरे
किञ्चिद्दूरप्रदेशे अन्तरिते व्यवहिते सति । ससम्भ्रमं सत्वरम् । पला-
तः [illegible] । तं मृगम् उद्दिश्य लक्षीकृत्य क्षेत्रपतिना क्षेत्रपालेन
कोपात् क्रोधात् क्षिप्तेन परित्यक्तेन लगुडेन यष्ट्या करस्थेन शृगालः
[illegible] तत्रैव अन्तराले स्थितो [illegible] इत्यर्थः । व्यापादित
नाशितः ॥ १७८ ॥

त्रिभिरिति । त्रिभिः वर्षैः वत्सरैः, अथवा त्रिभिः मासैः अथवा
[illegible] इत्यर्थः । अथवा त्रिभिः पक्षैः [illegible] ।
अथवा त्रिभिः दिनैः । दिनत्रयाभ्यन्तरे वा पक्षत्रयाभ्यन्तरे वा मास-
त्रयाभ्यन्तरे वा वत्सरत्रयाभ्यन्तरे वा इति तात्पर्यम् । अत्युत्कटैः
[illegible] पापपुण्यैः पापैः पुण्यैर्वा कर्मभिरिति भावः । इह एव अस्मिन्
लोक एव फलं पापफलं पुण्यफलं वा अश्नुते भुङ्क्ते ॥ १७९ ॥

"भक्षितेनापि भवता नाहारो मम पुष्कलः ।
त्वयि जीवति जीवामि, चित्रग्रीव इवानघ ! ॥१८०॥

अन्यच्च,

तिरश्चामपि विश्वासो दृष्टः पुण्यैककर्म्मणाम् ।
सतां हि साधुशीलत्वात् स्वभावो न निवर्त्तते ॥१८१॥

साधोः प्रकोपितस्यापि मनो नायाति विक्रियाम् ।
न हि तापयितुं शक्यं सागराम्भस्तृणोल्कया ॥१८२॥

हिरण्यको ब्रूते "चपलस्त्वं, चपलेन सह मैत्री सर्वथा न कर्त्तव्या ॥ १८३ ॥

भक्षितेनेति । भक्षितेनापि भुक्तेनापि । मत्कर्त्तृकेणेति शेषः भवता करणेन मम आहारः भोजनं न पुष्कलः न पर्याप्तः । हे अनघ निष्पाप ! चित्रग्रीव इव त्वयि जीवति सति जीवामि प्राणान् धारयामि ॥ १८० ॥

तिरश्चामिति । पुण्यैककर्म्मणां पुण्यम् एकं कर्म्म येषां पुण्यशीलानामित्यर्थः । तिरश्चामपि पशुपक्षिप्रभृतीनामपि विश्वासः प्रत्ययो विश्वस्तता दृष्टः लक्षितः । हि तथाहि, सतां साधूनां साधुशीलत्वात् सत्स्वभावत्वात् स्वभावः प्रकृतिः न निवर्त्तते न अपगच्छति, तिर्य्यग्योनिसम्भवेऽपीति शेषः ॥ १८१ ॥

साधोरिति । प्रकोपितस्यापि क्रोधमापादितस्यापि साधोः मनः चित्तं विक्रियां विकारं न आयाति न प्राप्नोति । हि यतः तृणोल्कया तृणाग्निना सागराम्भः समुद्रसलिलं तापयितुम् उष्णतामापादयितुं न शक्यम् ॥ १८२ ॥

हिरण्यक इति । त्वं चपलः चापल्ययुक्तः चञ्चलः अव्यवस्थितचित्त इत्यर्थः । मैत्री मित्रता । सर्व्वथा सर्व्वतोभावेन न कर्त्तव्या विधेया ॥ १८३ ॥

तथा चोक्तम्,

मार्ज्जारो, महिषो, मेषः, काकः, कापुरुषस्तथा ।
विश्वासात् प्रभवन्त्येते विश्वासस्तत्र नोचितः ॥१८४॥

किञ्चान्यत्, शत्रुपक्षो भवानस्माकम् । उक्तञ्चैतत्,

शत्रुणा न हि सन्दध्यात्, सुश्लिष्टेनापि सन्धिना ।
सुतप्तमपि पानीयं शमयत्येव पावकम् ॥ १८५ ॥

दुर्ज्जनः परिहर्त्तव्यो, विद्ययालङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ? ॥१८६॥

यदशक्यं न तच्छक्यं यच्छक्यं शक्यमेव तत् ।
नोदके शकटं याति न नौका गच्छति स्थले ॥१८७॥

अपरञ्च,

महताप्यर्थसारेण यो विश्वसिति शत्रुषु ।

मार्ज्जार इति । मार्ज्जारः बिडालः । महिषः पशुविशेषः । मेषः, काकः वायसः, तथा कापुरुषः नीचाशयः । एते विश्वासात् प्रत्ययात् प्रभवन्ति प्रभुता भवन्ति, विश्वासघातका भवन्तीत्यर्थः । अतएव तत्र विश्वासः न उचितः कर्त्तव्यः ॥ १८४ ॥

शत्रुणा इति । शत्रुणा विपक्षेण सह सुश्लिष्टेनापि सुघटितेनापि सन्धिना योगेन हि निश्चये न सन्दध्यात् न मिलितो भवेत् । तथाहि पानीयं सलिलं सुतप्तमपि वह्निसंयोगेनात्युष्णमपि पावकं वह्निं शमयत्येव निर्वापयत्येव ॥ १८५ ॥

दुर्ज्जन इति । दुर्ज्जनः खलः विद्यया शास्त्राभ्यासजनितज्ञानेन अलङ्कृतः भूषितः सन् भवन्नपि परिहर्त्तव्यः परित्याज्यः । मणिना बहुमूल्यरत्नेन भूषितः अलङ्कृतः असौ सर्पः किं न भयङ्करः भयजनकः ? भवतीति शेषः ॥ १८६ ॥

यदशक्यमिति । यत् अशक्यम् असाध्यं तत् न शक्यं न शक्यसाध्यम् । यत् शक्यं साध्यं तत् शक्यमेव साध्यमेव । तथाहि उदके सलिले शकटं न याति चलति । स्थले भूमौ नौका न गच्छति ॥१८७॥

भार्य्यासु च विरक्तासु, तदन्तं तस्य जीवनम् ॥१८८॥

लघुपतनको ब्रूते, "श्रुतं मया सर्व्वं, तथापि ममै-
तावानेव सङ्कल्पः, यत्त्वया सह सौहृद्यमवश्यमेव मया क-
रणीयमिति ; नो चेदनाहारेणात्मानं तव द्वारि व्या-
पादयिष्यामि ॥ १८९ ॥

तथा हि,

मृद्घटवत् सुखभेद्यो दुःसन्धानश्च दुर्ज्जनो भवति।
सुजनस्तु कनकघटवत् दुर्भेद्यश्चाशु सन्धेयः ॥१९०॥

किञ्च,

द्रवत्वात् सर्वधातूनां निमित्तान्मृगपक्षिणाम् ।

भक्तेति। महता गुरुतरेण अर्थभारेण प्रयोजनानुसारे-
अर्थोऽभिधेयरैवस्तु प्रयोजननिवृत्तिषु इति मेदिनी। यो जनः श-
त्रुषु वैरिषु, विरक्तासु अनुरागशून्यासु भार्य्यासु च विश्वसिति वि-
करोति, तस्य जीवनं परमायुः तदन्तं सः अन्तः शेषसीमा यस्य
ततूपर्य्यन्तमेवेत्यर्थः ॥ १८८ ॥

लघुपतनक इति। मया सर्व्वं मय्यविश्वासकारणं श्रुतं ज्ञा-
तथापि अविश्वासकारणे सत्यपि। मम एतावान् एवंविधः सङ्कल्पः
मानसं, यत् त्वया सह सार्द्धं सौहृद्यं मित्रता अवश्यं निश्चयेन
णीयं विधातव्यं मयेति शेषः। नोचेत् ? अत्र भवताम् असम्मति
अनाहारेण आहाराभावेन आत्मानं तव द्वारि तव विवरमुखे व्या-
पादयिष्यामि घातयिष्यामि ॥ १८९ ॥

मृद्घटवदिति। मृदो मृत्तिकायाः घटः कलशः मृद्घटः,
दुर्ज्जनः दुष्टो लोकः सुखभेद्यः सुखेन अनायासेन भिद्यते वियो-
योऽसौ सुखभेद्यः। दुःसन्धानः दुःखेन क्लेशेन सन्धीयते संयु-
योऽसौ तथा च भवति। सुजनः साधुलोकस्तु कनकघटवत् सुवर्णक-
लसः दुर्भेद्यः दुःखेन कष्टेन भिद्यते विश्लेष्यते योऽसौ दुर्भेद्य
तथा भग्नेऽपि आशु शीघ्रं सन्धेयः संयोज्यो भवति ॥ १९० ॥

भयाल्लोभाच्च मूर्खाणां, सङ्गतं दर्शनात् सताम् ॥१८१॥

किञ्च,

नारिकेलसमाकारा दृश्यन्तेऽपि हि सज्जनाः ।
अन्ये बदरिकाकारा बहिरेव मनोहराः ॥१८२॥

अन्यच्च,

स्नेहच्छेदेऽपि साधूनां गुणा नायान्ति विक्रियाम् ।
भङ्गेऽपि हि मृणालानामनुबध्नन्ति तन्तवः ॥१८३॥

अन्यच्च,

शुचित्वं त्यागिता शौर्य्यं सामान्यं सुखदुःखयोः ।
दाक्षिण्यं चानुरक्तिश्च सत्यता च सुहृद्गुणाः ॥१८४॥

द्रवत्वादिति । सर्व्वधातूनां सर्व्वे धातवः सर्व्वधातवः सुवर्णरजत-ताम्रप्रभृतयः । तेषां द्रवत्वात् द्रवीभावात् । मृगपक्षिणां मृगाश्च हरिणादयश्च, पक्षिणः विहगाश्च ते मृगपक्षिणः, तेषां निमित्तात् कारणविशेषात् पूर्व्वजन्मसंस्कारादिरूपं । मूर्खाणां मूढानां भयात् लाभात् लोभात् जिघृक्षायाश्च । सतां साधूनां दर्शनात् साक्षात्कारेण सङ्गतं सौहार्द्दं भवति । सर्व्वधातूनामित्यत्र सर्व्वलौहानामिति पाठो-बहुषु पुस्तकेषु दृश्यते ॥ १८१ ॥

नारिकेलेति । सज्जनाः साधवः नारिकेलसमाकाराः नारिकेलस्य नराश्यफलस्य सम सदृश आकारो येषां ते । अन्तर्मधुराः इत्यर्थः । दृश्यन्ते बध्यन्ते । अन्ये असज्जनाः बदरिकाकाराः बदरिकाफलाना-मिव आकारा येषां ते । अतएव बहिरेव मनोहराः सुरम्याः । न तु अन्तर्मधुराः इत्यर्थः । दृश्यन्ते ॥ १८२ ॥

स्नेहेति । स्नेहच्छेदेऽपि प्रेमभावेऽपि साधूनां सतां गुणाः न वि-क्रियां विकारम् आयान्ति प्राप्नुवन्ति । हि तथाहि मृणालानां विसानां भङ्गेऽपि तन्तवः सूत्राणि अनुबध्नन्ति संयोगं जनयन्ति ॥ १८३ ॥

शुचित्वमिति । शुचित्वं विशुद्धाचरणम् । त्यागिता यज्ञादिविस-र्जनादिस्वाभाविकारः । शौर्य्यं शूरत्वम् । सुखदुःखयोः सामान्यं

एतैर्गुणैरुपेतो भवदन्यो मया कः सुहृत् प्राप्तव्
इत्यादि तद्वचनमाकर्ण्य हिरण्यको बहिर्निःसृ
"आप्यायितोऽहं भवतामनेन वचनामृतेन ॥१८५॥

तथा चोक्तम्।

घर्मार्त्तं न तथा सुशीतलजलैः स्नानं न मुक्ताव
न श्रीखण्डविलेपनं सुखयति प्रत्यङ्गमप्यर्पितम्
प्रीत्यै, सज्जनभाषितं प्रभवति प्रायो यथा चेतस
सद्युक्त्या च परिष्कृतं सुकृतिनामाकृष्टिमन्त्रोपमम्

अन्यच्च

रहस्यभेदो याच्ञा च नैष्ठुर्यं चलचित्तता।
क्रोधो निःसत्यता द्यूतमेतन्मित्रस्य दूषणम् ॥ १

समता। सुखे सुखी दुःखे दुःखी च भवतीत्यर्थः। दाक्षिण्यम्
ऋजुता। अनुरक्तिः अनुरागः। सत्यता सत्यनिष्ठा च। एते
गुणाः सुहृदो मित्रस्य गुणाः, ज्ञेया इति शेषः ॥ १८४ ॥

एतैरिति। एतैः पूर्व्वोल्लिखितैः गुणैः शुचित्वादिभिः
युक्तः। भवदन्यः भवतोऽन्यः भिन्नः कः सुहृत् मित्रं मया
लभ्यः। न कोऽपीत्यर्थः। बहिः निःसृत्य निर्गत्य आह। भव
अनेन कथितेन वचनामृतेन; वचनम् अमृतमिव तेन वाक्यामृतं
येन अहम् आप्यायितः परितोषितः ॥ १८५ ॥

घर्म्मार्त्तमिति। सद्युक्त्या परिष्कृतं निर्म्मलम् उत्तमं यु
मित्यर्थः। सुकृतिनां पुण्यवतां साधूनाम् आकर्षणमन्त्रसदृशं
भाषितं साधूनां वाक्यं यथा चेतसः चित्तस्य प्रीत्यै सन्तोषाय
समर्थं भवति प्रायस्तथा सुशीतलजलैः स्नानम् अभिषेकः न, मु
मुक्तामाला न, प्रत्यङ्गं सर्व्वाङ्गे अर्पितं दत्तं श्रीखण्डविलेपनं श्री
चन्दनस्य विलेपनं च न घर्म्मार्त्तं घर्म्मेण चौष्मेण आर्त्तं का
सुखयति सन्तर्पयति ॥ १८६ ॥

रहस्यभेद इति। रहस्यभेदः रहस्यस्य गुप्तवचनादिकस्य भेद

वचनक्रमेण तदेकदूषणमपि त्वयि न लक्ष्यते।

अन्यच्च

टुत्वं सत्यवादित्वं कथायोगेन बुध्यते।
स्तब्धत्वमचापल्यं प्रत्यक्षेणावगम्यते॥ १९८॥

अपरञ्च

ान्यथैव हि सौहार्दं भवेत् स्वच्छान्तरात्मनः।
वर्त्ततेऽन्यथा वाणी शाठ्योपहतचेतसः॥ १९९॥
मनस्यन्यद् वचस्यन्यत् कर्मण्यन्यद् दुरात्मनाम्।
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्॥ २००॥

तु भवतोऽभिमतमेव" इत्युक्त्वा हिरण्यको मैत्रं विधाय
तविशेषैर्वायसं सन्तोष्य विवरं प्रविष्टः। वायसोऽपि

। याच्ञा प्रार्थना। नैष्ठुर्यं निष्ठुरता, चलचित्तता चलं चञ्चलं
यस्य स चलचित्तः तस्य भावः चलचित्तता अस्थिरहृदयत्वम्।
दोषपरतन्त्रता। निःसत्यता असत्यव्यवहारः। द्यूतम् अक्षक्रीडा
। एतत् सर्वं मित्रस्य दूषणं दोषः॥ १९७॥
अनेनेति। अनेन वचनक्रमेण वाक्यानुसारेण तदेकदूषणमपि
रुक्षस्वभेदादीनां मध्ये एको दोषोऽपि त्वयि न लक्ष्यते दृश्यते।
पटुत्वमिति। पटुत्वं दक्षता, सत्यवादित्वं सत्यनिष्ठा, एतद्द्वयं कथा
। तव वाक्यप्रयोगेणेत्यर्थः। बुध्यते ज्ञायते। अस्तब्धत्वं आडम्बरशू-
, अचापल्यं चाञ्चल्यराहित्यं प्रत्यक्षेण इन्द्रियद्वारा दर्शनं।
गम्यते प्रत्यक्षीक्रियते॥ १९८॥
अन्यथेति। स्वच्छान्तरात्मनः स्वच्छः निर्मलः अन्तरात्मा यस्य ताद-
साधोः सौहार्दं मित्रता अन्यथैव अन्यप्रकारेणैव भवेत्। शाठ्योप-
चेतसः शाठ्येन शठतया उपहतम् आक्रान्तं चेतश्चित्तं यस्य तादृश
जनस्य वाणी वाक्यम् अन्यथा प्रवर्तते अन्यप्रकारा भवति॥ १९९॥
मनसीति। दुरात्मनां दुष्टचेतसां मनसि चित्ते अन्यत् अन्यविधं,

स्वस्थानं गतः । ततः प्रभृति तयोरन्योऽन्याहारप्रदा
कुशलप्रश्नैर्विश्रब्धालापैश्च कियान् कालोऽतिवर्त्तते ॥२

एकदा लघुपतनको हिरण्यकमाह, "सखे ! वायस
कष्टलभ्याहारमिदं स्थानं, तदेतत् परित्यज्य स्थाना
गन्तुमिच्छामि ।" ॥ २०२ ॥ हिरण्यको ब्रूते,

"स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः
इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत् ॥२
काको ब्रूते, मित्र ! कापुरुषस्य वचनमेतत् ।

यतः

स्थानमुत्सृज्य गच्छन्ति सिंहाः सत्पुरुषा गजाः

वचसि वाक्ये अन्यत्, कर्म्मणि कार्य्ये अन्यत् । महात्मनां महानुभा
मनसि एकं, वचसि एकं, कर्म्मणि चैकं, न तु रूपान्तरम् इत्यर्थः ॥२

तदिति । अभिमतम् अभिप्रेतं मैत्र्यं विधाय सौहृद्य
भोजनविशेषैः आहारविशेषैः वायसं काकं सन्तोष्य परितोष्य
गर्त्तं प्रविष्टः । अन्योन्याहारप्रदानेन आहारस्य प्रदानम् आहारप्रद
अन्योन्यमाहारप्रदानम् अन्योन्याहारप्रदानं तेन । कुशलप्रश्नैः
लस्य प्रश्नाः कुशलप्रश्नाः तैः श्रेयोजिज्ञासाभिरित्यर्थः । विश्रब्धाल
विश्रब्धानां विश्वासवाक्यानाम् आलापाः कथोपकथनानि तैः, व
समयः अतिवर्त्तते अपगच्छति ॥ २०१ ॥

एकदेति । इदं स्थानं वायसस्य काकस्य कष्टलभ्याहारं
क्लेशेन लभ्यः प्राप्यः आहारः खाद्यसामग्री यत्र तत् । तत् तस्मा
स्थानं परित्यज्य विहाय स्थानान्तरम् अन्यस्थानं गन्तुं प्रय
इच्छामि अभिलषामि ॥ २०२ ॥

स्थानभ्रष्टा इति । दन्ता दशनानि, केशाः शिरोरुहाः, न
अङ्गुलिरुहाः, नरा मनुष्याः, स्थानभ्रष्टाः स्थानात् स्वस्थानात्
प्रच्युताः सन्तः न शोभन्ते । मतिमान् ज्ञानवान् जनः इति वि
विविच्य स्वस्थानं निजस्थानं न परित्यजेत् ॥ २०३ ॥

तत्रैव निधनं यान्ति काकाः कापुरुषा मृगाः ॥२०४

अन्यच्च,

को वीरस्य मनस्विनः स्वविषयः को वा विदेशः स्मृतः,
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम् ।
यद्दंष्ट्रानखलाङ्गुलप्रहरणः सिंहो वनं गाहते
तस्मिन्नेव हतद्विपेन्द्ररुधिरैस्तृष्णां छिनत्त्यात्मनः ॥ २०५॥

हिरण्यको ब्रूते, मित्र ! क्व गन्तव्यम् ?

चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् ।
नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ॥"२०६॥

स्थानमिति । सिंहाः केशरिणः, सत्पुरुषाः साधवः, गजा हस्तिनः स्थानं स्वदेशम् उत्सृज्य गच्छन्ति देशान्तरं यान्ति । काका वायसाः कापुरुषाः कुत्सितपुरुषाः मृगा हरिणादयः, चकार ऊह्यः । तत्रैव यत्र जातास्तत्रैव निधनं मृत्युं यान्ति प्राप्नुवन्ति ॥ २०४ ॥

को वीरस्येति । वीरस्य शूरस्य मनस्विनः तेजस्विनो जनस्य कः स्वविषयः स्वदेशः को वा विदेशः देशान्तरं स्मृतः । तथाहि तादृश पुरुषः यं देशं श्रयते यत्र वसतीत्यर्थः । तं देशमेव बाहुप्रतापार्ज्जितं बाह्वोः प्रतापेन प्रभावेण अर्ज्जितं स्वायत्तं कुरुते सम्पादयति । दंष्ट्रानखलाङ्गुलप्रहरणः दंष्ट्रा दन्ताः, नखाः अङ्गुलीरुहाः, लाङ्गुलं पुच्छं, तेषां समाहारः, दंष्ट्रानखलाङ्गुलं, तत् प्रहरणं यस्य तादृश सिंहः केशरी यत् वनम् अरण्यं गाहते प्रविशति तस्मिन् वन एव हतद्विपेन्द्ररुधिरैः हतानां घातितानां द्विपेन्द्राणां गजराजानां रुधिरैः रक्तैः आत्मनस्तृष्णां पिपासां छिनत्ति निवारयति ॥ २०५ ॥

चलतीति । बुद्धिमान् जनः एकेन पादेन चरणेन चलति गच्छति अपरस्थानं इति शेषः । एकेन चरणेन तिष्ठति पूर्वस्मिन् स्थाने इति शेषः । तथाहि परं स्थानं गन्तव्यमपरं स्थानम् असमीक्ष्य न दृष्ट्वा पूर्वं पूर्वतनम् आयतनं स्थानं न परित्यजेत् ॥ २०६ ॥

ायसो ब्रूते, "मित्र ! पूर्वम् सुनिरूपितं स्थानं त
ान् नयामि ।" हिरण्यकोऽवदत् "किमत् ?" वा
ब्रूते, "अस्ति दण्डकारण्ये कर्पूरगौराभिधानं सरः ।
र कालोपार्जितः प्रियसुहृन्मे मन्थराभिधानः कू
हजधार्मिकः प्रतिवसति ॥ २०७ ॥

यतः,

परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् ।
धर्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः ॥ २०८ ॥
भोजनविशेषैर्मां संवर्द्धयिष्यति" हिरण्यकोऽप्या
नितावस्थाय मया कर्त्तव्यम् ? ॥ २०९ ॥

यतः,

स्मिन् देशे न सम्मानो न वृत्तिर्न च बान्धवाः ।
च विद्यागमः कश्चित्, तं देशं परिवर्जयेत् ॥ २
स इति । सुनिरूपितम् उत्तमं परीक्षित स्थानं स्थलम् क
ार्जितः चिरकालं बहुतरकालात् पूर्वम् उपार्जितः वि
टहीतः । सहजधार्मिकः स्वभावेनैव धर्मज्ञः प्रतिवस
॥ २०७ ॥

श इति । परोपदेशे परेषाम् उपदेशप्रदाने पाण्डि
र्वेषां नृणां मनुष्याणां सुकरं सुसाध्यम् । कस्यचि
त्मनः उदारप्रकृतेर्जनस्य धर्मे धर्मविषये स्वीयं निज
चरणं, लभ्यते इति शेषः । नतु सर्वेषामित्यर्थः ॥ २०८ ॥
भोजनविशेषैः आहारविशेषैः मां संवर्द्धयिष्यति पा
स्थाय स्थित्वा मया किं कर्त्तव्यं करणीयम् ॥ २०९ ॥
। यस्मिन् देशे जनपदे न सम्मानः सम्मानो नास्ति
न जीविका, न च बान्धवाः सुहृदश्च न सन्तीत्यर्थः ।
ागमः विद्योपार्ज्जनं न भवतीत्यर्थः । तं देशं परि
॥ २१० ॥

अपरञ्च,

धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः।
पञ्च यत्र न विद्यन्ते, तत्र वासं न कारयेत्॥ २११॥

अपरञ्च,

[लो]कयात्रा भयं लज्जा दाक्षिण्यं त्यागशीलता।
[पञ्]च यत्र न विद्यन्ते न कुर्यात् तत्र संस्थितिम्॥ २१२॥

अन्यच्च,

तत्र मित्र! न वस्तव्यं, यत्र नास्ति चतुष्टयम्।
ऋणदाता च वैद्यश्च श्रोत्रियः सजला नदी॥ २१३॥

[अ]तो मामपि तत्र नय। वायसोऽवदत्, एवमस्तु। अथ

धनिक इति। धनिकः धनवान्, श्रोत्रियः वेदज्ञो ब्राह्मणः, राजा [illegible], नदीति जलाशयसामान्योपलक्षणम्। एते पञ्च यत्र न [illegible] वर्तन्ते तत्र वासम् [illegible] न कारयेत् विदध्यात्॥ २११॥

लोकयात्रेति। लोकयात्रा आजिविका, भयं त्रासः, लज्जा [illegible], [दाक्षि]ण्यम् अनुकूलता, त्यागशीलता दानशक्तिः, यत्र एतत्पञ्च न विद्यन्[ते त]त्र संस्थितिं वासं न कुर्यात्॥ २१२॥

तत्रेति। मित्र! यत्र [illegible] [illegible] [illegible] [illegible] [illegible] वैद्यः [illegible], श्रोत्रियः वेद[illegible] ब्राह्मणः, [illegible] [illegible] नदी [illegible] [illegible] यत्र नास्ति न विद्यते तत्र न [illegible]॥ २१३॥

[illegible]

[illegible]

वायसो ब्रूते, "मित्र! मया सुनिरूपितं स्थानं अ
त्वान् नयामि।' हिरण्यकोऽवदत् "किन्तत्?" वाय
ब्रूते, "अस्ति दण्डकारण्ये कर्पूरगौराभिधानं सरः। त
चिरकालोपार्जितः प्रियसुहृन्मे मन्थराभिधानः कू
सहजधार्म्मिकः प्रतिवसति ॥ २०७ ॥

यतः,

परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् ।
धर्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः ॥

स च भोजनविशेषैर्मां संवर्द्धयिष्यति" हिरण्यक
तत् किमत्रावस्थाय मया कर्त्तव्यम्? ॥ २०८ ॥

यतः,

यस्मिन् देशे न सम्मानो न वृत्तिर्न च बान्धवाः
न च विद्यागमः कश्चित्, तं देशं परिवर्जयेत् ॥

वायस इति। सुनिरूपितम् उत्तमं परीक्षितं स्थानं स्थलम्
चिरकालोपार्ज्जितः चिरकालं बहुतरकालात् पूर्व्वम् उपार्ज्जितः
तया परिगृहीतः। सहजधार्म्मिकः स्वभावेनैव धर्म्मनिष्ठः प्रतिव
तिष्ठति ॥ २०७ ॥

परोपदेश इति। परोपदेशे परेषाम् उपदेशप्रदाने पा
विचक्षणता सर्व्वेषां नृणां मनुष्याणां सुकरं सुसाध्यम्। कस्य
अपि महात्मनः उदारप्रकृतेर्जनस्य धर्म्मे धर्म्मविषये स्वीयं नि
अनुष्ठानम् आचरणं, लभ्यते इति शेषः। न तु सर्व्वेषामित्यर्थः ॥ २०
स चेति। भोजनविशेषैः आहारविशेषैः मां संवर्द्धयिष्यति पा
ति। अवस्थाय स्थित्वा मया किं कर्त्तव्यं करणीयम् ॥ २०८ ॥
यस्मिन्निति। यस्मिन् देशे जनपदे न सम्मानः सम्मानो नास्ति
वृत्तिः न जीविका, न च बान्धवाः सुहृदश्च न सन्तीत्यर्थः।
विद्यागमः विद्योपार्ज्जनं न भवतीत्यर्थः। तं देशं परि
वर्जयेत् ॥ २१० ॥

अपरञ्च,

धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः ।
पञ्च यत्र न विद्यन्ते, तत्र वासं न कारयेत् ॥ २११ ॥

अपरञ्च,

लोकयात्रा भयं लज्जा दाक्षिण्यं त्यागशीलता ।
पञ्च यत्र न विद्यन्ते न कुर्य्यात् तत्र संस्थितिम् ॥२१२॥

अन्यञ्च,

तत्र मित्र! न वस्तव्यं, यत्र नास्ति चतुष्टयम् ।
ऋणदाता च वैद्यश्च श्रोत्रियः सजला नदी ॥ २१३ ॥

अतो मामपि तत्र नय । वायसोऽवदत्, एवमस्तु । अथ

धनिक इति । धनिकः धनवान्, श्रोत्रियः वेदज्ञो ब्राह्मणः, राजा [illegible], नदीति [illegible] । एते पञ्च यत्र न [illegible] तत्र वासम् [illegible] न कारयेत् विद्वान् ॥ २११ ॥

लोकयात्रेति । लोकयात्रा जीविका, भयं त्रासः, लज्जा [illegible], दाक्षिण्यम् अनुकूलता, त्यागशीलता दानशक्तिः, एते पञ्च यत्र न विद्यन्ते तत्र संस्थितिं वासं न कुर्य्यात् ॥ २१२ ॥

तत्रेति । मित्र ! यत्र ऋणदाता, [illegible] ऋणं ददाति योऽसौ ऋणदाता, वैद्यः चिकित्सकः, श्रोत्रियः वेदाध्यायी ब्राह्मणः, सजला जलेन सह वर्त्तमाना नदी [illegible] चतुष्टयं यत्र नास्ति न विद्यते तत्र न वस्तव्यं [illegible] ॥ २१३ ॥

[illegible]

[illegible]

वायसो ब्रूते, "मित्र ! अस्ति सुनिरूपितं स्थानं त
युष्मान् नयामि ।" हिरण्यकोऽवदत् "किन्तत् ?" व
ब्रूते, "अस्ति दण्डकारण्ये कर्पूरगौराभिधानं सरः
चिरकालोपार्जितः प्रियसुहृन्मे मन्थराभिधानः
सहजधार्म्मिकः प्रतिवसति ॥ २०७ ॥

यतः

परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् ।
धर्म्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः ॥ २०

स च भोजनविशेषैर्मां संवर्द्धयिष्यति" हिरण्यकोऽ
तत् किमत्रावस्थाय मया कर्त्तव्यम् ? ॥ २०९ ॥

यतः,

यस्मिन् देशे न सम्मानो न वृत्तिर्न च बान्धवाः
न च विद्यागमः कश्चित्, तं देशं परिवर्जयेत् ।

वायस इति । सुनिरूपितम् उत्तमं परीक्षितं स्थानं स्थलम् ।
चिरकालोपार्ज्जितः चिरकालं बहुतरकालात् पूर्व्वम् उपार्ज्जितः
तथा परिगृहीतः । सहजधार्म्मिकः स्वभावेनैव धर्म्मनिष्ठः प्र
तिष्ठति ॥ २०७ ॥

परोपदेश इति । परोपदेशे परेषाम् उपदेशप्रदाने पा
ण्डित्यता सर्व्वेषां नृणां मनुष्याणां सुकरं सुसाध्यम् । क
स्यापि महात्मनः उदारमतेर्जनस्य धर्म्मे धर्म्मविषये स्वीयं
अनुष्ठानम् आचरणं, सम्भवते इति शेषः । ननु सर्व्वेषामित्यर्थः ॥ २
स चेति । भोजनविशेषैः आहारविशेषैः मां संवर्द्धयिष्यति
विन्दति । अत्रस्थाय स्थित्वा मया किं कर्त्तव्यं करणीयम् ॥ २०९
यस्मिन्निति । यस्मिन् देशे जनपदे न सम्मानः सम्मानो
स्यर्थः । न वृत्तिः न जीविका, न च बान्धवाः सुहृदय न सन्ति
न च कश्चित् विद्यागमः विद्योपार्ज्जनं न भवतीत्यर्थः । तं देशं
वर्ज्जयेत् परित्यजेत् ॥ २१० ॥

अपरञ्च,

धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः ।
पञ्च यत्र न विद्यन्ते, तत्र वासं न कारयेत् ॥ २११ ॥

अपरञ्च,

लोकयात्रा भयं लज्जा दाक्षिण्यं त्यागशीलता ।
पञ्च यत्र न विद्यन्ते न कुर्य्यात् तत्र संस्थितिम् ॥२१२॥

अन्यच्च,

तत्र मित्र! न वस्तव्यं, यत्र नास्ति चतुष्टयम् ।
ऋणदाता च वैद्यश्च श्रोत्रियः सजला नदी ॥ २१३ ॥

अतो मामपि तत्र नय । वायसोऽवदत्, एवमस्तु । अथ

धनिक इति । धनिकः धनवान्, श्रोत्रियः वेदज्ञो ब्राह्मणः, राजा [illegible], नदीति जलाशयमात्रस्योपलक्षणम् । एते पञ्च यत्र न [illegible] वर्त्तन्ते तत्र वासम् आवासं न कारयेत् विदध्यात् ॥ २११ ॥

लोकयात्रेति । लोकयात्रा जीविका, भयं त्रासः, लज्जा कुण्ठा, [illegible] अनुकूलता, त्यागशीलता दानशक्तिः, यत्र एतत्पञ्च न विद्यन्ते तत्र संस्थितिं वासं न कुर्य्यात् ॥ २१२ ॥

तत्रेति । मित्र ! यत्र [illegible] । ऋणं ददाति योऽसौ ऋणदाता, वैद्यः चिकित्सकः, श्रोत्रियः वेदविभागज्ञो ब्राह्मणः, सजला जलेन सह वर्त्तमाना नदी [illegible] चतुष्टयं यत्र नास्ति न विद्यते तत्र न [illegible] ॥ २१३ ॥

अत इति । अतः कारणात् [illegible] मामपि तत्र नय प्रापय । [illegible]

[illegible]

को नाम मूषिकराजः। एतस्य गुणस्तुतिं जिह्वासहस्र-
द्वयेनापि यदि सर्पराजः कदाचित् कर्त्तुं समर्थः स्यादि-
त्युक्त्वा" चित्रग्रीवोपाख्यानं वर्णितवान्। ततो मन्थरः
सादरं हिरण्यकं संपूज्याह "भद्र! आत्मनो निर्जनवना-
गमनकारणमाख्यातुमर्हसि॥" २१७॥

हिरण्यकोऽवदत् "कथयामि श्रूयताम्।

अस्ति चम्पकाभिधानायां नगर्यां परिव्राजकावसथः।
तत्र चूडाकर्णो नाम परिव्राजकः प्रतिवसति। स च
भोजनावशिष्टभिक्षान्नसहितं भिक्षापात्रं नागदन्तके-

स्थितानां रत्नाकरः समुद्रः। करुणा एव कारुण्यम्। कारुण्यस्य रत्नाकरः। दयासिन्धुरित्यर्थः। मुष्णाति द्रव्यमपहरति इति मूषिकः। मूषिकाणां राजा मूषिकराजः। गुणस्तुतिं गुणकीर्त्तनम्। सहस्रसंख्यः। सहस्राणां द्वयं सहस्रद्वयं जिह्वानां सहस्रद्वयं जिह्वासहस्रद्वयम्। षष्ठीसमासः। तेन। करणे तृतीया। सर्पाणां राजा सर्पराजः। समर्थः शक्तिमान्। इति उक्त्वा कथयित्वा। चित्रग्रीवस्य तदाख्यकपोतराजस्य उपाख्यानं वृत्तान्तं वर्णितवान् आख्यातवान् कथितवान्। सादरम् आदरेण सह। संपूज्य पूजयित्वा। भद्र! सदाचारिन्! आत्मनो भवतः। निर्गताः जनाः यत्र तत् निर्जनम्। निर्जनं च तत् वनं निर्जनवनम्। तत्र आगमनम् उपस्थितिः, तस्य कारणं हेतुः। [illegible] आगमनस्य प्रयोजनमित्यर्थः। आख्यातुं कथयितुम् अर्हसि ॥ १७ ॥

अस्तीति। चम्पकम् अभिधानं नाम यस्याः तस्यां नगर्यां चम्पकनगर्यामित्यर्थः। परिव्राजकानां भिक्षुकाणां [illegible] आवसथः [illegible] अस्ति। परिव्राजकः [illegible] प्रतिवसति तिष्ठति। [illegible]

ऽवस्थाप्य स्वपिति, अहञ्च तदन्नमुत्प्लु
यामि ॥ २१८ ॥

अनन्तरं तस्य प्रियसुहृद्वीणाकर्णो नाम
समायातः। तेन सह नानाकथाप्रसङ्गाव
तासार्थं जर्जरवंशखण्डेन चूड़ाकर्णो भूमिमा
तथाविधं दृष्ट्वा वीणाकर्ण उवाच, सखे! कि
कथाविरक्तोऽन्यासक्तो भवान्? ॥ २१९ ॥

यतः, सुखं प्रसन्नं विमला च दृष्टिः
कथानुरागो मधुरा च वाणी।

अवशिष्टं, भुक्तावशेषमित्यर्थः। यत् भिक्षान्नं भिक्षया ल
भक्ष्यद्रव्यं तेन सहितं समेतं भिक्षापात्रं भिक्षाया भाजनं
भित्त्युद्घोषितगजदन्ताकारवंशादिदण्डे अवस्थाप्य संरक्ष्य स्व
पिति। अहञ्च प्रत्यहं प्रतिदिवसम् उत्प्लुत्य उत्पत्य तदन्नं भि
क्षापितभुक्तावशिष्टमन्नं भक्षयामि खादामि ॥ १८ ॥

अनन्तरमिति। प्रियः सुहृत् प्रियसुहृत्, प्रणयास्पदबन्धुरि
समायातः समागतः। तेन वीणाकर्णेन सह नानाकथाप्रस
विधाक्यालापे अवस्थितः सन्निविष्टहृदयः चूड़ाकर्णः मम
योत्पादननिमित्तं जर्जरवंशखण्डेन जर्जरीकृतवंशदण्डेन बहु
तवंशदण्डेन इत्यर्थः। भूमिं भूतलम् अताड़यत् ताड़ितवान्,
ाभाव इत्यर्थः। कथायां विरक्तः कथाविरक्तः, मम वाक्ये अ
य इत्यर्थः। अन्यासक्तः अन्यस्मिन् विषये आसक्तः ससक्त
र्थः। भवतीति शेषः ॥ १९ ॥

सुखमिति। प्रसन्नं प्रसादयुक्तं परितोषलक्षणोपेतमित्यर्थ
वदनम्। विमला निर्म्मला अकुटिलेत्यर्थः। दृष्टिः विलोकितः
ानुरागः कथायां वाक्यालापे अनुरागः अनुरक्तिः, आदरसम्भाव
भावः। मधुरा कार्कश्यरहिता वाणी वाक्यम्। अधिकः अनल्प
वात्सल्यम्। सम्भ्रमदर्शनं सम्भ्रमेण गौरवेण

स्नेहोऽधिकः सम्भ्रमदर्शनञ्च
सदानुरक्तस्य जनस्य लक्ष्म ॥ २२० ॥

अतुष्टिदानं कृतपूर्वनाशनम्
अमाननं दुश्चरितानुकीर्त्तनम् ।
कथाप्रसङ्गेन च नामविस्मृति-
र्विरक्तभावस्य जनस्य लक्षणम् ॥ २२१ ॥

चूड़ाकर्णेन उक्तं, "मित्र ! नाहं विरक्तः, किन्तु पश्य
को ममापकारी सदा पात्रस्थं भिक्षान्नमुत्प्लुत्य
यति।" वीणाकर्णो नागदन्तमवलोक्याह, "कथं

नं सत्वनादरेणावेक्षणमित्यर्थः । सदानुरक्तस्य अनुरक्तस्य अनुराग-
स्य जनस्य स्नेहान्वितस्येत्यर्थः । लक्ष्म चिह्नम् । जनस्य लक्ष्म
त्र जनस्य लक्षणमिति वैदेशिकः पाठः ॥ २२० ॥

अतुष्टिदानमिति । अतुष्टिदानम् अतुष्ट्या असन्तोषेण विरक्तहृदये-
र्थः । दानं वितरणम् । कृतपूर्वनाशनम्, पूर्वं कृतं कृतपूर्वं, तस्य
नम् अन्यथाकरणम् । अमाननम् असम्मानकरणम् । दुश्चरितानु-
र्त्तनं दुश्चरितस्य अनुचितकर्म्मानुष्ठानस्य अनुकीर्त्तनं समालोचनम् ।
प्रसङ्गेन वक्तृकथोपस्थितिसमये नाम विस्मृतिः नाम्नो विस्मरणम् ।
त् सर्वं विरक्तभावस्य विरक्तः अनुरागशून्यः भावः चित्तवृत्तिर्यस्य
हृशस्य जनस्य लक्षणं चिह्नम् ॥ २२१ ॥

चूड़ाकर्णेन इति । विरक्तः विरागयुक्तः अनुरागशून्य इत्यर्थः ।
पकारी अपकरोति अनिष्टमापादयति इति अपकारी । सदा सर्वदा
त्रस्थं पात्रे भिक्षाभाजने तिष्ठति यत् तत् पात्रस्थं भिक्षापात्रस्थित-
र्थः । भिक्षान्नं भिक्षाया अन्नं भिक्षालब्धभोजनीयद्रव्यमित्यर्थः ।
त्प्लुत्य उत्प्लुत्य भक्षयति खादति । नागदन्तं भित्तौ प्रोथित-
दन्तमित्यर्थः । अवलोक्य निरीक्ष्य आह । कथं अयं
थम् अपहरति इति सूचितः । अल्पबलः अल्पं बलं सामर्थ्यं

मूषिकः स्वल्पबलोऽप्येतावद्दूरमुत्पतति ? तदत्र केनापि
कारणेन भवितव्यम् ॥ २२२ ॥

तथा चोक्तम्। “अकस्माद्युवती वृद्धं केशेष्वाकृष्य चुम्बति
पतिं निर्दयमालिङ्ग्य हेतुरत्र भविष्यति ॥” २२३।

चूड़ाकर्णः पृच्छति, “कथमेतत् ?”

वीणाकर्णः कथयति,—“अस्ति गौड़ीये कौशाम्बी ना
नगरी ; तस्यां चन्दनदासो नाम वणिक् महाधनो नि
सति। तेन च पश्चिमे वयसि वर्त्तमानेन कामाधिष्ठि
चेतसा धनदर्पाल्लीलावती नाम वणिक्पुत्री परिणीता
सा च मकरकेतोर्वैजयन्तीव यौवनवती बभूव। स
वृद्धपतिस्तस्याः सन्तोषाय नाभवत् ॥ २२४ ॥

यस्य सः। एतावत् दूरम् ईदृशाधिकोच्चस्थानम् उत्पतति उत्प्लवते
केनापि विशेषेण कारणेन हेतुना भवितव्यं सम्भाव्यम् ॥ २२२ ॥

अकस्मादिति। युवती पूर्णयौवना भार्या, अकस्मात् ह
वृद्धं जराजीर्णेन्द्रियमित्यर्थः। पतिं भर्त्तारं केशेषु आकृष्य मि
रुह्यमवलम्ब्येत्यर्थः। निर्दयं गाढ़म् आलिङ्ग्य आश्लिष्य चुम्बति
अत्र विषये अकस्मात् तादृशवृद्धपतिचुम्बनविषये हेतुः कारणवि
भविष्यति ॥ २२३ ॥

चूड़ाकर्णः पृच्छतीति। महाधनः महान्ति विपुलानि धनानि य
सः, महासम्पत्तिशालीत्यर्थः। निवसति अध्यास्ते। पश्चिमे शेषे व
वयःक्रमे, वार्द्धक्यावस्थायाम् इत्यर्थः। वर्त्तमानेन अवतिष्ठमानेन का
धिष्ठितचेतसा कामेन भोगाभिलाषेण अधिष्ठितम् आक्रान्तं चेतो ह
यस्य तादृशेन। धनदर्पात् ऐश्वर्य्यगर्व्वात्। वणिजः पुत्री वणिक्पु
वाणिज्यजीविदुहिता इत्यर्थः। परिणीता विवाहिता। मकरः ज
जन्तुविशेषः, केतुश्चिह्नं यस्य तस्य। वैजयन्ती विजयपताका इव यौव
वती तारुण्यपूर्णा बभूव। वृद्धः प्राचीनः। पतिः भर्त्ता। सन्तोष
परितोषनिमित्तं न अभवत् ॥ २२४ ॥

:। शशिनीव हिमार्त्तानां, घर्मार्त्तानां रवाविव।
मनो न रमते, स्त्रीणां जराजीर्णेन्द्रिये पतौ ॥२२५॥

न्यच्च। पलितेष्वपि दृष्टेषु पुंसः का नाम कामिता।
भैषज्यमिव मन्यन्ते यदन्यमनसः स्त्रियः ॥ २२६ ॥

स च वृद्धपतिस्तस्यामतीवानुरागवान् ॥ २२७ ॥

त:। धनाशा जीविताशा च गुर्वी प्राणभृतां सदा।
वृद्धस्य तरुणी भार्या प्राणेभ्योऽपि गरीयसी ॥२२८॥

पि च। नोपभोक्तुं न च त्यक्तुं शक्नोति विषयान् जरी।

शशिनीति। हिमार्त्तानां हिमेन तुषारेण आर्त्तानां कातराणां नानां शशिनि चन्द्रे इव। घर्मार्त्तानां ग्रीष्मपीड़ितानां रवौ सूर्ये ।। जरया वार्द्धक्येन जीर्णानि अवसन्नानि इन्द्रियाणि यस्य तादृशे र्द्धक्याभिभूते पतौ भर्त्तरि स्त्रीणां मनः चित्तं न रमते न आसक्तं गति ॥ २२५ ॥

पलितेष्विति। पलितेषु वृद्धावस्थाव्यञ्जकशुक्लकेशादिषु दृष्टेष्वपि सः कामिता रमणीसम्भोगाभिलाषः का? विफलमित्यर्थः। यत् स्मात् अन्यमनसः अन्यस्मिन् तरुणपुरुषे मनः चित्तं यासां ताः त्रयः कामिन्यः भैषज्यमिव कटुतिक्तौषधमिव, वृद्धपतिमिति शेषः। न्यन्ते आकलयन्ति ॥ २२६ ॥

स चेति। वृद्धः पतिः वृद्धपतिः। तस्यां यौवनवत्यां भार्यायाम्। तीव अत्यन्तम्। अनुरागः प्रेम स्नेहाधिक्यमित्यर्थः। विद्यते यस्य : स भावक इत्यर्थः ॥ २२७ ॥

धनाशेति। प्राणभृतां प्राणान् बिभ्रति ये ते, तेषां प्राणिनां सम्बन्धे शाशा धनानाम् आशा अभिलाषः धनपिपासेत्यर्थः। जीविताशा तिरेच्छा च सदा सर्वदा गुर्वी गुरुतरा। किन्तु वृद्धस्य जराभि-तस्य जनस्य सम्बन्धे तरुणी यौवनान्विता भार्या प्राणेभ्योऽपि जीविता-पि गरीयसी गुरुतरा, प्रियतरेत्यर्थः ॥ २२८ ॥

नोपभोक्तुमिति। जरी जराजीर्णेन्द्रियः। विषयान् वनितादीन्

[illegible]

स्वातन्त्र्यं पितृमन्दिरे निवसतिर्यात्रोत्सवे सङ्गतिः

गोष्ठी पूरुषसन्निधावनियमो वासो विदेशे तथा ।

संसर्गः सह पुंश्चलीभिरसकृद्वृत्तेर्निजायाः क्षतिः

पत्युर्वार्धकमीर्षितं प्रवसनं नाशस्य हेतुः स्त्रियाः ॥

[illegible] ॥ २०९ ॥

[illegible] ॥ २१० ॥

स्वातन्त्र्यमिति । स्वातन्त्र्यं स्वाधीनता । पितृमन्दिरे प्र[illegible] निवसतिः वासः । यात्रोत्सवे यात्रायां तीर्थादियात्रायाम् ए[illegible] फल्गूत्सवादौ सर्वत्र जनसमागमस्थाने इति तात्पर्यम् । [illegible] समागमः । पूरुषसन्निधौ पुरुषसमीपे गोष्ठी सम्भाषा मदनोद्वेगमात् । अनियमः नियमलङ्घनम् । विदेशे भिन्नदेशे वासः असकृत् पुंश्चलीभिः कुलटाभिः सह संसर्गः सहवासः । असकृत् वा[illegible] निजाया आत्मीयाया वृत्तेः चारित्रस्य क्षतिः भ्रंशः । पत्युः वार्धकं वृद्धावस्था । ईर्षितं परसौभाग्यासहिष्णुता, पत्युः परदारगम[illegible] असहिष्णुता वा सपत्न्यादीनां सन्तानदर्शनेन ईर्ष्या निजसन्ताना[illegible] चेष्टा वा । प्रवसनं भर्तुः प्रवास इत्यर्थः । एतत् सर्वं स्त्रियाः कुला[illegible]नायाः नाशस्य पातिव्रत्यभ्रंशस्य हेतुः कारणम् ॥ २११ ॥

स्वप्नश्चान्यगृहे वासो नारीणां दूषणानि षट् ॥ २३२

च । स्थानं नास्ति क्षणो नास्ति नास्ति प्रार्थयिता नरः ।
तेन नारद ! नारीणां सतीत्वमुपजायते ॥ २३३ ॥

न्यत्र । न स्त्रीणामप्रियः कश्चित् प्रियो वापि न विद्यते ।
गावस्तृणमिवारण्ये प्रार्थयन्ति नवं नवम् ॥ २३४ ॥

स्त्रियो हि चपला नित्यं देवानामपि विश्रुतम् ।
ताश्चापि रक्षिता येषां ते नराः सुखभागिनः ॥ २३५ ॥

पानमिति । पानं सुरापानम् । दुर्जनसंसर्गं दुर्जनै दुश्चरित
[illegible]ः सह संसर्गं समागमः । पत्या भर्त्रा सह विरहः विच्छेदः ।
टन भ्रमणं गृहे गृहे इति शेषः । स्वप्नः दुःस्वप्नादिदर्शनम् । अन्य-
हे वासः परगृहे नियतमवस्थानम् । एतानि षट् षट्संख्यकानि
ारीणां रमणीनां दूषणानि चारित्रभ्रंशकराणि ॥ २३२ ॥

स्थानमिति । स्थानं सङ्गमस्थलं नास्ति । क्षणः परपुरुषसम्भो-
गावकाशः नास्ति । प्रार्थयिता नरः तत्सम्भोगाभिलाषी पुरुषः नास्ति
। लभ्यते इति तात्पर्य्यम् । नारद ! तेन स्थानाद्यभावादिकारणेन, न
तु धर्म्मभिया नारीणां कामिनीनां सतीत्वं साध्वीत्वम् उपजायते सम्प-
द्यते । वस्तुतस्तु एतद्वचनं नारीनिन्दापरम् । बह्व्यो रमण्यः पतिप्राणा
विद्यन्ते । यास्तु सतीत्वधर्म्मरक्षार्थं प्राणानपि परित्यजन्ति ॥ २३३ ॥

न स्त्रीणामिति । स्त्रीणां नारीणां कश्चित् अप्रियो न, अप्रयत्न
भाजनं न, कश्चित् प्रियो वापि न विद्यते । अरण्ये वनमध्ये गावः
नवं नवं तृणमिव प्रार्थयन्ति कामयन्ति, नव नवं पुरुषमिति
शेषः ॥ २३४ ॥

स्त्रिय इति । हि निश्चये स्त्रियः प्रमदा नित्यं नियतं चपलाः
चञ्चलप्रकृतयः । इति देवानामपि देवतानामपि विश्रुतं ख्यातम् । येषां
पुरुषाणां ताः स्त्रियः रक्षिताः अधर्म्मरक्षिताः इति शेषः । ते नराः
मनुष्याः सुखभागिनः एवं भजन्ते ये ते सुखभागिनः सुखिन
इत्यर्थः ॥ २३५ ॥

[illegible]

॥ २०९ ॥

[illegible]

॥ २१० ॥

[illegible] । [illegible] । [illegible] । [illegible] । [illegible] ईर्ष्यितं [illegible] । [illegible] प्रवसनं भर्तुः प्रवास इत्यर्थः । [illegible]

॥ २११ ॥

[illegible]न्यगेहे वासो नारीणां दूषणानि षट् ॥ २३२

स्थानं नास्ति क्षणो नास्ति नास्ति प्रार्थयिता नरः।
[illegible] नारद। नारीणां सतीत्वमुपजायते ॥ २३३ ॥

न स्त्रीणामप्रियः कश्चित् प्रियो वापि न विद्यते।
[illegible]णमिवारण्ये प्रार्थयन्ति नवं नवम् ॥ २३४ ॥

[illegible]यो हि चपला नित्यं देवानामपि विश्रुतम्।
[illegible]श्चापि रक्षिता येषां ते नराः सुखभागिनः ॥ २३५ ॥

[illegible]मिति। पान सुरापानम्। दुर्जनसंसर्ग दुर्जनै [illegible] सह संसर्ग समागम। पत्या [illegible] सह विरह विच्छेद। [illegible] स्वप्न [illegible] स्वप्नादिदर्शनम्। अन्य-[illegible] परगृहे नियतमवस्थानम्। एतानि षट् [illegible] दूषणानि [illegible] ॥ २३२ ॥

[illegible]मिति। स्थान [illegible] नास्ति। [illegible] नास्ति। प्रार्थयिता नर [illegible] नास्ति [illegible] इति तात्पर्यम्। नारद। तेन [illegible] नारीणां [illegible] सतीत्वं [illegible] उपजायते [illegible] नारीविषयम् [illegible] ॥ २३३ ॥

न स्त्रीणामिति। [illegible] नारीणां कश्चित् [illegible] न [illegible] न, कश्चित् प्रियो वापि न विद्यते। [illegible] नवं [illegible] प्रार्थयन्ति [illegible] नवं नवं [illegible]
॥ २३४ ॥

स्त्रिय इति। [illegible] चपला [illegible] देवानामपि [illegible] विश्रुतं [illegible]। [illegible] नराः स्त्रियः रक्षिताः [illegible] इति [illegible]। ते नरा-[illegible] सुखभागिनः [illegible] ॥ २३५ ॥

न लज्जा न विनीतत्वं न दाक्षिण्यं न भीरुता ।
प्रार्थकाभाव एवैकं सतीत्वे कारणं स्त्रियाः ॥ २२६ ॥

अन्यच्च । सुवेशं पुरुषं दृष्ट्वा भ्रातरं यदि वा सुतम् ।
योनिः क्लिद्यति नारीणां, सत्यं सत्यं हि नारद ! ॥२२७॥

अपरञ्च । घृतकुम्भसमा नारी तप्ताङ्गारसमः पु
तस्माद्घृतञ्च वह्निञ्च नैकत्र स्थापयेद् बुधः ॥

अपि च । पिता रक्षति कौमारे, भर्त्ता रक्षति यौ
पुत्राश्च स्थाविरे भावे, न स्त्री स्वातन्त्र्यमर्हति

न लज्जेति । लज्जा न, विनीतत्वं विनयो न, दाक्षिण्यं
स्वभावो न, भीरुता भयशीलता न, स्त्रियाः सतीत्वे कारणमि
परन्तु प्रार्थकाभाव एव प्रार्थयतीति प्रार्थकः कामी । तस्य अ
लाभ एव स्त्रियाः सतीत्वे कारणं हेतुः । कामुकपुरुषाभ
कामिनीनां सतीत्वमुपजायते इति भावः ॥ २२६ ॥

सुवेशमिति । भ्रातरं सोदरं पितृव्यमातुलपुत्रादिकं वा ।
यदि वा सुतं पुत्रं सपत्नीपुत्रं वा पुत्रस्थानीयं वा सुवेशं सुन्दरं पु
रुषं दृष्ट्वा नारीणां कामिनीनां योनिः क्लिद्यति क्लिन्ना भवति
पुरुषदर्शनेन कामपरतन्त्रा योषितोऽवश्यमिति भावः । हि निश्च
द ! सत्यं सत्यम्, एतद्वाक्यं नान्यथा भवतीत्यर्थः ॥ २२७ ॥

घृतकुम्भसमेति । नारी घृतकुम्भसमा घृतपूर्णकलसेन तुल्या ।
पुरुषः तप्ताङ्गारसमः, तप्तेन उष्णतागुणसम्पन्नेनाङ्गारेण समः
। तस्मात् बुधः पण्डितः घृतं हविः, वह्निं हुताशनं च, एकत्र
स्थाने न स्थापयेत् । तप्ताङ्गारसान्निध्येन घृतस्य विका
इति भावः ॥ २२८ ॥

मिति । कौमारे शैशवावस्थायां पिता जनकः तत्स्थानीयो
क्षयति । यौवने तारुण्यावस्थायां भर्त्ता परिणेता, रक्ष
भावे वार्द्धक्यावस्थायां पुत्राः रक्षन्ति । सुतरां कस्यामप्यवस्था
स्त्रीः स्वाधीनता न घटते न वस्तुं समर्था भवति ॥ २२८ ॥

मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥ २४० ॥

एकदा सा लीलावती रत्नावलीकिरणकर्बुरे पर्यङ्के
वणिक्पुत्रेण सह विस्रम्भालापैः सुखासीना तम
लक्षितोपस्थितं पतिमवलोक्य सहसोत्थाय केशेष्वाकृष्य
गाढमालिङ्ग्य चुम्बितवती । तेनावसरेण जारश्चोत्थाय
पलायितः ॥ २४१ ॥

उक्तञ्च । उशना वेद यच्छास्त्रं, यच्च वेद बृहस्पतिः ।

मात्रेति । मात्रा जनन्या, स्वस्रा भगिन्या, दुहित्रा कन्यया वा
विविक्तासनः विविक्तं निर्जनम् आसनं यस्य तादृशो न भवेत् ।
मात्रादिभिः सह निर्जनस्थाने न तिष्ठेदिति भावः । यतः बलवान्
प्रबलः इन्द्रियग्रामः इन्द्रियसमूहः विद्वांसमपि कृतविद्यमपि प्राणिन-
मित्यर्थः । कर्षति आकर्षति, अविहितकर्मण्यपि प्रवर्त्तयतीति भावः ।
तेनेन्द्रियसमीपे कापि बाधा न स्यान्न प्राप्नोतीत्याशयः ॥ २४० ॥

एकदेति । एकदा एकस्मिन् दिवसे । असौ लीलावती तदाख्या
वणिक्तनया, रत्नावलीकिरणकर्बुरे रत्नावलीनां रत्नसमूहानां किरणैः
मयूखैः कर्बुरे नानावर्णे पर्यङ्के पल्यङ्कोपरिस्थितशय्यायामित्यर्थः ।
तेन वणिक्पुत्रेण जारेणेत्यर्थः । सह विस्रम्भालापैः रहस्यकथोप-
कथनैः । करणे तृतीया । सुखासीना यथासुखं निषण्णा सती ।
अलक्षितोपस्थितम् अलक्षितम् अपरिज्ञातम् आकस्मिकमित्यर्थः । उपस्थितं
आगतम् । एकस्य विशेष्यकल्पनया द्वन्द्वसमासः । पतिं स्वामिनम्
अवलोक्य दृष्ट्वा, सहसा तत्क्षणात् उत्थाय केशेषु शिरोरुहेषु । आक-
ृष्य गृहीत्वा । गाढं धृत्वा निर्भरं गाढम् आलिङ्ग्य उपगुह्य चुम्बित-
वती चुचुम्ब । अत्रान्तरे एतदवकाश एव जारः उपपतिः उत्थाय शय्यां
परित्यज्य इति भावः । पलायितः प्रनष्टः ॥ २४१ ॥

उशना इति । उशनाः शुक्रः यत् शास्त्रं वेद जानाति, बृहस्पतिः
देवगुरुः तत् च वेद इति शेषः । तत् सर्वं बुद्धिमतीत्याह मित्यर्थः ।

स्वभागेनैव तत् सर्वं कौमुदी सुप्रतिष्ठितम् । २४
तदालिङ्गनमपरमोपवर्त्तिनी कुट्टिन्यचिन्त
यत्कस्मादियमेनमुपगूढ़वतीति । ततस्तया कुट्टिन्या त
रणं जारं परिज्ञाय सा लीलावती गुप्तेन दण्डेन दण्डि
ता। यतोऽहं ब्रवीमि, अकस्माद् युवती इत्यादि
बलोपलम्भेन च केनापि कारणेनात्र भवितव्यम्। व
विचिन्त्य परिव्राजकेनोक्तं, "कारणमत्र धनबाहुल्यं
प्रतिभाति ॥ २४३ ॥

यतः। धनवान् बलवान् लोके सर्व्वः सर्व्वत्र सर्व्वदा।
प्रभुत्वं धनमूलं हि राज्ञामप्युपजायते ॥ २४४ ॥

कौमुदी स्त्रीणां बुद्धौ सुप्रतिष्ठितम् । नारीणां प्रतिभा स्वभावसि
तात्पर्य्यम् ॥ २४२ ॥

तदालिङ्गनमिति। समीपवर्त्तिनी, समीपे वर्त्तते इति सम
वर्त्तिनी, सन्निहिता इत्यर्थः। कुट्टिनी व्यभिचारसहाया नारी,
तादृशम् आलिङ्गनं सहसा युवतीकर्त्तृकवृद्धपत्यालिङ्गनम्, कस्मा
बहा अचिन्तयत् चिन्तितवती। इयं युवती एनं स्वपतिं कस्मात् क
स्मात् उपगूढ़वती आलिङ्गितवती इति। ततस्तदनन्तरं कुट्टिन्या त
कारणं तस्य आलिङ्गनस्य कारणं हेतुं जारम् उपपतिं परिज्ञाय निह
गुप्तेन दण्डेन गूढ़दण्डेन नतु प्रकाशितेन इत्यर्थः। दण्डिता शासित
मूषिकबलोपलम्भेन मूषिकस्य बलं मूषिकबलं, तत्प्रयोजकेन इत्य
अत्र विषये केनापि अपरिज्ञातेनेत्यर्थः। कारणेन निमित्तेन भवित
भाव्यम्। तत् विचिन्त्य विभाव्य परिव्राजकेन उक्तं कथितम्। अ
मूषिकस्य बलाधिक्योपलब्धिविषये च कारणं हेतुः धनबाहुल्यं धनस
बाहुल्यम् आधिक्यमेव प्रतिभाति प्रतीयते इत्यर्थः ॥ २४३ ॥

धनवान् इति। लोके जगति यो धनवान् विभवशाली स सर्व
सर्व्वदा सर्व्वत्र बलवान्, उच्यते इति शेषः। हि तथाहि राज्ञ
भूपतीनां प्रभुत्वम् अपि प्रभावोऽपि धनमूलं धनं मूलं यस्य तादृशम् उप
जायते। धनाभावे प्रभुत्वस्याप्यभावो भवति इति भावः ॥ २४४ ॥

ततः खनित्रमादाय तेन परिव्राजकेन विवरं खनित्वा
चिरसञ्चितं मम धनं गृहीतम् । ततः प्रभृति निजशक्ति-
हीनः सत्वोत्साहरहितः प्रत्यहं स्वाहारमप्युत्पादयितुम-
क्षमः, सत्रासं मन्दं मन्दमुपसर्पन् चूड़ाकर्णेनाहमव-
लोकितः । ततस्तेनोक्तम्, ॥ २४५ ॥

"धनेन बलवान् लोको धनाद्भवति पण्डितः ।
पश्यैनं मूषिकं पापं स्वजातिसमतां गतम् ॥ २४६ ॥

किञ्च । अर्थेन तु विहीनस्य पुरुषस्याल्पमेधसः ।
क्रियाः सर्व्वा विनश्यन्ति ग्रीष्मे कुसरितो यथा ॥ २४७ ॥

तत इति । ततस्तदनन्तरं तेन परिव्राजकेन भिक्षुकविशेषेण
खनित्रं, खन्यते अनेन इति खनित्रं भूमिखननोपयुक्तास्त्रविशेषः । तत्
आदाय गृहीत्वा विवरं बिलं खनित्वा मम चिरकालोपार्जितं चिरेण
कालेन उपार्जितं सञ्चितं धनं गृहीतं स्वायत्तीकृतम् । ततः प्रभृति
तदवधि निजशक्तिहीनः निजया आत्मीयया शक्त्या सामर्थ्येन हीनः विर-
हितः । सत्वोत्साहरहितः सत्वञ्च उत्साहश्च तौ सत्वोत्साहौ बलो-
द्यमौ, ताभ्यां रहितः हीनः । प्रत्यहं प्रतिदिनं स्वाहारं निजस्य भोजनम्
अपि उत्पादयितुं संग्रहीतुम् अक्षमः असमर्थः । सत्रासं त्रासेन
सह, सभयम् इत्यर्थः । मन्दं मन्दम् अतीव मृदु यथा तथा उपसर्पन्
गच्छन् चूड़ाकर्णेन तदाख्यपरिव्राजकेन अवलोकितः दृष्टः । ततस्तेन
परिव्राजकेन उक्तं कथितम् ॥ ४९ ॥

धनेनेति । सर्व्वः लोकः धनेन अर्थेन बलवान् बलशाली
भवति । सर्व्वः धनात् अर्थात् पण्डितः विचक्षणः भवति । तथाहि
स्वजातिसमतां निजजातितुल्यतां गतं प्राप्तं पापं पापाशयम् एनं
मूषिकं पश्य अवलोकय ॥ ५६ ॥

अर्थेन इति । ग्रीष्मे ग्रीष्मकाले कुसरितः अल्पजला नद्यः यथा
तथा, अर्थेन धनेन विहीनस्य विरहितस्य अतएव अल्पमेधसः अल्पा
मेधा यस्य बुद्धिरहितस्य इत्यर्थः । पुरुषस्य सर्व्वाः क्रिया विनश्यन्ति
विफला भवन्ति ॥ ५७ ॥

अपरञ्च । यस्यार्थास्तस्य मित्राणि,यस्यार्थास्तस्य ब

यस्यार्थाः स पुमान् लोके, यस्यार्थाः स हि पण्डितः

अन्यच्च । अपुत्रस्य गृहं शून्यं सन्मित्ररहितस्य च

मूर्खस्य च दिशः शून्याः सर्वशून्या दरिद्रता ॥ २

अपि च । दारिद्र्यान्मरणाद्वापि दारिद्र्यमवरं स्

अल्पक्लेशेन मरणं दारिद्र्यमतिदुःसहम् ॥ २५

अन्यच्च, तानीन्द्रियाण्यविकलानि, तदेव नाम

सा बुद्धिरप्रतिहता, वचनं तदेव ।

अर्थोष्मणा विरहितः पुरुषः स एव

त्वन्यः क्षणेन भवतीति विचित्रमेतत् ॥" २५

यस्यार्थां इति । यस्य अर्थाः धनानि विद्यन्ते इति शेषः । त

मित्राणि सुहृदः सन्ति इति शेषः । यस्य अर्थाः, तस्य बान्ध

बपित्रादयः । यस्य अर्थाः, सः लोके पुमान् महापुरुषः । य

अर्थाः, स हि पण्डितः पाण्डित्याभिमानवान् ॥ २४८ ॥

अपुत्रस्येति । नास्ति पुत्रो यस्य सः अपुत्रः तस्य, सन्मित्र

तस्य, सता साधुना मित्रेण सुहृदा रहितस्य विहीनस्य च जनस्य

भवनं शून्यं रिक्तम् । मूर्खस्य मूढस्य दिशः आशाः शून्याः । दरि

दारिद्र्यं सर्वशून्या सर्वं शून्यं रिक्तं यत्र तादृशी ॥ २४९ ॥

दारिद्र्यादिति । दारिद्र्यात् दैन्यात् मरणात् मृत्योः वा

उभयोर्मध्ये इति भावः । दारिद्र्यम् अवरं निकृष्टं अधमं म

हि मरणं मृत्युः अल्पक्लेशेन, भवतीति शेषः । दारिद्र्यं दै

दुःसहम् अतिदुःखेन महाकष्टेन सह्यते यत् तत्, महाकष्ट

र्थः ॥ २५० ॥

तानीति । तानि अविकलानि अविकृतानि इन्द्रियाणि नासाप्र

नामकरणमभवीति । विद्यन्ते इति शेषः । तदेव पूर्वोक्तमेव

। सा अप्रतिहता तीक्ष्णा बुद्धिः । तदेव पूर्ववदेव वचनं वाक्य

इति शेषः । अर्थोष्मणा धनतेजसा विरहितः विहीन

एतत् सर्वमाकर्ण्य मयालोचितम्, इदानीं ममात्रा-
ानमयुक्तं, यच्चान्यस्मै एतद्वृत्तान्तकथनं, तदप्यनुचि-
[॥ २५२ ॥

:। अर्थनाशं, मनस्तापं, गृहे दुश्चरितानि च।
वञ्चनञ्चापमानञ्च, मतिमान्न प्रकाशयेत् ॥ २५३ ॥

ा चोक्तम्। आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजम्।
तपो दानापमानञ्च नव गोप्यानि यत्नतः ॥ २५४ ॥

ा चोक्तम्। अत्यन्तविमुखे दैवे व्यर्थयत्ने च पौरुषे।
मनस्विनो दरिद्रस्य वनादन्यत् कुतः सुखम्?॥२५५॥

एव पुरुषः मानवः अर्थेन धनसमयेन अन्यः अन्यविधो भवतीति,
ात् विचित्रम् आश्चर्यम् ॥ २५१ ॥

एतदिति। आकर्ण्य श्रुत्वा। आलोचितं मनसा आलोडितम्।
ानीम् अधुना मम अत्र अस्मिन् स्थाने अवस्थानं स्थितिः अयुक्तम्
नुचितम्। यत् च अन्यस्मै अन्यजनाय एतद्वृत्तान्तकथनम् एतद्विव-
प्रज्ञापनं, तदपि अनुचितम् अकर्त्तव्यम् ॥ २५२ ॥

अर्थनाशमिति। मतिमान् ज्ञानवान् जनः, अर्थनाशं धनहानिं,
नस्तापं मनसः सन्तापकारणं, गृहे भवने दुश्चरितानि पापानुष्ठानानि,
ञ्चनं परप्रतारणम्, अपमानं मानहानिं च न प्रकाशयेत् न कथंचित्
ाशयेत् ॥ २५३ ॥

आयुरिति। आयुः परमायुः। वित्तं धनम्। गृहच्छिद्रं गृहे
नुचितानुष्ठानम्। मन्त्रमैथुनभेषजं, मन्त्रः परामर्शः। मैथुनं कामिनी-
प्रयोगः। भेषजम् औषधम्। समाहारद्वन्द्वः। तपः तपश्चानुष्ठानम्,
ानं याचकादिषु धनादिप्रतिपादनम्, अपमानं मानहानिः। दानेन
ह अपमानं दानापमानमिति तृतीयातत्पुरुषः। एतानि नव
ावसंख्यकानि यत्नतः यत्नेन गोप्यानि गोपनीयानि, न प्रकाश्या-
नीत्यर्थः ॥ २५४ ॥

अत्यन्तेति। दैवे भागधेये अत्यन्तविमुखे नितान्तपराङ्मुखे सति,

अन्यच्च। मनस्वी म्रियते कामं, कार्पण्यं न तु गच्छति।
अपि निर्वाणमायाति नानलो याति शीतताम्॥२५६॥
किञ्च। कुसुमस्तवकस्येव द्वे वृत्ती तु मनस्विनः।
सर्वेषां मूर्ध्नि वा तिष्ठेद्विशीर्य्येदथ वा वने॥२५७॥
यच्चात्रैव याच्ञया जीवनधारणं, तदतीव गर्हितम्।
यतः। वरं विभवहीनेन प्राणैः सन्तर्पितोऽनलः।
नोपचारपरिभ्रष्टः कृपणः प्रार्थ्यते जनः॥२५८॥
अन्यच्च। दारिद्र्याद्ध्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो
निस्तेजाः परिभूयते, परिभवान्निर्वेदमापद्यते।

पौरुषे पुरुषकारे च व्यर्थयते विफलयते सति, मनस्विनः प्रशस्तमनसो मानिन इत्यर्थः। दरिद्रस्य दीनस्य वनात् अरण्यात् अन्यत्, सुखं इति अन्यशब्दयोगे पञ्चमी। न क्वापि भवतीति भावः॥२५५॥

मनस्वीति। मनस्वी प्रशस्तमना जनः कामं वरं म्रियते प्राणान् परित्यजति, न तु कार्पण्यं लाघवं गच्छति स्वीकरोति। तथाहि अनलः अग्निः निर्वाणमपि नाशमपि आयाति प्राप्नोति, तथापि शीतलतां न याति न भजते॥२५६॥

कुसुमेति। कुसुमस्तवकस्य पुष्पगुच्छस्येव मनस्विनः प्रशस्तमनसो जनस्य द्वे वृत्ती व्यवहारौ। द्वे के? इत्याह, सर्वेषामिति। सर्वेषां निखिलजनानां मूर्ध्नि मस्तकोपरि तिष्ठेद्वा, अथवा किं वा वने अरण्ये विशीर्य्येत् विशीर्णो भवेत्। मनस्वी कदापि मध्यमावस्थां नाश्रयते इति तात्पर्यम्॥२५७॥

यच्चेति। याच्ञया प्रार्थनया जीवनधारणं प्राणधारणं, तत् अतीव गर्हितम् अत्यन्तनिन्दितम्।

वरमिति। विभवहीनेन धनहीनेन जनेन वरं प्राणैः जीवनैः अनलः अग्निः सन्तर्पितः तृप्तिं प्रापितः, भूयादिति शेषः। तथापि उपचारपरिभ्रष्टः उपचारेण सत्कारेण परिभ्रष्टः परिहीणः कृपणः क्षुद्रः जनः न प्रार्थ्यते प्रार्थितो न भूयादिति भावः॥२५८॥

र्विण्णः शुचमेति शोकपिहितो बुद्ध्या परित्यज्यते,
र्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम् ॥२५९॥

ञ्च । वरं मौनं कार्य्यं न च वचनमुक्तं यदनृतं
वरं क्लैव्यं पुंसां न च परकलत्राभिगमनम् ।
वरं प्राणत्यागो न च पिशुनवाक्येष्वभिरुचि-
र्वरं भिक्षाशित्वं न च परधनास्वादनसुखम् ॥२६० ॥
वरं शून्या शाला न च खलु वरो दुष्टवृषभः
वरं वेश्या पत्नी न पुनरविनीता कुलवधूः ।

दारिद्र्यादिति । दारिद्र्यात् दैन्यात् ह्रियं लज्जाम् एति प्राप्नोति । ह्रीपरिगतः लज्जाभिभूतः जनः तेजसः सत्त्वात् प्रभ्रश्यते भ्रष्टो भवति । निस्तेजाः निःसत्त्वः तेजोविहीनः इत्यर्थः । परिभूयते सर्व्वत्र परिभूतो भवति । परिभवात् सर्व्वत्र अनादरात् निर्व्वेदं विपन्निमित्तकमात्मग्लानिम्, आपद्यते लभते । निर्व्विण्णः आत्मनि अवज्ञायुक्तः शुचं शोकम् एति प्राप्नोति । शोकपिहितः शोकाक्रान्तः बुद्ध्या धिया परित्यज्यते परिहीयते । निर्बुद्धिः बुद्धिहीनः क्षयं नाशम् एति प्राप्नोति । अहो ! आश्चर्य्यं निधनता धनहीनता, सर्व्वापदां सर्व्वासाम् आपदाम् आस्पदं स्थानम्, आकर इति भावः ॥ २५९ ॥

वरं मौनमिति । मौनं मूकता वाक्यरोध इत्यर्थः । वरं कार्य्यं विधेयम् । तथापि यत् अनृतं वचनं तत् उक्तं न, भूयादिति शेषः । पुंसां पुरुषाणां क्लैव्यं क्लीवता वरं श्रेयः, तथापि परकलत्रेषु परस्त्रीषु अभिगमनं सम्भोगः न, श्रेय इति शेषः । प्राणत्यागः जीवनविसर्ज्जनं वरं, कर्त्तव्य इति शेषः । तथापि पिशुनवाक्येषु खलवचनेषु अभिरुचिः प्रीतिः न । भिक्षाशित्वं भिक्षया अश्नाति भक्षयति इति भिक्षाशी । तस्य भावः भिक्षाशित्वं, तदपि वरं श्रेय इति शेषः । तथापि परधनास्वादनसुखं, परेषां धनानि परधनानि, तेषाम् आस्वादनेन भोगेन यत् सुखं तत् न, श्रेयस्करमिति शेषः ॥ २६० ॥

वरं शून्येति । शाला गृहं शून्या गोहीना वरं, श्रेयस्करी त

वरं वासोऽरण्ये न पुनरविवेकाधिपपुरे
वरं प्राणत्यागो न पुनरधमानामुपगमः ॥ २६१॥
अपि च। सेवेव मानमखिलं,ज्योत्स्नेव तमो,जरेव लावण्
हरिहरकथेव दुरितं, गुणशतमप्यर्थिता हरति ॥ २६
इति विमृश्य तत् किमहं परपिण्डेनात्मानं पोषया
कष्टं भोः। तदपि द्वितीयं मृत्युद्वारम् ॥
यतः। पल्लवग्राहि पाण्डित्यं क्रयक्रीतञ्च मैथुनम्।

शेषः। न च दुष्टवृषभः वरः श्रेयान्। वेश्या वारवनिता,
इति शेषः। न पुनः अविनीता दुर्विनीता, दुष्टा इत्यर्थः। कु
कुलबाला पत्नी भार्या ग्राह्या इति शेषः। अरण्ये वनमध्ये
अवस्थानं वरम्,' अङ्गीकार्य्य इति शेषः। तथापि न पुनः अवि
धिपपुरे, नास्ति विवेको यस्य सः अविवेकः विवेचनाशून्यः इ
अधिपाति इति अधिपः। अविवेकश्चासौ अधिपश्चेति अविवेका
विवेचनाहीनो भूपाल इत्यर्थः। तस्य पुरे नगरे वासः विधेय
शेषः। प्राणत्यागः प्राणानां जीवनानां त्यागः परित्यागो
श्रेयान् इत्यर्थः। तथापि न पुनः अधमानां नीचाशयानाम्
उपसर्पणं, श्रेयान् इति शेषः ॥ २६१ ॥

सेवेवेति। सेवा दासभावः अखिलं समस्तं मानमिव सम्मानं
ज्योत्स्ना चन्द्रिका तमः ध्वान्तम् इव। जरा वार्द्धक्यं लावण्यं
कान्तिमिव हरिहरकथा,' हरिश्च हरश्च तौ हरिहरौ वासुदेवमहे
तयोः कथा चरितकीर्त्तनं दुरितं पापमिव। अर्थिता या
गुणशतमपि निखिलान् गुणानपि इत्यर्थः। हरति नाश
इत्यर्थः ॥ २६२ ॥

इतीति। इति एवं विमृश्य विविच्य। परपिण्डेन परदत्ता
पोषयामि पालयामि। भोः! अहो! कष्टं दुःखक्लेशपातः।
परान्नेनात्मपोषणमपि द्वितीयम् अपरं मृत्युद्वारं मरणस्य पन्थाः ॥
पल्लवग्राहीति। पल्लवग्राहि पल्लवं गृह्णाति न तु अन्यस्

भोजनञ्च पराधीनं तिस्रः पुंसां विडम्बनाः ॥ २६३ ॥

अन्यच्च । रोगी चिरप्रवासी परान्नभोजी परावसथशायी ।
यज्जीवति तन्मरणं, यन्मरणं सोऽस्य विश्रामः ॥२६४॥

इत्यालोच्यापि लोभात् पुनरपि तदीयान्नं ग्रहीतुं ग्रहमकरवम् । तथा चोक्तम् ॥ २६५ ॥

लोभेन बुद्धिश्चलति, लोभो जनयते तृषाम् ।
तृषार्तो दुःखमाप्नोति परत्रेह च मानवः ॥ २६६ ॥

ततोऽहं मन्दं मन्दमुपसर्पंस्तेन वीणाकर्णेन जर्जर-वंशखण्डेन ताडितश्चाचिन्तयं, लुब्धो ह्यसन्तुष्टो नियत-

स्वभार्यायामप्यार्यादिकं स्पृशति इत्यर्थः । तादृशं पाण्डित्यं यत् किञ्चित् वचनाभ्यासमात्रमिति भावः । क्रयक्रीतं क्रयेण मूल्येन क्रीतं मैथुनं स्त्रीसम्भोगः च । पराधीनं परायत्तं भोजनम् आहारश्च, तिस्रः पुंसां पुरुषाणां विडम्बनाः वञ्चनानि ॥ २६३ ॥

रोगीति । रोगी रोगो विद्यते अस्य सः, पीडाभिभूत इत्यर्थः । चिरप्रवासी चिरं प्रवसति विदेशे अवतिष्ठते यः सः । परान्नभोजी, परस्य अन्नं परान्नं तत् भुङ्क्ते योऽसौ परान्नभोजी । परावसथशायी, परस्य आवसथे वासस्थाने शेते योऽसौ । स च यत् जीवति जीवनं धारयति, तत् मरणं मृत्युः । यत् मरणं प्राणवियोगः, सः अस्य विश्रामः निवृत्तिलाभः ॥ २६४ ॥

इतीति । इति आलोच्य निश्चित्य । लोभात् [illegible] हेतोः पुनरपि अन्नं तदीयान्नं तस्य परिव्राजकस्य [illegible] ग्रहीतुम् आदातुं ग्रहमाग्रहम् अकरवं कृतवान् ॥ २६५ ॥

लोभेनेति । लोभेन धनलिप्सया [illegible] चलति । लोभः तृषां तृष्णां [illegible] तृषा- [illegible] मानवः [illegible] आप्नोति [illegible]

आकाङ्क्षी भवति ॥ २६७ ॥

यथा च । धनलुब्धो ह्यसन्तुष्टोऽनियतात्माजितेन्द्रियः ।
सर्वा एवापदस्तस्य यस्य तुष्टं न मानसम् ॥ २६८ ॥
सर्वाः सम्पत्तयस्तस्य सन्तुष्टं यस्य मानसम् ।
उपानद्गूढपादस्य ननु चर्मावृतेव भूः ॥ २६९ ॥

अपरञ्च । सन्तोषामृततृप्तानां यत्सुखं शान्तचेतसाम् ।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ॥ २७० ॥

किञ्च । तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ।
येनाशाः पृष्ठतः कृत्वा नैराश्यमवलम्बितम् ॥ २७१ ॥

संसर्गेण नाशित [illegible] [illegible] विनिवारितम् ॥ २७२ ॥

धनलुब्ध इति । यस्य मानसम् अन्तःकरणं न तुष्टं सन्तुष्टं, तस्य सर्वा एव आपदः विपदः, भवन्तीति शेषः । यतः धनलुब्धः [illegible] रहितो जनः धनलुब्धः धनेषु लोभयुक्तः । अनियतात्मा अस्थिरः चञ्चलं हृदयं यस्य तथाविधः । अजितेन्द्रियः न जितानि इन्द्रियाणि येन सः, तादृशो भवतीति शेषः ॥ २६८ ॥

सर्वा इति । यस्य मानसम् अन्तःकरणं सन्तुष्टं तस्य सर्वाः सम्पत्तयः सम्पदः भवन्तीति शेषः । उपानद्गूढपादस्य उपानद्भ्यां पादुकाभ्यां गूढौ आवृतौ पादौ चरणौ यस्य तादृशस्य जनस्य भूः पृथिवी चर्मावृतेव चर्मोच्छादितेव प्रतिभातीति शेषः ॥ २६९ ॥

सन्तोषेति । सन्तोषामृतेन सन्तोषरूपेणामृतेन तृप्तानां [illegible]तानां शान्तचेतसां प्रशान्तहृदयानां जनानां यत्सुखं, भवतीति शेषः । धनलुब्धानां धनेषु लोभवताम् अतएव इतश्च इतश्च धावतां जनानां शान्तिसुखं कुतः? तैस्तत्सुखं नानुभूयते इति भावः ॥ २७० ॥

तेनाधीतमिति । येन महापुरुषेण आशाः वासनाः पृष्ठतः [illegible] कृत्वा वासनां परित्यज्येत्यर्थः । नैराश्यं निराशताम् अवलम्बितम् [illegible]श्रितं, तेन अधीतं पठितं शास्त्रमिति शेषः । तेन श्रुतं गुरुमु[illegible] [illegible]र्णितं, तेन सर्वम् अनुष्ठेयमित्यर्थः । अनुष्ठितम् आचरितम् ॥ २[illegible]

व । असेवितेश्वरद्वारमदृष्टविरहव्यथम् ।
अनुक्तक्लीववचनं धन्यं कस्यापि जीवनम् ॥ २७२ ॥

न योजनशतं दूरं वाह्यमानस्य तृष्णया ।
सन्तुष्टस्य करप्राप्तेऽप्यर्थे भवति नादरः ॥ २७३ ॥

तदत्रावस्थोचितकार्य्यपरिच्छेदः श्रेयान् ॥

उक्तञ्च, को धर्मो ? भूतदया,
किं सौख्यम् ? अरोगिता जगति जन्तोः ।
कः स्नेहः ? सद्भावः,
किं पाण्डित्यं परिच्छेदः ॥ २७४ ॥

च । परिच्छेदो हि पाण्डित्यं यदापन्ना विपत्तयः ।

असेवितेति । ईश्वरस्य प्रभोः द्वारम् ईश्वरद्वारम् । न सेवितम् असेवितम् ईश्वरद्वारं यत्र तत् । न दृष्टा अनुभूता विरहस्य विच्छेदस्य व्यथा यत्र तत् । न उक्तं प्रयुक्तं क्लीववचनं कातरवाक्यं यत्र तत् । कस्यापि भाग्यवतः इत्यर्थः । जीवनं धन्यं प्रशस्तम् ॥ २७२ ॥

न योजनेति । तृष्णया विषयलालसया वाह्यमानस्य नीयमानस्य योजनशतं बहुव्यवधानमपीत्यर्थः । न दूरम् । सन्तुष्टस्य अल्पेनापि तृप्तस्य, विषयलालसाशून्यस्य इत्यर्थः । करप्राप्ते हस्तस्थितेऽपि अर्थे धने नादरः अनादरः, औदासीन्यमित्यर्थः । भवति ॥ २७३ ॥

तदत्रेति । तत् तस्मात् अत्र विषये अवस्थोचितकार्यपरिच्छेदः, अवस्थया उचितम् योग्यं यत् कार्यं कर्म, तस्य परिच्छेदः निर्द्धारणं श्रेयान् कर्त्तव्यः ।

को धर्म इति । धर्मः कः ? भूतदया, भूतेषु प्राणिषु दया अनुकम्पा । जगति भूमण्डले जन्तोः प्राणिनः किं सौख्यं सुखम् ? अरोगिता नीरोगत्वम् । कः स्नेहः प्रणयः ? सद्भावः अकृत्रिमहृदयता । किं पाण्डित्यं विज्ञता ? परिच्छेदः कार्याकार्यावधारणम् ॥ २७४ ॥

परिच्छेद इति । हि निश्चये यदा प्राणिनां विपत्तयः विपदः

मात्मद्रोही भवति ॥ २६७ ॥

तथा च । धनलुब्धो ह्यसन्तुष्टोऽनियतात्मा जितेन्द्रियः ।

सर्वा एवापदस्तस्य यस्य तुष्टं न मानसम् ॥ २६८ ॥

सर्वाः सम्पत्तयस्तस्य सन्तुष्टं यस्य मानसम् ।

उपानद्गूढपादस्य ननु चर्मावृतेव भूः ॥ २६९ ॥

अपरञ्च । सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम्

कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ॥ २७० ॥

किञ्च । तेनाधीतं, श्रुतन्तेन, तेन सर्वमनुष्ठितम् ।

येनाशाः पृष्ठतः कृत्वा नैराश्यमवलम्बितम् ॥ २७१ ॥

वंशदण्डेन ताडितः प्रबुद्धः अहम् अचिन्तयं चिन्तितवान् ॥ २६७ ॥

धनलुब्ध इति । यस्य मानसम् अन्तःकरणं न तुष्टं परितुष्टं, सर्वा एव आपदः विपत्तयः, संभवन्तीति शेषः । यतः असन्तुष्टः असं(तोषी) तुष्टितो जनः धनलुब्धः धनेषु लोभयुक्तः । अनियतात्मा अस्थिरं चञ्चलं हृदयं यस्य तथाविधः । अजितेन्द्रियः न जितानि इन्द्रियाणि येन सः, तादृशो भवत्येवेति शेषः ॥ २६८ ॥

सर्वा इति । यस्य मानसमन्तःकरणं सन्तुष्टं तस्य सर्वाः सम्पत्तयः सम्पदः सम्भवन्तीति शेषः । उपानद्गूढपादस्य उपानद्भ्यां पादुकाभ्यां गूढौ आवृतौ पादौ चरणौ यस्य तादृशस्य जनस्य भूः पृथिवी चर्मावृतेव चर्माच्छादितेव प्रतिभातीति शेषः ॥ २६९ ॥

सन्तोषेति । सन्तोषामृतेन सन्तोषरूपेणामृतेन तृप्तानां शान्तचेतसां प्रशान्तहृदयानां जनानां यत्सुखं, भवतीति शेषः, धनलुब्धानां धनेषु लोभवताम् अतएव इतश्च इतश्च धावतां जनानां शान्तिसुखं कुतः ? तैस्तत्सुखं नानुभूयते इति भावः ॥ २७० ॥

तेनाधीतमिति । येन महापुरुषेण आशाः वासनाः पृष्ठतः पश्चात् कृत्वा वासनां परित्यज्येत्यर्थः । नैराश्यं निराशताम् अवलम्बितम् आश्रितं, तेन अधीतं पठितं शास्त्रमिति शेषः । तेन श्रुतं गुरुमुखात् आकर्णितं, तेन सर्वम् अनुष्ठेयमित्यर्थः । अनुष्ठितम् आचरितम् ॥ २७१ ॥

च । असेवितेश्वरद्वारमदृष्टविरहव्यथम् ।
अनुक्तक्लीववचनं धन्यं कस्यापि जीवनम् ॥ २७२ ॥

न योजनशतं दूरं वाह्यमानस्य तृष्णया ।
सन्तुष्टस्य करप्राप्तेऽप्यर्थे भवति नादरः ॥ २७३ ॥

तदत्रावस्थोचितकार्य्यपरिच्छेदः श्रेयान् ॥

उक्तञ्च, को धर्मो ? भूतदया,
किं सौख्यम् ? अरोगिता जगति जन्तोः ।
कः स्नेहः ? सद्भावः,
किं पाण्डित्यं परिच्छेदः ॥ २७४ ॥

च । परिच्छेदो हि पाण्डित्यं यदापन्ना विपत्तयः ।

असेवितेति । ईश्वरस्य प्रभोर्द्वारम् ईश्वरद्वारम् । न सेवितम् श्रितम् ईश्वरद्वारं यत्र तत् । न दृष्टा अनुभूता विरहस्य विच्छेदस्य व्यथा यत्र तत् । न उक्तं मनुक्तं क्लीववचनं कातरवाक्यं यत्र तत् । तादृशं कस्यापि जनस्य इत्यर्थः । जीवनं धन्यं प्रशस्तम् ॥ २७२ ॥

न योजनेति । तृष्णया विषयलालसया वाह्यमानस्य नीयमानस्य जनस्य योजनशतं बहुव्यवधानमपीत्यर्थः । न दूरम् । सन्तुष्टस्य सन्तोषावलम्बिनः, विषयलालसाशून्यस्य इत्यर्थः । करप्राप्तेऽपि हस्तस्थितेऽपि अर्थे धने नादरः अनादरः, औदासीन्यमित्यर्थः । इति ॥ २७३ ॥

तदत्रेति । तत् तस्मात् अत्र विषये अवस्थोचितकार्य्यपरिच्छेदः, अवस्थाया उचितम् योग्यं यत्कार्य्यं कर्म, तस्य परिच्छेदः निर्द्धारणं श्रेयान् कर्त्तव्यः ।

को धर्म इति । धर्मः कः ? भूतदया, भूतेषु प्राणिषु दया अनुकम्पा । जगति भूतलोके जन्तोः प्राणिनः किं सौख्यं सुखम् ? अरोगिता नीरोगत्वम् । कः स्नेहः प्रणयः ? सद्भावः अकृत्रिमहृदयता । किं पाण्डित्यं विचक्षणता ? परिच्छेदः कार्य्याकार्य्यनिर्धारणम् ॥ २७४ ॥

परिच्छेद इति । हि निश्चये यदा आपन्नाः समागताः विपत्तयः विपदः

[illegible]

मात्रः ॥ २७६ ॥

पानीयमिति। निरायासम् अक्लेशलब्धं पानीयं जलमपि भयोत्तरं भीतिसङ्कुलं स्वादु सुमिष्टम् अन्नं वा, तदुभयोर्मध्ये निर्वृतिः भयाभावः तत् सुखं सुखसम्पादनम् इति विचार्य पश्यामि अवलोकयामि ॥ २७७ ॥

इतीति। अहम् इति आलोच्य विचिन्त्य यद्वा [illegible] विचार्य। निर्जनं जनशून्यं वनम् [illegible] ॥

[illegible]ति। व्याघ्रखगेन्द्रसेवितं, खगानामिन्द्राः खगेन्द्राः सिं[illegible] [illegible] खगेन्द्राश्च ते व्याघ्रखगेन्द्राः। तैः सेवितम् अधिष्ठितं [illegible] [illegible] वरं श्रेयः इत्यर्थः। द्रुमालयः द्रुमः वृक्षएव आलयः आवा[illegible]

तृणानि शय्या परिधानवल्कलं
न बन्धुमध्ये धनहीनजीवनम् ॥ २७८ ॥

ततोऽस्मत्पुण्योदयादनेन मित्रेणाहं स्नेहादनु-
गृहीतः । अधुना च पुण्यपरम्परया भवदाश्रयः स्वर्ग एव
मया प्राप्तः ॥ २७९ ॥

तः । संसारविषवृक्षस्य द्वे एव मधुरे फले ।
काव्यामृतरसास्वादः सङ्गमः सज्जनैः सह ॥ २८० ॥

अपरञ्च । सङ्गमः केशवे भक्तिर्गङ्गाम्भसि निमज्जनम् ।
असारे खलु संसारे त्रीणि साराणि भावयेत् ॥ २८१ ॥

पानम् । पक्वफलाम्बुभक्षणं पक्वं फलं पक्वफलम् । पक्वफलञ्च अम्बु
अम्बु चेति, तयोर्भक्षणम् । तृणानि शय्या शयनस्थानम् । परिधानवल्कलं
परिधानाय वल्कलं त्वक् । एतत्सर्वं वरं श्रेयः, तथापि बन्धुमध्ये
ज्ञातिमध्ये धनहीनजीवनं, धनैः अर्थैः हीनं विरहितं जीवनं न, श्रेय-
स्करमिति शेषः ॥ २७८ ॥

तत इति । ततः वनवासानन्तरम् अस्मत्पुण्योदयात् अस्माकं
पुण्यस्य उदयात् आविर्भावात् अनेन मित्रेण सुहृदा कर्त्रा स्नेहात्
प्रणयात् स्नेहद्वारेण करणेन अनुगृहीतः अनुकम्पितः । पुण्यपरम्परया
पुण्यसन्तानेन भवदाश्रयः भवताम् आश्रयः स्वर्ग एव निश्चयं मया
प्राप्तः आसादितः ॥ २७९ ॥

संसारेति । संसारविषवृक्षस्य संसाररूपविषमविषमयवृक्षस्य
मध्ये काव्यामृतरसास्वादः काव्यस्य ये अमृतरसाः अमृततुल्याः
नवरसाः तेषाम् आस्वादः स्वादग्रहणम् । सज्जनैः साधुभिः सह सङ्गमः
समागमः, इति द्वे मधुरे अमृततुल्ये फले भवत इति शेषः ॥ २८० ॥

सङ्गम इति । सङ्गमः साधुसमागम इत्यर्थः । केशवे विष्णौ भक्तिः ।
गङ्गाम्भसि गङ्गाजले निमज्जनं स्नानम् । एतानि त्रीणि असारे निःसारे
[illegible] इत्यर्थः । संसारे जगति साराणि वस्तूनि, इति
भावयेत् चिन्तयेत् ॥ २८१ ॥

मित्रलाभः ।

नि पादरजोपमानि गिरिनदीवेगोपमं यौवनं
मायुष्यं जलबिन्दुलोलचपलं फेनोपमं जीवनम् ।
र्मं यो न करोति निश्चलमतिः स्वर्गार्गलोद्घाटनं
श्चात्तापयुतो जरापरिगतः शोकाग्निना दह्यते ॥
ाभिरतिसञ्चयः कृतः, तस्यायं दोषः ।
। उपार्जितानां वित्तानां त्याग एव हि रक्षणं
तडागोदरसंस्थानां परीवाह इवाम्भसाम् ॥ २८३ ॥
अन्यच्च । यदधोऽधः क्षितौ वित्तं निचखान मितम्पचः ।
तदधो निलयं गन्तुं चक्रे पन्थानमग्रतः ॥ २८४ ॥

धनानीति । धनानि पादरजोपमानि पादरजोभिः स
ति उपमा येषाम् एवं विधानि ते । यौवनं यौवनदशा
नं तारुण्यं गिरिनदीवेगोपमं गिरेः पर्वतस्य नदी सरित
वेगेन उपमा यस्य तत् । आयुष्यं मनुष्यता जलबिन्दुलोल
चपलवत् अत्यन्तचञ्चलमित्यर्थः । जीवनं फेनोपमं फेनव
क्षणस्थायीत्यर्थः । ईदृगवस्थायां यो जनः निश्चलमतिः नि
श्चला मतिः बुद्धिर्यस्य तादृशः सन् स्वर्गार्गलोद्घाटनं स्वर्गद्वार
रूपं धर्मं पुण्यकर्मानुष्ठानं न करोति, स जनः जरापरिगतः जी
र्णेन्द्रियः सन् पश्चात्तापयुतः पश्चात्तापेन व्याकुलीकृतः शो
ना शोकवह्निना दह्यते तप्यते ॥ २८२ ॥

उपार्जितानामिति । तडागोदरसंस्थानां तडागगर्भमध्यस्थि
म्भसां जलानां परीवाहः प्रवाह इव उपार्जितानां सञ्चितानां वित्त
नां त्यागः सत्पात्रे प्रतिपादनमेव रक्षणं रक्षा इत्यर्थः ॥ २८३ ॥

यदध इति । मितम् अत्यल्पमन्नं पचति भुनक्ति इति मितम्
पचः । क्षितौ पृथिव्याम् अधोऽधः निम्नप्रदेशे यत् वित्तं धनं निच
खानितवान् तत् अधोनिलयं नरकमित्यर्थः । गन्तुं प्रवेष्टुम् प
२८४ ॥

निजसौख्यं निरुन्धानो यो धनार्जनमिच्छति ।
परार्थं भारवाहीव क्लेशस्यैव हि भाजनम् ॥ २८५ ॥

अन्यच्चोक्तम् । दानोपभोगहीनेन धनेन धनिनो यदि ।
भवामः किं न तेनैव धनेन धनिनो वयम् ॥ पृथ्वीखातनिखातेन धनेन धनिनो वयम् ॥ २८६ ॥

दानभोगविहीनाश्च दिवसा यान्ति यस्य वै ।
स कर्म्मकारभस्त्रेव श्वसन्नपि न जीवति ॥ २८७ ॥

धनेन किं? यो न ददाति नाश्नुते,
बलेन किं? यश्च रिपून् न बाधते ।

निजसौख्यमिति । यो मनुष्यः निजसौख्यम् आत्मसुखं निरुन्धानः रुन्धन्, आत्मसुखप्रतिरोधेनेत्यर्थः । धनार्ज्जनं धनोपार्ज्जनम् इच्छति अभिलषति । परार्थम् अन्यजननिमित्तं भारवाही भारं वहति देशान्तरं नयति योऽसौ, स इव, हि निश्चये स मनुष्यः केवलं क्लेशस्य धनार्ज्जनादिकष्टस्य भाजनं पात्रम् ॥ २८५ ॥

दानोपभोगेति । दानोपभोगहीनेन । दानञ्च उपभोगश्च ताभ्याम् हीनेन । उपार्ज्जितधनस्य पात्रेषु प्रतिपादनं दानम् । इन्द्रियादिभिः उपभोगः । तद्रहितेनेत्यर्थः । धनेन यदि धनिनः धनवन्तः, मनुष्या भवेयुः । तदा वयं पृथ्वीखातनिखातेन धरणीगर्भे गोपितेन धनेन धनिनः धनशालिनः ॥ २८६ ॥

दानोपभोगहीना इति । यस्य, दानोपभोगहीनाः दानञ्च उपभोगश्च ताभ्यां हीना रहिता दिवसा यान्ति गच्छन्ति, कर्म्मकारभस्त्रा कर्म्मकारस्य लौहकारस्य भस्त्रा वह्निप्रज्वालनार्थचर्म्मनिर्म्मितवायुयन्त्रविशेष इव स जनः श्वसन् अपि निश्वसन् अपि न जीवति मृतवत् इत्यर्थः ॥ २८७ ॥

धनेनेति । यो जनः न ददाति न पात्रेषु प्रयच्छति, न अश्नुते भुनक्ति, तस्य धनेन किम् । व्यर्थेन किं प्रयोजनमित्यर्थः । यो जनः रिपून् शत्रून् न बाधते न पराजयते तस्य बलेन सामर्थ्येन किं? किं प्रयोजनमित्यर्थः । यो मनुष्यः धर्म्मं पुण्यकर्म्म न आचरेत् अनुतिष्ठेत् तस्य

श्रुतेन किं? यो न च धर्ममाचरेत्
किमात्मना? यो न जितेन्द्रियो भवेत् ॥ १८८

अन्यच्च। असम्भोगेन सामान्यं कृपणस्य धनं परैः।
अस्येदमिति सम्बन्धो हानौ दुःखेन गम्यते ॥ १८

अपि च। न देवाय न विप्राय न बन्धुभ्यो न चात्मने
कृपणस्य धनं याति वह्नितस्करपार्थिवैः ॥ १९

अन्यच्च। दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्त
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥ १

श्रुतेन शास्त्राध्ययनेन किम्। यो मनुष्यः जितेन्द्रियः जितानि
यानि विषयसम्भोगसाधनचक्षुःकर्णप्रभृतीनि येन, तादृशो न भवेत्,
आत्मना अन्तःकरणेन किं, एतत् सर्वमकिञ्चित्करमित्यर्थः ॥ २८८।

असम्भोगेनेति। कृपणस्य व्ययकातरजनस्य धनं परैः परैः
असम्भोगेन सम्भोगाभावेन हेतुना सामान्यं साधारणं तुल्यमित्य
दानोपभोगविरहितधने तद्धनस्वामिनः कृपणस्य यथा अधिकारः,
स्यापि तथा अधिकारोऽस्त्येव। परन्तु हानौ तद्धननाशे दु
स्वामिनः कृपणस्य दुःखानुभवेन करणेन, अस्य जनस्य इदं धनम्
सम्बन्धः धनाधिकारित्वसम्बन्धः गम्यते ज्ञायते, लोकैरिति
कृपणो धनेन न सुखमनुभवति प्रत्युत धनहानौ दुःखमनुभवती
भावः ॥ २८९ ॥

न देवायेति। कृपणस्य व्ययकुण्ठस्य जनस्य धनं न देवा
देवतानिमित्तं, न विप्राय न ब्राह्मणनिमित्तं, न बन्धुभ्यः न बन्धु
निमित्तं, न चात्मने न च आत्मपोषणनिमित्तं याति हस्तान्तरं गच्छ
त्यर्थः। परन्तु वह्नितस्करपार्थिवैः वह्निश्च तस्करश्च पार्थिवश्च
द्वन्द्वसमासः। ह्रियते इति शेषः ॥ २९० ॥

दानमिति। दानं वितरणं, भोगः उपभोगः, नाशः ध्वंसः, वि
धनस्य इति तिस्रः त्रिविधाः गतयः अवस्था भवति। यो जन
ददाति न पात्रेभ्यः प्रयच्छति, न भुङ्क्ते, तस्य जनस्य सम्बन्धे तृती

तथा चोक्तम् ।

दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम् ।
त्यागसहितं वित्तं दुर्लभमेतच्चतुर्भद्रम् ॥ २८२ ॥

अन्यच्च । कर्त्तव्यः सञ्चयो नित्यं कर्त्तव्यो नातिसञ्चयः ।
अतिसञ्चयदोषेण धनुषा जम्बुको हतः ॥ २८३ ॥

हिरण्यकोऽब्रवीत्, 'कथमेतत्?' मन्थरः कथयति
आसीत् कल्याणकटकवास्तव्यो भैरवो नाम व्याधः । स
चैकदा मांसलुब्धः धनुरादाय विन्ध्याटवीमध्यं गतः ।
तत्र तेन मृग एको व्यापादितः । मृगमादाय गच्छता
तेन घोराकृतिः शूकरो दृष्टः । ततस्तेन मृगं भूमौ निधाय

...तेः तद्वत्स्य नाम इत्यर्थः । भवति ॥ २८१ ॥

दानं प्रियवागिति । प्रियवाक्सहितं प्रियया वाचा सहितं मधुर-
वचनसमेतमित्यर्थः । दानं वितरणम् । अगर्वं नास्ति गर्वः अहङ्कारो
यत्र तादृशं ज्ञानं आत्मावबोधः । क्षमान्वितं क्षमागुणसमेतं शौर्यं
...रत्वम् । त्यागसहितं वदान्यतासंयुक्तं वित्तमैश्वर्यम्, एतत् चतुर्भद्रं
चतुर्णां भद्राणां समाहारः । कल्याणकरचतुष्टयमित्यर्थः । दुर्लभं जगति
दुष्प्रापम् ॥ २८२ ॥

कर्त्तव्य इति । नित्यं प्रतिदिनं सञ्चयः धनसंस्थापनं कर्त्तव्यः
एव । परन्तु अतिसञ्चयः न कर्त्तव्यः । तथाहि जम्बुकः शृगालः
अतिसञ्चयदोषेण अत्यधिकसञ्चयापराधेन धनुषा चापेन करणेन हतः
पञ्चत्वमापन्नः ॥ २८३ ॥

हिरण्यक इति । कल्याणकटकं तदाख्यकं स्थानं वास्तव्यं वास-
स्थानं यस्य सः । मांसलुब्धः मांसेषु पिशितेषु लुब्धः लोभयुक्तः लोलुप
इत्यर्थः । धनुः शरासनम् आदाय गृहीत्वा । विन्ध्यस्य विन्ध्यपर्वतस्य
अटवी अरण्यं तस्य मध्यं गतः प्रविष्टः । तत्र विन्ध्याटवीमध्ये तेन
व्याधेन एको मृगः व्यापादितः मारितः । मृगं हरिणम् आदाय
गृहीत्वा गच्छता व्रजता तेन घोराकृतिः भयङ्करा आकृतिः

शूकरः गदेन हतः। शूकरेणाघातेन व्याधस्य गर्भ्ये पृष्ठे दंष्ट्राग्रेण ॥ आघातो भुवस्तले छिन्नमूल इव द्रुमः
पपात ॥ १८३ ॥

यतः, जलमग्निर्विषं शस्त्रं क्षुद्व्याधिः पतनं गिरेः।

निमित्तं किञ्चिदासाद्य देही प्राणैर्विमुच्यते ॥१८४॥

अथ तयोः पादास्फालनेन सर्पोऽपि मृतः। अत्र दीर्घरावो नाम जम्बुकः परिभ्रमन्नाहारार्थी तान् मृगव्याधसर्पशूकरान् अपश्यत्। आलोक्याचिन्तयत्
"अहो भाग्यं, महद्भोज्यं समुपस्थितम् ॥ १८६ ॥

घोरारो वज्र वा। शूकरः रराज। इत्थं सर्वोऽपि।
इत्थं भूमौ धनुषि निधाय संध्याय शरेण बाणेन शूकरः हतः
दिशः। आगम्य आगम्य मण्डलमण्डलोरवगर्जनं मण्डल दंष्ट्रा
तस्य भेदस्य इव घोरं भीषणं गर्जनं कुर्वाणेन कृतेन आघातः
देहे कृतः शाङ्गिनः धनुः, छिन्नमूल. द्रुमः वृक्षः इव भूमौ
पपात भूतले व्याधः शायकः ॥ २८३ ॥

जलमिति। जलं सलिलम्, अग्निः वह्निः, विषं गरलं
शस्त्रं खड्गादिकं, क्षुत् क्षुधा, व्याधिः पीड़ा, गिरेः पर्वतस्य
सर्वतः पतनम्, गिरिपतनोऽप्य शब्दादिरपि मरणम्। किं
किञ्चित् निमित्तं कारणम् आसाद्य देही प्राणी प्राणैः जीवनेन
परिहीयते ॥ २८५ ॥

अथेति। अथ अनन्तरं तयोः व्याधशूकरयोः पादास्फालनं
पादानां चरणानाम् आस्फालनेन आलोड़नेन सर्पोऽपि
भुजङ्गमोऽपि मृतः पञ्चत्वं प्राप्तः। दीर्घः गुरुतरः रावः शब्दो यस्य
दीर्घरावः। परिभ्रमन् विचरन्, आहारार्थी आहारं भोजनम् अर्थ
अन्विच्छति यः सः। मृतान् गतासून् मृगव्याधसर्पशूकरान्
अपश्यत् ऐक्षत। आलोक्य दृष्ट्वा अचिन्तयत् चिन्तयामास। अहो! आश्चर्यं भाग्यं सौभाग्यं!

अथवा, अचिन्तितानि दुःखानि यथैवायान्ति देहिनाम् ।
सुखान्यपि तथा मन्ये दैवमत्रातिरिच्यते ॥ २८७ ॥

किन्तु, एषां मांसैर्मासत्रयं समधिकं भोजनं मे भविष्यति ।

मासमेकं नरो याति द्वौ मासौ मृगशूकरौ ।
अहिरेकं दिनं याति अद्य भक्ष्यो धनुर्गुणः ॥२८८॥

ततः प्रथमबुभुक्षायामिदं निःस्वादु कोदण्डाटनीलग्न-स्नायुबन्धनं खादामि ।" इत्युक्त्वा तथाकरोत् । ततश्छिन्ने स्नायुबन्धने द्रुतमुत्पतितेन धनुषा हृदि भिन्नः स दीर्घरावः पञ्चत्वं गतः । अतोऽहं ब्रवीमि कर्तव्यः सञ्चयो नित्यम् इत्यादि ॥ २८९ ॥

[illegible] ॥ २८६ ॥

[illegible] ॥ २८७ ॥

[illegible] ॥ २८८ ॥

[illegible]

नाशश्च, यद्ददाति यदश्नाति तदेव धनिनो धनम् ।
अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि ॥

किञ्च, यद्ददासि विशिष्टेभ्यो यच्चाश्नासि दिने दिने ।
तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि ॥

तद्विद्यताँ यातु किमतिक्रान्तोपवर्णनेन ।

यतः, नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।
आपत्स्वपि न मुह्यन्ति नराः पण्डितबुद्धयः ॥

तत् सखे ! सर्वदा त्वया सोत्साहेन भवितव्यम् ।

यतः, शास्त्राण्यधीत्यापि भवन्ति मूर्खा
यस्तु क्रियावान् पुरुषः स विद्वान् ।

विदारित आकृष्टो वा । स दुर्भेदः स्वतन्त्रं गतः नाशः ॥ ९९ ॥

यद्ददातीति । यत् धनं ददाति संप्रयच्छति, यत् अश्नाति, भुनक्ति, धनिनः धनवतामितः तस्यैव तदेव धनम् । यतः अन्ये मृतस्य मनुष्यस्य दारैः भार्याभिः अपि धनैश्वर्यैरपि क्रीडन्ति । आत्मं कुर्वन्ति ॥ १०० ॥

यद्ददासीति । यत् धनं विशिष्टेभ्यः सत्पात्रेभ्यः ददासि, यत् भक्ष्यम् स्वयम् दिने दिने प्रतिदिनम् अश्नासि, तत् वित्तं धनम् इत्यहं मन्ये विचिन्तोमि । शेषं रक्षसि कस्यापि जनस्य । भोगायेति शेषः । रक्षसि संस्थापयसि ॥ १०१ ॥

तदिति । यातु गच्छतु । अतिक्रान्तोपवर्णनेन अतिक्रान्तस्य गतस्य उपवर्णनं कीर्त्तनं तेन किम् ॥

नाप्राप्यमिति । पण्डितबुद्धयः परिपक्वबुद्धियुक्ताः अप्राप्यम् अलभ्यं वस्तु न अभिवाञ्छन्ति न अभिलषन्ति । नष्टं ध्वस्तं वा द्रव्यं शोचितुं न इच्छन्ति । तथा आपत्सु विपत्तिसमये न मुह्यन्ति मुग्धा भवन्ति ॥ १०२ ॥

तदिति । उत्साहेन सह वर्त्तमानः सोत्साहः, तेन ॥

शास्त्राण्यधीति । शास्त्राणि वेदपुराणादीनि अधीत्यापि पठि

सुचिन्तितं चौषधमातुराणां
न नाममात्रेण करोत्यरोगम् ॥ २०३ ॥

च, न स्वल्पमप्यध्यवसायभीरोः
करोति विज्ञानविधिर्गुणं हि ।
अन्धस्य किं हस्ततलस्थितोऽपि
प्रकाशयत्यर्थमिह प्रदीपः ॥ २०४ ॥

तदत्र सखे ! दशाविशेषेण शान्तिः करणीया ।

सुखमापतितं सेवेत् दुःखमापतितं वहेत् ।
चक्रवत् परिवर्त्तन्ते दुःखानि च सुखानि च ॥२०५॥

[illegible] कार्याकार्यविवेकशून्या भवन्ति । यः पुरुषः क्रियावान् शास्त्रो-[illegible]क्तानुष्ठानसम्पन्नः सः विद्वान् विद्यासम्पन्नः । तथाहि सुचिन्तितं [illegible]चारितम् औषधं भैषज्यं नाममात्रेण नामोच्चारणमात्रेण आतुराणां [illegible]भिभूतानां न अरोगम् आरोग्यं करोति ॥ २०३ ॥

न स्वल्पमिति । विशेषेण ज्ञायते अनेन इति विज्ञानं शास्त्रम् । विधिः विधानम् उपदेश इति यावत् । अध्यवसायभीरोः अध्यव[illegible]पराङ्मुखस्य अनुष्ठानविमुखस्येत्यर्थः । जनस्य सम्बन्धे स्वल्पमपि [illegible]ल्पपरिमाणमपि गुणप्रकारं न करोति साधयति । तथाहि इहलोके [illegible]धस्य लोचनरहितस्य हस्ततलस्थितः, हस्तस्य तलं हस्ततलं तत्र [illegible]तः, करतलस्थित इत्यर्थः । अपि प्रदीपः, प्रदीप्यते प्रकाश्यते अर्था [illegible]नेनेति प्रदीपः प्रज्वलितवर्तिकादि । किम् अर्थं द्रव्यं प्रकाशयति ? [illegible]पः दर्शनशक्तिविहीनस्य न पदार्थदर्शको भवति इति भावः ॥२०४॥

तदत्रेति । अत्र ईदृशस्यायां दशाविशेषेण अवस्थान्तरेण [illegible]नभिमता इति शेषः । शान्तिः आत्मैर्यप्रयत्नः करणीया विधेया भवि-[illegible]ता अवस्थान्तरेण तु दुःखशान्तिर्भविष्यतीति भावः ॥

सुखमिति । आपतितम् उपस्थितं सुखं सेवेत् अनासक्तहृदयो [illegible]त्वा भुञ्जीत इति भावः । आपतितं दुःखं क्षेमं वहेत्, अनुद्विग्नहृदयो [illegible]त्वा धारयेत् इति भावः [illegible] हि [illegible] दुःखानि च सुखानि

अपरञ्च,

निपानमिव मण्डूकाः सरः पूर्णमिवाण्डजाः।
सोद्योगं नरमायान्ति, विवशाः सर्व्वसम्पदः ॥१८

अपि च, उत्साहसम्पन्नमदीर्घसूत्रं
क्रियाविधिज्ञं व्यसनेष्वसक्तम्।
शूरं कृतज्ञं दृढ़सौहृदञ्च
लक्ष्मीः स्वयं याति निवासहेतोः ॥ १९

विशेषतश्च,

विनाप्यर्थैर्धीरः स्पृशति बहुमानोन्नतिपदं,
समायुक्तोऽप्यर्थैः परिभवपदं याति कृपणः।

स्वभावादुद्भूतां गुणसमुदयावाप्तिविषयां
द्युतिं सैंहीं किं श्वा धृतकनकमालोऽपि लभते ? ॥२०८॥

किञ्च,

धनवानिति हि मदस्ते किं गतविभवो विषादमुपयासि ?।
करनिहितकन्दुकसमाः पातोत्पाता मनुष्याणाम् ॥२०९॥

अपरञ्च, अभ्रच्छाया, खलप्रीतिर्नवशस्यानि, योषितः।
किञ्चित्कालोपभोग्यानि यौवनानि धनानि च ॥२१०॥

अन्यच्च, वृत्त्यर्थं नातिचेष्टेत सा हि धात्रैव निर्मिता।
गर्भादुत्पतिते जन्तौ मातुः प्रस्रवतः स्तनौ ॥२११॥

स्वभावात् प्रकृतितः उद्भूतां जातां गुणसमुदयावाप्तिविषयां गुणसमुदयस्य गुणसमूहस्य अवाप्तिः प्राप्तिर्विषयो गोचरीभूताम्। सैंहीं सिंहसम्बन्धिनीं द्युतिं दीप्तिं, धृतकनकमालः धृता गले [illegible] कनकमाला स्वर्णमाल्यं येन तादृशः श्वा कुक्कुरः किं लभते प्राप्नोति ; धृतस्वर्णस्रगोऽपि सारमेयः सिंहस्य प्राकृतिकसौन्दर्यं न लभते इति तात्पर्यम् ॥२०८॥

धनवान् इति। त्वं धनवान् विभवशाली, इति हेतोः ते तव किं किमर्थं मदः गर्वः ? पुनः गतविभवः धनहीनः सन् किमर्थं विषादं खिन्नताम् उपयासि प्राप्नोषि। यस्माद्धि मनुष्याणां पातोत्पाताः [illegible]। करनिहितकन्दुकसमाः [illegible] इति भावः ॥२०९॥

अभ्रच्छायेति। अभ्रच्छाया अभ्रस्य मेघस्य छाया [illegible]। खलप्रीतिः खलानां दुर्जनानां प्रीतिः प्रणयः। नवशस्यानि [illegible]। योषितः स्त्रियः। यौवनानि यौवनावस्थाः धनानि [illegible]। एतानि सर्वाणि किञ्चित्कालोपभोग्यानि [illegible] ॥२१०॥

वृत्त्यर्थमिति। वृत्त्यर्थं [illegible] न अतिचेष्टेत न [illegible]। हि यतः सा [illegible] धात्रा [illegible]

अपरञ्च,

निपानमिव मण्डूकाः सरः पूर्णमिवाण्डजाः।
सोद्योगं नरमायान्ति, विवशाः सर्व्वसम्पदः॥२०६॥

अपि च, उत्साहसम्पन्नमदीर्घसूत्रं
क्रियाविधिज्ञं व्यसनेष्वसक्तम्।
शूरं कृतज्ञं दृढ़सौहृदञ्च
लक्ष्मीः स्वयं याति निवासहेतोः॥२०७॥

विशेषतश्च,

विनाप्यर्थैर्धीरः स्पृशति बहुमानोन्नतिपदं,
समायुक्तोऽप्यर्थैः परिभवपदं याति कृपणः।

परिवर्त्तन्ते पुनः पुनर्यातायातं कुर्व्वन्ति। सुखस्यानन्तरं दुःखं दु[ःखस्या]नन्तरं सुखम् इति तात्पर्य्यम्॥२०५॥

निपानमिति। मण्डूकाः भेकाः निपानं सञ्चसलिलं स[रः] अण्डजाः जलचराः पक्षिणः पूर्णं सरः सरोवरमिव। सर्व्वसम्पदः [सर्वाः] सम्पत्तयः विवशा अनायत्ताः सत्यः सोद्योगम् उद्योगिनं पु[रुषम्] आयान्ति गच्छन्ति॥२०६॥

उत्साहसम्पन्नमिति। लक्ष्मीः कमला, निवासहेतोः व्वा[स]स्थानम्(?) आत्मवेश्यैव उत्साहसम्पन्नमुद्योगिनम्, अदीर्घसूत्रं कार्य्य[दक्षं] क्रियाविधिज्ञं क्रियायाः विधिं विधानं जानाति यः सः तम्। अ[...] स्त्रीद्यूतमद्यपानादिषु असक्तम् अनासक्तं, शूरं शौर्य्यशालिनं, [कृतज्ञं] कृतज्ञतायुक्तं, दृढ़सौहृदं दृढं स्थिरं सौहृदं सौहार्द्दं यस्य [तं] पुरुषं याति प्राप्नोति॥२०७॥

विनेति। धीरः पण्डितः अर्थैः धनैर्विना व्यतिरेकेण बहु[मानेन] [उ]न्नतिपदं बहुमानेन सम्मानेन सह उन्नतिपदम् उच्चपदं स्पृशति प्र[ाप्नोति], कृपणः मूर्खः अर्थैः विभवैः समायुक्तोऽपि धनसम्पन्नोऽपीत्यर्थः। [परि]भवपदं पराभवं याति गच्छति, अनादरभाजनं भवतीत्यर्थः। त[...]

स्वभावादुद्भूतां गुणसमुदयावाप्तिविषयां
द्युतिं सैंहीं किं श्वा धृतकनकमालोऽपि लभते ? ॥२०८॥

किञ्च,

धनवानिति हि मदस्ते किं गतविभवो विषादमुपयासि ? ।
करनिहतकन्दुकसमाः पातोत्पाता मनुष्याणाम् ॥२०९॥

अपरञ्च, अभ्रच्छाया, खलप्रीतिर्नवसस्यानि, योषितः ।
किञ्चित्कालोपभोग्यानि यौवनानि धनानि च ॥२१०॥

अन्यच्च, वृत्त्यर्थं नातिचेष्टेत सा हि धात्रैव निर्मिता ।
गर्भादुत्पतिते जन्तौ मातुः प्रस्रवतः स्तनौ ॥२११॥

स्वभावात् प्रकृतितः उद्भूतां जातां गुणसमुदयावाप्तिविषयां गुणसमुदयस्य गुणसमूहस्य अवाप्तिः प्राप्तिर्विषयो गोचरीभूताम् । सैंहीं सिंहसम्बन्धिनीं द्युतिं दीप्तिं, धृतकनकमालः धृता गले स्थापिता कनकमाला सुवर्णमाल्यं येन तादृशः श्वा कुक्कुरः किं लभते प्राप्नोति ; सुवर्णालङ्कृतोऽपि सारमेयः सिंहस्य स्वाभाविकसौन्दर्यं न लभते इति तात्पर्यम् ॥२०८॥

धनवानिति । त्वं धनवान् विभवशाली, इति हेतोः ते तव किं किमर्थं मदः गर्वः ? पुनः गतविभवः धनहीनः सन् किमर्थं विषादं खेदम् उपयासि प्राप्नोषि । यतो हि मनुष्याणां पातोत्पाताः पतनोत्थानानि करनिहतकन्दुकसमाः हस्ताहतकन्दुकैः तुल्याः इति भावः ॥२०९॥

अभ्रच्छायेति । अभ्रच्छाया मेघानां छाया, खलप्रीतिः खलानां दुर्जनानां प्रीतिः प्रणयः । नवसस्यानि नवशस्यानि । योषितः स्त्रियः । यौवनानि यौवनावस्थाः धनानि च । एतानि सर्वाणि किञ्चित्कालोपभोग्यानि अल्पकालम् उपभोग्यानि ॥२१०॥

वृत्त्यर्थमिति । वृत्त्यर्थं जीविकानिमित्तं न अतिचेष्टेत न अत्यन्तम् आयासं कुर्यात् । हि यतः सा वृत्तिः धात्रैव विधात्रैव निर्मिता ।

सखे ! शृणु । येन शुक्लीकृता हंसाः शुकाश्च हरितीकृ[ताः ।]
मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति ॥ ११[६]

अपरञ्च सतां रहस्यं शृणु, मित्र !

जनयन्त्यर्जने दुःखं तापयन्ति विपत्तिषु ।
मोहयन्ति च सम्पत्तौ कथमर्थाः सुखावहाः? ॥१[१७]

अपरञ्च, धर्म्मार्थं यस्य वित्तेहा वरं तस्य निरीहता ।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥ ११[८]

विधात्रैव निर्म्मिता, पूर्व्वं निरूपिता । एतदेव द्रढयति । जन्मो
गर्भात् मातृकुक्षेः पतिते निःसृते जाते इत्यर्थः । मातुः जन
स्तनौ कुचयुगलं प्रस्रवतः बालकरक्षार्थं दुग्धं क्षरत इत्यर्थः ॥ ११[५]

येनेति । येन विधात्रा हंसाः जलचरपक्षिविशेषाः शु[क्ली]
शुभ्रवर्णाः कृताः । येन शुकाः कीराः हरितीकृताः हरिद्वर्णाः कृ[ताः]
येन मयूराः शिखण्डिनः चित्रिताः नानावर्णाः कृताः । सः वि[धाता]
इत्यर्थः । ते तव वृत्तिं जीविकां विधास्यति सम्पादयिष्यति ॥ १[१६]

सतां साधूनां रहस्यम् अप्रचारितवचनम् ॥

जनयन्तीति । अर्थाः धनानि कथं केन प्रकारेण सुखा[वहाः]
सुखसम्पादकाः । धनेन न कोऽपि सुखी भवतीत्यर्थः । यतः ध[नानि]
अर्जने दुःखं क्लेशं जनयन्ति उत्पादयन्ति । अथ[...]
[illegible]
[illegible]
[illegible] ॥ ११७ ॥

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥ ११८ ॥

अतः, यथा ह्यामिषमाकाशे पक्षिभिः श्वापदैर्भुवि ।
भक्ष्यते सलिले मत्स्यैस्तथा सर्वत्र वित्तवान् ॥२१५॥

अन्यच्च, राजतः सलिलादग्नेश्चौरतः स्वजनादपि ।
भयमर्थवतां नित्यं मृत्योः प्राणभृतामिव ॥ २१६ ॥

तथा हि,

जन्मनि क्लेशबहुले किन्नु दुःखमतः परम् ।
इच्छासम्पद् यतो नास्ति यच्चेच्छा न निवर्त्तते ॥२१७॥

अन्यच्च भ्रातः ! शृणु,

धनं तावदसुलभं लब्धं कृच्छ्रेण पाल्यते ।
लब्धनाशो यथा मृत्युस्तस्मादेतन्न चिन्तयेत् ॥ २१८ ॥

यथेति । यथा आमिषं मीनादिभक्ष्यद्रव्यम्, आकाशे गगने पक्षिभिः पतत्त्रिभिः, भुवि भूतले श्वापदैः हिंस्रजन्तुभिः, सलिले जलमध्ये मत्स्यैः पाठीनादिभिः, भक्ष्यते खाद्यते, तथा वित्तवान् धनवान् सर्वत्र खाद्यते इति शेषः ॥ २१५ ॥

राजत इति । प्राणभृतां प्राणिनां मृत्योः मरणादिव, अर्थवतां धनिनां राजतः भूपालात्, सलिलात् जलात्, अग्नेः वह्नेः, चौरतः अपहारकात्, स्वजनात् भ्रात्रादेः भयं भीतिः नित्यं नियतं भवतीति शेषः ॥ २१६ ॥

जन्मनीति । नु भोः ! क्लेशबहुले दुःखबहुले जन्मनि शरीरपरिग्रहे अतः परं किं दुःखम् ? यतः जन्मनः, संसारादित्यर्थः । इच्छासम्पत् इच्छायाः पूर्णता नास्ति । यत्र इच्छा न निवर्तते न परिहृता प्रत्यावर्तते ॥ २१७ ॥

धनमिति । तावत् प्राक्तावदादौ धनम् असुलभं दुर्लभम् । लब्धं चेत् कृच्छ्रेण क्लेशेन पाल्यते रक्ष्यते । लब्धनाशः लब्धस्य धनस्य नाशः यथा मृत्युः, मृत्युरिव क्लेशजनक इत्यर्थः । तस्मात् कारणात् एतत् धनं न चिन्तयेत् नाभिलषेदित्यर्थः ॥ २१८ ॥

सा तृष्णा चेत् परित्यक्ता को दरिद्रः? क ईश्वरः।
तस्याश्चेत् प्रसरो दत्तो दास्यञ्च शिरसि स्थितम् ॥१२

अपरञ्च,

यद्यदेव हि वाञ्छेत ततो वाञ्छा प्रवर्त्तते।
प्राप्त एवार्थतः सोऽर्थो यतो वाञ्छा निवर्त्तते ॥

किं बहुना, विस्रम्भालापैः मयैव सहात्र कालो नीयताम्।
यतः, आमरणान्ताः प्रणयाः, कोपास्तत्क्षणभङ्गुराः।
परित्यागाश्च निःसङ्गा भवन्ति हि महात्मनाम् ॥

इति श्रुत्वा लघुपतनको ब्रूते, "धन्योऽसि हिरण्यक! श्लाघनीयोऽसि।

सा तृष्णेति। चेत् यदि सा तृष्णा धनपिपासा परित्यक्ता, दरिद्रः दीनः कः, ईश्वरः प्रभुः कः। सर्वे एव तुल्या भवन्ति। चेत् यदि तस्याः तृष्णायाः प्रसरः प्रवेशावकाशः प्रश्रय इत्यर्थः, तदा दास्यं दासवृत्तिः, शिरसि मस्तके स्थितम् आरूढम् ॥ १२

यद् यदेवेति। हि निश्चये यद् यद् वस्तु वाञ्छेत अभि[लषेत्] मानव इति शेषः॥ ततः वस्तुनः वाञ्छा प्राप्त्यभिलाषः। [प्र]वृत्ता भवति। यतो वस्तुनः वाञ्छा प्राप्तिलालसा निवर्त्तते अर्थतः फलतः प्राप्त एव। प्राप्तिलालसाचरितार्थता ए[व] कारणम् ॥ १२०॥

विस्रम्भालापैः रहस्यकथोपकथनैः। नीयतां याप्यताम्।

आमरणान्ता इति। महात्मनां महानुभावानां प्रणयाः [प्रे]माणः मरणकालपर्यन्तस्थायिनः। कोपाः क्रोधाः तत्क्षण[भङ्गु]राः क्षण एव भङ्गुरशीलाः। परित्यागाः विषयत्यागाः च [निःसङ्गाः] निःस्पृहभावयुक्ताः, न तु पुनिराकरणेच्छवः इत्यर्थः।

अथवा॥

अथवोच्यते।

यतः, सन्त एव सतां नित्यमापदुद्धरणक्षमाः ।
गजानां पङ्कमग्नानां गजा एव धुरन्धराः ॥२२२॥

तथा च,

गुणिनि गुणज्ञो रमते नागुणशीलस्य गुणिनि परितोषः।
अलिरेति वनात् कमलं न तु भेकस्त्वेकवासोऽपि ॥ २२३ ॥

अपरञ्च,
श्लाघ्यः स एको भुवि मानवानां
स उत्तमः सत्पुरुषः स धन्यः ।
यस्यार्थिनो वा शरणागता वा
नाशाविभिन्ना विमुखाः प्रयान्ति ॥"२२४॥

तदेवं ते स्वेच्छाहारविहारं कुर्व्वाणाः सन्तुष्टाः सुखं

सन्त इति । सन्तः साधवः एव नित्यं नियतं सतां साधूनाम् आपदुद्धरणक्षमाः आपदां विपदाम् उद्धरणे अपनयने क्षमाः समर्थाः। तथाहि, पङ्कमग्नानां पङ्के कर्द्दमे मग्नानां मोचितपदानां गजानां हस्तिनां सम्बन्धे गजा एव धुरन्धराः भारवहनसमर्थाः, उद्धारक्षमा इत्यर्थः ॥ २२२ ॥

गुणिनीति। गुणज्ञः गुणग्राही जनः गुणिनि गुणवति जने रमते अनुरक्तो भवति । अगुणशीलस्य निर्गुणप्रकृतेर्जनस्य गुणिनि गुणशालिजने न परितोषः, न सन्तोषः इत्यर्थः । अलिः द्विरेफः । गुणशील इति भावः । वनात् अरण्यात् । दूरतरप्रदेशात् इति तात्पर्य्यम् । कमलं पद्मम् एति गच्छति । तु किन्तु भेकः मण्डूकः । एकवासोऽपि एकः समानः वासः यस्य, एकस्थानस्थितोऽपीत्यर्थः । न, एतीति शेषः ॥ २२३ ॥

श्लाघ्य इति । यस्य जनस्य सम्बन्धे अर्थिनो याचकाः, वा शरणागताः शरणापन्ना वा आशाविभिन्नाः आशाभिः प्रत्याशाभिः विभिन्नाः [illegible]भन्नाः, भग्नमनोरथा इत्यर्थः । अतएव विमुखाः पराङ्मुखाः न [illegible]यदाचित्, एकः स मनुष्यः भुवि पृथिव्यां मा[illegible] मध्ये श्लाघ्यः । स [illegible]: शेषः : स [illegible] धीचरितः॥२२४॥

[illegible]सारः । स्वेच्छया

अथ मन्थरो ब्रूते, "सखे ! स्वर्ण ! केन त्रासितो अस्मिन् निर्जने वने कदाचित् किं व्याधाः सञ्चरन्ति" मृगेणोक्तम् । "अस्ति कलिङ्गविषये रुक्माङ्गदो नृपतिः । स च दिग्विजयक्रमेणागत्य चन्द्रभागानदी समावेशितकटको वर्त्तते । प्रातश्च तेनात्रागत्य कर्पूर समीपे भवितव्यम् । इति व्याधानां मुखात् किंव श्रूयते । तदत्रापि प्रातरवस्थानं भयहेतुकमित्या यथा कार्य्यं तथारभ्यताम्" । ११२ ॥

तत् श्रुत्वा कूर्मः सभयमाह, "मित्र ! जलाशया गच्छामि ।" काकमृगावपि उक्तवन्तौ । "मित्र ! एवम हिरण्यको विहस्याब्रवीत्, "पुनर्जलाशये प्राप्ते मन्थ कुशलम् । स्थले गच्छतोऽस्य का विधा ?" ॥ ११३ ॥

यतः, अम्भांसि जलजन्तूनां दुर्गं दुर्गनिवासिनाम् ।
स्वभूमिः श्वापदादीनां राज्ञां सैन्यं परं बलम् ॥

अथेति । त्रासितः उद्वेजितः । निर्जने -जनशून्ये । स चरन्ति । कलिङ्गविषये कलिङ्गदेशे । दिग्विजयक्रमेण दिग्विज चारेण । समावेशितकटकः समावेशितं न्यस्तं कटकं -सेनानिवेशो यः । किंवदन्ती जनश्रुतिः । अवस्थानं स्थितिः । भयहेतुकं कारणम् । आरभ्यताम् अनुष्ठीयताम् ॥ ११२ ॥

तत् श्रुत्वेति ॥ सभयं सचकितम् । जलाशयान्तरम् अन्यत् विहस्य विहस्य । स्थले भूतले, गच्छतः व्रजतः । का वि प्रकारः । जलजन्तुरयं स्थले कथं गमिष्यतीति भावः ॥ ११३ ॥

अम्भांसीति । अम्भांसि जलानि जलजन्तूनां जलचरप्राणि दुर्गं दुर्गनिवासिनां दुर्गस्थभेदानाम् ॥ श्वापदादीनां व्याघ्रादि दीनां स्वभूमिः निजस्थानम् । राज्ञां भूपतीनां सैन्यं सेना, परं बलम् आत्मरक्षणाय समर्थम् ॥ ११४ ॥

सखे! लघुपतनक! अनेनोपदेशेन तथा भविष्यसि।

स्वयं वीक्ष्य यथा वध्वाः पीडितं स्तनकुड्मलम्।

वणिक्पुत्रोऽभवद्दुःखी त्वं तथैव भविष्यसि" ॥२२५॥

त ऊचुः, "कथमेतत्?" हिरण्यकः कथयति "अस्ति

[कान्य]कुब्जविषये राजा वीरसेनो नाम। तेन वीरपुर-

[नाम्नि] नगरे तुङ्गबलो नाम राजपुत्रो युवराजः कृतः।

[स च] महाधनस्तरुणः। एकदा स्वनगरं भ्राम्यन्नतिप्रौढ-

[यौव]नां लावण्यवतीं नाम वणिक्पुत्रवधूम् आलोकया-

[मास]। ततः स्वहर्म्यं गत्वा स्मराकुलितमतिस्तस्याः कृते

[दूतीं] प्रेषितवान् ॥ २२६ ॥　　　　यतः,

[सन्मा]र्गे तावदास्ते प्रभवति पुरुषस्तावदेवेन्द्रियाणां

[लज्जां] तावद्विधत्ते विनयमपि समालम्बते तावदेव।

उपदेशेन परामर्शप्रदानेन। स्वयमिति। वणिक्पुत्रो यथा,
[illegible] वध्वाः स्तनकुड्मलम् अभिनवोद्भिन्नकुचयुगलं पीडितम् आलि-
[illegible] मर्दितं वा स्वयं स्वचक्षुषा वीक्ष्य दृष्ट्वा दुःखी
दुःखितचित्तः अभवत्, त्वं तथैव तादृश एव भविष्यसि ॥ २२५ ॥
त ऊचुरिति। अस्ति प्रभूतं धनं यस्य सः महाधनः, [illegible]
[illegible] तरुणः। भ्राम्यन् विचरन्। अतिप्रौढयौवनाम्, अतिप्रौढं
यौवनं तारुण्यं यस्याः, ताम्। वणिक्पुत्रवधूं, वणिक्पुत्रस्य
[illegible] वधूं भार्याम्। स्वहर्म्यं निजप्रासादम्। स्मराकुलितमतिः,
[illegible] आकुलिता व्याकुलीकृता [illegible] यस्य सः। दूतीं
[illegible] प्रेषितवान् प्रेषयामास ॥ २२६ ॥
सन्मार्गे इति। तावत् [illegible], [illegible]
[illegible], पुरुषः [illegible]
[illegible]
[illegible]

कटाक्षशराः हृदि पतन्ति नैव यावत्

यावदभिमानतोऽत्र न हृदि पतितः इन्द्रियाणा

सापि मायावती तदवलोकनक्षणात्

जरमशरजर्जरितहृदया तदेकचित्ताभवत्।

तथा चोक्तम्,

असत्यं साहसं माया मात्सर्यं चातिलुब्धता

निर्गुणत्वमशौचत्वं स्त्रीणां दोषाः स्वभावजाः

अथ दूतीवचनं श्रुत्वा मायावत्युवाच, "

मता परपुरुषस्पर्शमात्रमपि न करोमि॥ ३५०॥

कटाक्षशराः हृदि हृदये न पतन्ति, कुमारिति शेषः। अ

कामपर्वणि पुरुषः प्रकारेण अवमानुमोदिते यदि कामे

तावदेव इन्द्रियाणां विषादोऽत्र प्रभवति, इन्द्रियेषु प्रभुत्वं

मीत्यर्थः। पुरुष इति अनुवर्त्तते। तावत् लज्जां विधत्ते

तावदेव विनयमपि समालम्बते, विनयसम्पन्नो भवतीत्यर्थः॥ ११

मायेति। तदवलोकनक्षणात् तद्दर्शनकालमारभ्य

जर्जरितहृदया, मदस्य मदनस्य शराणां बाणानां प्रहारेण

जर्जरितं विकृतिमापादितं हृदयं चित्तं यस्याः सा। तदेक

स्मिन् एकम् अनन्यसाधारण्येन स्थितं चित्तं मनो यस्याः सा॥ १

असत्यमिति। असत्यं सत्यनिवाराहित्यं, मिथ्याव्यवहार

र्थः। साहसम् असमीक्ष्यकारिता। तथा चोक्तं "सहसा

यत्किञ्चित् बलदर्पितैः। तत् साहसमिति प्रोक्तं

च्यते॥" इति। माया आपातमधुरमिथ्याप्रपञ्चः। मा

भाग्यासहिष्णुता। अतिलुब्धता महान् लोभः। निर्गु

हीनता। अशौचत्वं कायिकवाचिकमानसिकविशुद्धतारहित

दोषाः स्त्रीणां नारीणां स्वभावजाः स्वत एवोत्पन्नाः प्राकृति

॥ २२९॥

अथेति। दूतीवचनं कुट्टिन्या वाक्यम्। परपुरुषस्पर्शमात्र

सा भार्य्या या गृहे दक्षा सा भार्य्या या प्रजावती ।
सा भार्य्या या पतिप्राणा सा भार्य्या या पतिव्रता ॥२४१॥

कोकिलानां स्वरो रूपं नारीरूपं पतिव्रतम् ।
विद्या रूपं कुरूपाणां क्षमा रूपं तपस्विनाम् ॥२४२॥

अन्यच्च,

न सा भार्य्येति वक्तव्या यस्यां भर्त्ता न तुष्यति ।
तुष्टे भर्त्तरि नारीणां तुष्टाः स्युः सर्वदेवताः ॥२४३॥

ततो यद्यदादिशति मे प्राणेश्वरस्तदेवाहमविचारितं करोमि ।

तिष्ठतु परपुरुषस्पर्शः भर्तृभिन्नपुरुषान्तरस्पर्शनमपि न करोमीति ॥ २४० ॥

सा भार्य्येति । सा भार्य्या गृहे गृहकार्य्ये दक्षा नैपुण्यवती, सा भार्य्या प्रशस्तस्त्रीत्यर्थः । सा प्रजावती पुत्रवती, सा भार्य्या भार्य्यापदवाच्या । सा पतिप्राणा पतिरेव प्राणा जीवनं यस्या तादृशी, सा भार्य्या पत्नीपदवाच्या । सा पतिव्रता साध्वी, सा भार्य्या भर्तुरर्द्धाङ्गस्वरूपा ॥ २४१ ॥

कोकिलानामिति । कोकिलानां परभृतानां स्वरः सुस्वरः रूपं सौन्दर्यं, न तु तेषां शरीरं किञ्चित् । पतिव्रतं पातिव्रत्यं पतिपरायणत्वम् । नारीरूपं नारीणां रमणीनां रूपं सौन्दर्यम् । कुरूपाणां कुत्सितशरीराणां पुरुषाणां विद्या शास्त्रेषु नैपुण्यं रूपं सौन्दर्यम् । तपस्विनां तपोनिष्ठानां क्षमा क्षान्तिः रूपं सौन्दर्यं वा ॥ २४२ ॥

न सेति । यस्यां भार्य्यायां भर्त्ता न तुष्यति, सा भार्य्येति न वक्तव्या । न सा भार्य्यापदवाच्येत्यर्थः । तुष्टे भर्त्तरि सर्वाः देवताः तुष्टाः स्युः भवेयुः, भर्त्ता हि स्त्रियाः परमं दैवतमिति भावः ॥ २४३ ॥

तत इति । यद्यदादिशति आज्ञापयति । प्राणेश्वरः स्वामी ।

करोमि ।" दूत्योक्तम्, "सत्यमेतत् ?" लाव
"सत्यमेवैतत् ।" ततः सर्वमेव लावण्यवत्या
दूत्या गत्वा तुङ्गबलस्याग्रे निवेदितम् । तत्
बलोऽवदत् । "विषमेषुणा मथितहृदयस्तां वि
हं जीविष्यामि ?" कुट्टिन्याह, "स्वामिनानीय
व्येति ।" स प्राह, "कथमेतच्छक्यम् ?" कु
पायः क्रियताम् । तथा चोक्तम् ॥ १४४ ॥

उपायेन हि यच्छक्यं, न तच्छक्यं पराक्रमैः ।
शृगालेन हतो हस्ती गच्छता पङ्कवर्त्मना" ॥ १४

राजपुत्रः पृच्छति, "कथमेतत्" सा कथयति, "ब्र
रण्ये कर्पूरतिलको नाम हस्ती । तमवलोक्य
श्चिन्तयन्ति स्म । "यद्ययं केनाप्युपाये
कमेतद्देहेन मासचतुष्टयस्य स्वेच्छाभोज
ध्यादेकेन वृद्धशृगालेन प्रतिज्ञा कृता ।
वादस्य मरणं साधयितव्यम्" ॥ १४६ ॥

म् अविचार्येत्यर्थः । करोमि आचरामि । यथा
। निवेदितं विज्ञापितम् । विषमेषुणा, विषमाः
यस्य सः, तेन, मदनेनेत्यर्थः । मथितहृदयः
मित्यर्थः । हृदयं यस्य सः । जीविष्यामि प्राणान्
मिना भर्त्रा । समर्पयितव्या दातव्या । एतत्
क्यं साध्यम् ? उपायः कौशलम् ॥ १४४ ॥
। उपायेन कौशलेन यत् कर्म शक्यं साध्यं, तत् परा
क्यम् । तथाहि, पङ्कवर्त्मना कर्दममयेन पथा गच्छ
जम्बुकेन हस्ती गजराजः हतः निपातितः ॥ १
। म्रियते गतासुर्भवति । एतद्देहेन एतस्य
मं स्वेच्छया निजाभिलाषेण

नन्तरं स वञ्चकः कर्पूरतिलकसमीपं गत्वा साष्टा-
प्रणम्योवाच । "देव ! दृष्टिप्रसादं कुरु ।" हस्ती
"कस्त्वं कुतः समायातः ?" सोऽवदत् "जम्बुको-
सर्वैर्वनवासिभिः पशुभिर्मिलित्वा भवत्सकाशं
पितः । यद्विना राज्ञा स्थातुं न युक्तम् । तदत्रा-
राज्येऽभिषेक्तुं भवान् सर्वस्वामिगुणोपेतो निरू-
। २४७ ॥

कुलाचारजनाचारैरतिशुद्धः प्रतापवान् ।
ार्मिको नीतिकुशलः स स्वामी युज्यते भुवि ॥२४८॥

ालेन स्थविरजम्बुकेन । हृद्गतभावः । प्रतिज्ञा स्वीकारः ।
ावात् बुद्धेः धियः प्रभावात् कौशलात् । मरणं मृत्युः साधयितव्यं
ियतव्यम् । २३६ ।

ानन्तरमिति । वञ्चकः प्रतारकः । कर्पूरतिलकसमीपं कर्पूर-
य सन्निधिम् । साष्टाङ्गपातम् अष्टाङ्गानि शिरोहृदयप्रभृतीनि
ूतले प्रसारणं, तेन सह । क्रियाविशेषणम् । प्रणम्य नम-
दृष्टिप्रसादं दृष्टेर्दर्शनस्य प्रसादं प्रसन्नताम् । प्रसन्नदृष्ट्या
इत्यर्थः । समायातः समागतः । वनवासिभिः, वने वसन्ति
वनवासिनः, तैः, अरण्यस्थितैरित्यर्थः । मिलित्वा संभूय ।
ाशं भवतः समीपम् । प्रस्थापितः प्रेरितः । राज्ञा विना
व्यतिरेकेण । युक्तम् उचितम् । अटवीराज्ये अटव्याः अर-
राज्ये आधिपत्ये । अभिषेक्तुं नियोजयितुम् । सर्वस्वामिगुणो-
स्वामिनो भर्तुर्गुणाः शौर्यमार्दवौदार्यादयस्तैरुपेतः
तः । सर्वैः समस्तैः स्वामिगुणैः सहितो युक्तः । निरूपितः
त. । २४७ ।

कुलाचारेति । कुलाचारैः कौलिकाचारैः । जनाचारैः लोक-
लौकिकाचारैः । अतिशुद्धः पूतहृदयः । प्रतापवान् प्रतापशाली ।

अपराञ्च दृष्टम्,

राजानं प्रथमं विन्देत् ततो भार्यां ततो धनम्।
राजन्यसति लोकेऽस्मिन् कुतो भार्या कुतो धनम्॥

अन्यच्च

पर्जन्य इव भूतानामाधारः पृथिवीपतिः।
विकलेऽपि हि पर्जन्ये जीव्यते न तु भूपतौ॥

किञ्च, नियतविषयवर्त्ती प्रायशो दण्डयोगात्
जगति परवशेऽस्मिन् दुर्लभः साधुवृत्तः।
कृशमपि विकलं वा व्याधितं वाऽधनं वा
पतिमपि कुलनारी दण्डभीत्याभ्युपैति॥ १५१॥

भाक्तिकः अधर्म्मनिरतः। भीतिकृदधः भीतिदायी [illegible] इति शेषः। सः स्वामी भुवि पृथिव्यां मुच्यते त्यज्यते॥ १४८

राजानमिति। प्रथमं राजानं भूपालं, ततो भार्यां पत्नीं धनम् अर्थं विन्देत् आनयेत् उपार्ज्जयेदित्यर्थः। तथाहि अस्मिं राजनि भूपतौ असति अविद्यमाने। रक्षकाभावे इत्यर्थः। [illegible] कुतः, धनं कुतः, किमपि न रक्षितं भवतीत्यर्थः॥ १४९॥

पर्ज्जन्य इति। भूतानां जीवानां दम्पत्ये पर्ज्जन्य इव [illegible] पृथिवीपतिः भूपालः आधारः जीवनस्थानम्। तथाच पर्ज्जन्ये [illegible] विकले वर्षणविमुखे सति, अनुदिते सति वा जीव्यते, [illegible] शेषः। न तु भूपतौ, असतीति शेषः। जलधराभावे प्रजाः [illegible] भूपालाभावे न तु जीवन्तीत्यर्थः॥ १५०॥

नियतेति। अस्मिन् परवशे परायत्ते जगति भूमण्डले प्रायशः प्रायेण दण्डयोगात् दण्डभयादित्यर्थः। नियतवि[illegible] नियते निरूपिते विषये धर्म्मानुगतमार्गे इत्यर्थः। वर्त्तते [illegible] प्रकृत्या सुशीलः जनः दुर्लभः। तथाहि कुलनारी [illegible] कृशमपि क्षीणमपि, विकलं वा अङ्गहीनं वा, व्याधितं पीडि[illegible]

तद् यथा लग्नवेला न चलति, तथा कृत्वा सत्वर-
आगम्यतां देवेन।" इत्युक्त्वा उत्थाय चलितः। ततोऽसौ
राज्यलोभाकृष्टः कर्पूरतिलकः शृगालदर्शितवर्त्मना धावन्
महापङ्के निमग्नः। हस्तिनोक्तम्, "सखे शृगाल ! किम-
धुना विधेयम् ? महापङ्के पतितोऽहम्।" शृगालेन विह-
स्योक्तम्। "देव ! मम पुच्छाग्रे हस्तं दत्त्वोत्तिष्ठ। यस्मात्
मद्वचसि त्वया विश्वासः कृतस्तस्य फलमेतत्" ॥ १५२ ॥

तथा चोक्तम्,

यदाऽसत्सङ्गरहितो भविष्यसि भविष्यसि।
यदाऽसज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ॥ १५३ ॥

ततो महापङ्के निमग्नो हस्ती शृगालैर्भक्षितः। अतो

…ा, अधमं मनुष्यमं वा पतिमपि भर्तारमपि दण्डभीत्या दण्डस्य भयेन
…मुद्दिश्य उपगच्छति ॥ १५१ ॥

तदिति। लग्नवेला राज्याभिषेकस्य लग्नसमयः। चलति गन्तुं
…प्रवृत्तः। राज्यलोभेन राज्यस्य राजत्वलाभस्य लोभेन प्राप्तिलालसया
…आकृष्टः अनुष्टः। शृगालदर्शितवर्त्मना शृगालेन कर्त्रा दर्शितेन
प्रदर्शितेन वर्त्मना पथा। धावन् त्वरया गच्छन्। महापङ्के गभीर-
कर्दमे निमग्नः मोचितशरीरः। विधेयं कर्तव्यम्। पतितः निमग्नः।
देव ! इति भूपतिसम्बोधनम्। पुच्छाग्रे पुच्छस्य लाङ्गूलस्य अग्रे अग्र-
भागे। हस्तं दत्त्वा तदवलम्ब्य इत्यर्थः। वचसि वाक्ये। विश्वासः
प्रत्ययः ॥ १५२ ॥

यदेति। यदा यस्मिन् काले त्वम् असत्सङ्गरहितः असतां दुर्ज-
नानां सङ्गेन सहवासेन रहितः शून्यः भविष्यसि, तदा भविष्यसि
जीविष्यसि। यदा असज्जनगोष्ठीषु दुर्जनसभासु पतिष्यसि, तदा
पतिष्यसि अधःपतिष्यसि ॥ १५३ ॥

तत इति। महापङ्के महति कर्दमे। निमग्नः मोचितशरीरः।

ऽहं ब्रवीमि। उपायेन हि यच्छक्यमित्यादि।' ह
कुट्टिन्युपदेशेन तं चारुदत्तनामानं वणिक्पुत्रं स राज
सेवकं चकार। ततोऽसौ तेन सर्व्वविश्वासकार्य्येषु नि
जितः। एकदा कुट्टिन्युपदेशेन तेन राजपुत्रेण स्नात
लिप्तेन कनकालङ्कारधारिणोक्तम्। चारुदत्त! म
मासमेकं यावद्गौरीव्रतं कर्त्तव्यम्। तदद्यारभ्य प्र
रात्रमेकां कुलीनां युवतीमानीय समर्पय। सा म
यथोचितेन विधिना पूजयितव्या॥ २५४॥

ततः स चारुदत्तस्तथाविधां तरुणीमानीय सम
र्पयति। पश्चात् प्रच्छन्नः किमयं करोतीति निरूपयति
स च तुङ्गबलस्तां युवतीमस्पृशन्नेव दूराद्वस्त्रालङ्कारग
न्धचन्दनैः सम्पूज्य रक्षकं दत्त्वा तत्क्षणमेव प्रस्थापयति
अथ तेन वणिक्पुत्रेण तद् दृष्ट्वोपजातविश्वासेन लो
भाकृष्टमनसा स्ववधूः समानीय समर्पिता॥ २५५॥

भक्षितः खादितः। कुट्टिन्युपदेशेन, कुट्टिन्याः व्यभिचारसहायाया
उपदेशेन परामर्शेन। वणिक्पुत्रं, वणिजस्तनयम्। सेवकं भृत्यं
विश्वासानां कार्य्याणि विश्वासकार्य्याणि। सर्व्वेषु विश्वासकार्य्ये
नियोजितः स्थापितः। आदौ स्नातः पश्चाद् अनुलिप्तः चन्दना
चर्च्चितशरीर इत्यर्थः। कनकालङ्कारधारिणा, कनकं सुवर्णम
अलङ्कारं भूषणं धारयति परिधत्ते योऽसौ तेन। कुलीनां सत्कु
लप्रसूताम्। युवतीं तरुणीम्। समर्पय मम समीपवर्त्तिनीं कुरु
यथोचितेन यथायोग्येन। विधिना शास्त्रानुमतविधानेन। पूजयि
तव्या, चर्च्चनीया॥ २५४॥

ततः इति। तथाविधां यथोक्तरूपाम्। समर्पयति ददाति
प्रच्छन्नः गोपितशरीरः। निरूपयति लक्षयति। अस्पृशन् स्प
र्शमकृत्वा। वस्त्रालङ्कारगन्धचन्दनैः वसनभूषणगन्धद्रव्यमलयजैः।

स च तुङ्गबलस्तां हृदयप्रियां लावण्यवतीं विज्ञाय ससम्भ्रममुत्थाय निर्दयमालिङ्ग्यानन्दोन्मीलितलोचनः प्रहृष्टमना बहुविधामनङ्गक्रीड़ां विधाय पर्य्यङ्के तया सह सुष्वाप। तदालोक्य वणिक्पुत्रश्चित्रलिखित इव इतिकर्त्तव्यतामूढ़: परं विषादमुपागतः। तथा त्वयापि भवितव्यमिति" ॥ १५६ ॥

ततस्तद्वचनमवधार्य्य महता भयेन मन्थरो जलाशयमुत्सृज्य प्रचलितः। तेऽपि हिरण्यकादयस्तमनुजग्मुः। ततः स्थले गच्छन् केनापि व्याधेन वनं पर्य्यटता स मन्थरः प्राप्तः। स च तं गृहीत्वा उत्थाप्य धनुषि बद्ध्वा धन्यो-

तृणमेव चर्विततृणमेव प्रस्थापयति प्रेरयति। उपजातविश्वासेन [illegible]ज्ञातप्रत्ययेन। लोभाकृष्टमनसा लोभेन प्राप्तिलालसया आकृष्टं मनश्चित्तं यस्य तेन। अवधूः निजभार्या। दर्शिता दत्ता ॥ १५५ ॥

स चेति। हृदयप्रियां मानसप्रणयिनीम्। विज्ञाय प्रत्यभिज्ञाय। ससम्भ्रमं सम्भ्रमेण सह। उत्थाय शय्यातः परित्यज्य। निर्दयं गाढतरम् आलिङ्ग्य आश्लिष्य आनन्दोन्मीलितलोचनः आनन्देन हर्षेण उन्मीलिते विकसिते लोचने चक्षुषी यस्य सः। प्रहृष्टमनाः हृष्टं प्रफुल्लं मनो यस्य सः। बहुविधां नानाप्रकाराम् अनङ्गक्रीड़ां रतिक्रीड़ां विधाय कृत्वा, [illegible] [illegible]। चित्रलिखितः चित्रपटे लिखितः। इतिकर्त्तव्यताविमूढः किंकर्त्तव्यविमूढः, [illegible] इति भावः। [illegible] "[illegible] ॥" इति साहित्यदर्पणम्। विषादं खेदम् [illegible] ॥ १५६ ॥

तत इति। अवधार्य्य श्रुत्वा। [illegible]। [illegible] परित्यज्य। [illegible]

त्यभिधाय स्वगृहाभिमुखं प्रयातः। अथ ते
समूषिकाः परं विषादमुपगतास्तमनुगच्छन्ति
। हिरण्यको विलपति ॥ १५७ ॥

स्य दुःखस्य न यावदन्तं गच्छाम्यहं पारमिवार्णव
दद्वितीयं समुपस्थितं मे छिद्रेष्वनर्था बहुलीभवन्ति

स्वभावजं तु यन्मित्रं भाग्येनैवाभिजायते ।
तदकृत्रिमसौहार्द्दमापत्स्वपि न मुञ्चति ॥ १५८

अपि च,

न मातरि न दारेषु न सोदर्य्ये न चात्मजे ।
विश्वासस्तादृशः पुंसां यादृङ्मित्रे स्वभावजे ॥ १

गतवन्तः । पर्य्यटता भ्रमता । धन्योऽस्मि सफलजीवनोऽस्मि । ते
थाय कथयित्वा स्वगृहाभिमुखं निजभवनं प्रति प्रयातः गतवान् ।
वादसमूषिकाः हरिणकाकादयः । विषादं विषण्णताम् उ
प्राप्ताः । अनुगच्छति स पश्चात् जग्मुः । विलपति अनुशोचति ।
। एकस्येति । अहं यावत् अर्णवस्य समुद्रस्य पारमिव अ
मिव एकस्य दुःखस्य क्लेशसागरस्येति भावः । अन्तं शेषांशं न ग
न प्राप्नोमि, तावत् मे मम द्वितीयम् अपरं दुःखं समुप
उपागतम् । तथाहि छिद्रेषु रन्ध्रेषु अनर्थाः अनिष्टपाताः ब
भवन्ति विस्तारमापद्यन्ते ॥ १५८ ॥

स्वभावजमिति । स्वभावजं प्रकृत्या समुत्पन्नं यत् मि
भाग्येनैव शुभादृष्टेनैव अभिजायते सम्पद्यते । तत् अकृत्रिम
सहजमित्रभावः । आपत्स्वपि विपत्कालेऽपि न मुञ्चति न
त्यजति ॥ १५९ ॥

न मातरीति । पुंसां पुरुषाणां स्वभावजे स्वाभाविके
यादृक् यथाविधः विश्वासः प्रत्ययः, भवतीति शेषः । तादृशो हि
न मातरि जनन्याम् । न दारेषु भार्य्यायाम् । न सोदर्य्ये भ्र
न च आत्मजे पुत्रे । भवति इति शेषः ॥ १६० ॥

मुहुर्विचिन्त्य यहो मे दुर्दैवम् । यतः,

स्वकर्मसन्तानविचेष्टितानि,
कालान्तरावर्त्तिशुभाशुभानि ।
इहैव दृष्टानि मयैव तानि
जन्मान्तराणीव दशान्तराणि ॥ १६१ ॥

वा इत्थमेवैतत्,

कायः सन्निहितापायः सम्पदः पदमापदाम् ।
समागमाः सापगमाः सर्वमुत्पादि भङ्गुरम् ॥ १६२ ॥

विमृश्याह,शोकारातिभयत्राणं प्रीतिविश्रम्भभाजनम् ।
केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम् ॥१६३॥

इति । मुहुर्वारंवारं विचिन्त्य चिन्तयित्वा । दुर्दैवं दुर्भाग्यम् । स्वकर्मेति । मया इह कर्मभुमावेव । स्वकर्मसन्तानविचेष्टितानि स्वं सन्तानस्य निजकृतदुष्कृतसुकृतरूपकर्मसमूहस्य विचेष्टितानि फलरूपाणोदयः । कालान्तरावर्त्तिशुभाशुभानि कालान्तरस्य समयान्तरस्य ... आवर्त्तनेन शुभाशुभानि कल्याणाकल्याणरूपाणि । जन्मान्तराणीव देहान्तरपरिग्रहरूपाणीव दशान्तराणि अवस्थान्तराणि पुरुष... वाल्यावस्था दशाः । दृष्टानि अनुभूतानि ॥ १६१ ॥

काय इति । कायो देहः सन्निहितापायः सन्निहितः समीपवर्ती अपायः नाशो यस्य तादृशः । सम्पद् धनसम्पत्तयः आपदो विपदाम् ... स्थानम् । समागमाः पुत्रकलत्रादिभिः संयोगाः सापगमाः वियोगसहिताः । उत्पादि उत्पन्नं सर्वं वस्तु भङ्गुरं ध्वंसशीलम् ॥१६२॥

इत्यादीति । विमृश्य विविच्य ।

शोकेति । शोकारातिभयत्राणं, शोकश्च अरातिश्च भयञ्च तेभ्यः त्राणं रक्षणं यस्मात् । शोको आत्मीय... दुःखम् । अरातिः शत्रुः । भयं भीतिः । प्रीतिविश्रम्भभाजनं प्रीतेः स्नेहस्य विश्रम्भस्य विश्वासस्य च भाजनं पात्रम् । रत्नं श्रेष्ठवस्तुभूतम् इदं मित्रम् ... अक्षरद्वयं केन सृष्टं निर्मितम् ॥१६३॥

किञ्च, मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः
पात्रं यत् सुखदुःखयोः सह भवेन्मित्रेण तद् दुर्लभम्।
ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुला-
स्ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावा तु तेषां विपत्॥

इति च श्रुत्वा हिरण्यकश्चित्राङ्गलघुपतनका[illegible]
यावदयं व्याधो वनान्न निःसरति तावन्मन्थरं मोच
यत्नः क्रियताम्। तावूचतुः सत्वरं यथाकार्यमुच्यताम्।
ण्यको ब्रूते। चित्राङ्गो जलसमीपं गत्वा मृतमिव आ
निश्चेष्टं दर्शयतु। काकश्च तस्योपरि स्थित्वा चञ्च्वा वि
विलिखतु। नूनमनेन लुब्धकेन मृगमांसार्थिना

मित्रमिति। मित्रं सुहृत् नयनयोश्चक्षुषोः प्रीतिरसायनं
रससेवकम्। चेतसो हृदयस्य आनन्दनं सन्तोषकरम्।
सुहृदा सह यत् सुखदुःखयोः हर्षविषादयोः पात्रं भाजनं भवे
मित्रं; समदुःखसुखः सुहृदित्यर्थः। दुर्लभं दुःखेन क्लेशेन
प्राप्यते यत् तत्। समृद्धिसमये धन-सम्पत्तिकाले द्रव्याभिलाष
द्रव्याणां धनादीनाम् अभिलाषेण प्राप्तिलालसया आकुलाः व्यग्राः
ये सुहृदः मित्राणि, ते सर्वत्र सर्वस्मिन् स्थाने मिलन्ति उपतिष्ठ
न्ते किन्तु विपत् विपत्तिकाल तेषां स्वार्थसाधनार्थिसुहृदां तत्त्व
ग्रावा तत्त्वस्य याथार्थ्यस्य निकषग्रावा कषितप्रस्तरम्। आपत्सु
जानीयादित्यर्थः॥ १६[illegible]॥

इतीति। विलप्य विलापं कृत्वा। चित्राङ्गश्च लघुपतनकश्च
निःसरति निर्गच्छति। मोचयितुं बन्धमुक्तं कर्तुम्। यत्नः
सत्वरं शीघ्रम्। यथाकार्यं यदुपायावलम्बनं कर्तव्यम्। उपदिश
[illegible] बन्धनमोचनविधिम्। मृतं गतासुमिव। निश्चेष्ट
स्पन्दनादिव्यापाररहितम्। दर्शयतु प्रकाशयतु। चञ्च्वा
[illegible]। विलिखतु खनतु। लुब्धकेन व्याधेन। मृगमांसार्थिना

पं परित्यज्य सत्वरं गन्तव्यम्। ततोऽहं मन्थरस्य
ं छेत्स्यामि, समागते लुब्धके भवद्भ्यां पलायितव्यम्।
ततश्चित्राङ्गलघुपतनकाभ्यां शीघ्रं गत्वा तथानुष्ठिते
स व्याधः परिश्रान्तः पानीयं पीत्वा तरोरधस्तादुप-
स्तथाविधं मृगमवलोक्य कच्छपं जलसमीपे निधाय
रिकामादाय प्रहृष्टमना मृगान्तिकं चलितः।
अत्रान्तरे हिरण्यकेनागत्य मन्थरस्य बन्धनं छिन्नम्।
र्मः सत्वरं जलाशयं प्रविवेश। स मृग आसन्नं तं
ं विलोक्य उत्थाय द्रुतं पलायितः। प्रत्यावृत्य लुब्धको
तरुतलमायाति तावत्कूर्ममपश्यन्नचिन्तयत्। उचित
तत् ममासमीक्ष्यकारिणः। २६५। यतः,

यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि॥ २६६॥

मृ अर्पयति यः स तेन, हरिण-पिपित-लोलुपेन दृत्यर्थः।
त्यज्य विहाय। सत्वरं त्वरया सह, शीघ्रमित्यर्थः। छेत्स्यामि
[illegible]ामि। अनुष्ठिते कृते। परिश्रान्तः श्रमातुरः। पानीयं
[illegible]। पीत्वा निपीय। तथाविधं मृतवदित्यर्थः। निधाय संस्थाप्य।
[illegible]रिकां मांसच्छेदनास्त्रविशेषम्। आदाय गृहीत्वा। प्रहृष्टमनाः
[illegible]हृदयः। मृगान्तिकं मृगसमीपम्। चलितः गतः। आगत्य
[illegible]। छिन्नम् अपनीतं बन्धनं दृढं यः। जलाशयं
[illegible]रम्। आसन्नं समीपवर्तिनम्। विलोक्य दृष्ट्वा। पलायितः प्रनष्टः।
[illegible] पलायनम्। आयाति आगच्छति। अपश्यन् अनवलोकयन्।
[illegible]क्ष्यकारिणः, यो भावि शुभाशुभमनालोच्य कार्यं करोति सः
[illegible]ीक्ष्यकारी॥ २६५॥
यो ध्रुवाणीति। यो जनः ध्रुवाणि स्थिराणि परित्यज्य विहाय
[illegible] दृत्यर्थः। अध्रुवाणि अनिश्चितानि वस्तूनि निषेवते अनुसरति

ततोऽसौ स्वकर्मसमाप्त्यभिरामः कटकं प्रविष्टः।

[कर्पूराणि च चित्राणि पुष्पाणि वसनानि च।
पद्म स्वर्णपतित्रीर्षी मूल्येन विमोचितः ॥]

अनन्तरञ्च सर्वे पृथ्वीपतयः स्वस्वस्थानं गता यथाभिमतमास्थिताः।

अथ राजपुत्रैः सानन्दैर्विष्णुशर्माभिहितः, सर्वं श्रुतम्, सुखिनो वयं सिद्धं नः समीहितम्। विष्णुशर्माह, यद्यपि भवतामभिमतं सम्पन्नम्, अपरमपीदमस्तु। मित्रं प्राप्नुत सज्जना जनपदैर्लक्ष्मीः समालभ्यताम् भूपालाः परिपालयन्तु वसुधां शश्वत् स्वधर्मे स्थिताः।

वस्त्र पुष्पाणि। चित्रवर्णानि सदृशानि मलानि वसनानि वस्त्राणि ...
ग्रथ्यं महमेव यथाह्निमेव ॥ १६६ ॥

तत इति। स्वकर्मणामत्र निश्चयकार्यानुसारेण विरामः ... मनोरथ इत्यर्थः। कटकं शिबिरं स्वस्थानं प्रविष्टः गतः। ... पदः छन्दा अपगता आपदो विपत्तयो येषां ते। स्वस्थानं निजालयं यथाभिमतं यथाभिमतमतिक्रम्य निरुद्वेगेन स्थितवन्तः। सानन्दम् ... सहर्षमित्यर्थः। सुखवन्तः हृदयङ्गमं श्रुतवन्तः। सुखिनः ... विविधाः परितृप्ता इत्यर्थः। सिद्धं सम्पन्नम्। समीहितं वाञ्छितं अभिलषितम् अभिप्रेतम्। सम्पन्नं निष्पन्नम्। अपरम् ... रिक्तम् ॥ १६७ ॥

मित्रमिति। हे सज्जनाः साधवः! यूयं मित्रं सुहृदं प्राप्नुत लभध्वम्। जनपदैः लोकालयैः लक्ष्मीः कमला समालभ्यताम्। भूपालाः राजानः शश्वत् निरन्तरं स्वधर्मे पृथ्वीपालनादिनिजधर्मे स्थिताः सन्तः वसुधां पृथिवीं परिपालयन्तु रक्षन्तु। ... सुकृतिनां पुण्यात्मनां वो युष्माकम् सम्बन्धे नवोढा नवपरिणीता वधूरिव नीतिः नीतिशास्त्रं मानसतुष्टये हृदयपरितोषाय आस्तां ...

स्तां मानसतुष्टये सुकृतिनां नीतिर्नवोढेव वः
कल्याणं कुरुतां जनस्य भगवांश्चन्द्रार्धचूडामणिः ॥१६८॥

इति विष्णुशर्मसंगृहीते हितोपदेशे मित्रलाभो नाम
प्रथमः कथासंग्रहः समाप्तः ।

ओं

अथ सुहृद्भेदः ।

अथ राजपुत्रा ऊचुः । आर्य ! मित्रलाभः श्रुतस्ताव-
दस्माभिरिदानीं सुहृद्भेदं श्रोतुमिच्छामः ।

विष्णुशर्मोवाच, सुहृद्भेदं तावत् शृणुत । यस्यायमाद्यः श्लोकः ॥ १ ॥

वर्द्धमानो महास्नेहो मृगेन्द्रवृषयोर्वने ।
पिशुनेनातिलुब्धेन जम्बुकेन विनाशितः ॥ २ ॥

भगवान् ईश्वरस्यादिसम्पदः । "ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना । इति विष्णुपुराणम् ॥ चन्द्रार्ध-
चूडामणिः चन्द्रस्य [illegible] चूडामणि शिरोभूषणं यस्य
सः । जनस्य लोकस्य कल्याणं शुभं कुरुतां विधत्ताम् ॥ १६८ ॥

इति हितोपदेशटीकायां मित्रलाभो नाम प्रथमः कथासंग्रहः ॥

अथेति । श्रुतः आकर्णितः । सुहृद्भेदं सुहृदां [illegible]
[illegible] ॥ १ ॥

[illegible]

राजपुत्त्रैरुक्तं, कथमेतत् ?

विष्णुशर्म्मोवाच । अस्ति दक्षिणापथे सुवर्णवती नगरी । तत्र वर्द्धमानो नाम वणिक् महाधनः वसति । तस्य प्रभूतेऽपि वित्ते अपरान् बन्धूनतिसमृद्धान् समीक्ष्य पुनरर्थवृद्धिः करणीयेति मतिर्बभूव । यतः ॥

अधोऽधः पश्यतः कस्य महिमा नोपचीयते ।
उपर्य्युपरि पश्यन्तः सर्व्व एव दरिद्रति ॥ ४ ॥

अपरञ्च, ब्रह्महापि नरः पूज्यो यस्यास्ति विपुलं धनं ।
शशिनस्तुल्यवंशोऽपि निर्द्धनः परिभूयते ॥ ५ ॥

मित्यर्थः । अतिलुब्धेन अत्यन्तलोभवता पिशुनेन खलेन जम्बुकेन केन विनाशितः विकृतिं प्रापितः ॥ २ ॥

राजपुत्त्रैरिति । उक्तं कथितम् । कथम् एतत् ? एतत् प्रकारेण संघटितमित्यर्थः । महाधनः महत् धनं यस्य सः, सम्पत्तिशालीत्यर्थः । प्रतिवसति अध्यास्ते । प्रभूते सुविपुले । धने । अतिसमृद्धान् महैश्वर्य्यशालिनः । अर्थवृद्धिः अर्थस्य धनस्य वर्द्धनम् । करणीया विधेया । मतिः बुद्धिः ॥ ३ ॥

अध इति । अधोऽधः नीचैर्नीचैः, आत्मापेक्षया हीनावस्थजनान् इत्यर्थः । पश्यतः निरीक्षमाणस्य, हीनावस्थां पर्य्यालोचयत इत्यर्थः । कस्य जनस्य महिमा आत्मगौरवं न उपचीयते न वर्द्धते, महत्त्वं वर्द्धमानमिव प्रतिभातीत्यर्थः । उपरि उपरि पश्यन्तः आत्मापेक्षया उन्नतावस्थजनान् आलोकयन्तः सर्व्व एव समसमानवा दरिद्रति, हीनावस्थापन्नमात्मानं मन्यन्ते ॥ ४ ॥

ब्रह्महेति । यस्य नरस्य विपुलं धनं महाविभवः । अस्ति स नरः ब्रह्महापि ब्रह्महत्याकारी अपि महापापाश्रयोऽपीत्यर्थः । पूज्यः सम्माननीयः । निर्धनः धनहीनो जनः शशिनश्चन्द्रस्य तुल्यवंशः सदृशान्वयसम्भूतोऽपि परिभूयते अवज्ञायते ॥ ५ ॥

न्यच्च, अव्यवसायिनमलसं दैवपरं साहसाच्च परिहीणम् ।
प्रमदेव हि वृद्धपतिं नेच्छत्युपगूहितुं लक्ष्मीः ॥ ६ ॥
किञ्च, आलस्यं स्त्रीसेवा सरोगता जन्मभूमिवात्सल्यम् ।
सन्तोषो भीरुत्वं षड्व्याघाता महत्त्वस्य ॥ ७ ॥
अतः, सम्पदा सुस्थितंमन्यो भवति स्वल्पयापि यः ।
कृतकृत्यो विधिर्मन्ये न वर्द्धयति तस्य ताम् ॥ ८ ॥
अपरञ्च, निरुत्साहं निरानन्दं निर्व्वीर्य्यमरिनन्दनम् ।
मा स्म सीमन्तिनी काचित् जनयेत् पुत्त्रमीदृशम् ॥ ९ ॥

अव्यवसायिनमिति । प्रमदा यौवनमत्ता कामिनी वृद्धपतिं जराजीर्णेन्द्रियभर्त्तारमिव लक्ष्मीः सौभाग्यसम्पत्, अव्यवसायिनं कार्य्यप्रवर्त्तनविमुखम् अलसम् आलस्यपरिभूतं, दैवपरं अदृष्टसुखाभिलाषिणम्, साहसाच्च परिहीणं साहसशून्यम् । "सहसा क्रियते कर्म्म यत्किञ्चित् बलगर्व्वितैः । तत्साहसमिति प्रोक्तं सद्भिः कविभिरुच्यते ।" उपगूहितुम् आलिङ्गितुं न इच्छति न अभिलषति ॥ ६ ॥

आलस्यमिति । आलस्यं कर्त्तव्यकार्य्येषु निरुत्साहः । स्त्रीसेवा सर्व्वदा कामिनीसम्भोगलालसा, प्रमदानुवर्त्तित्वं । सरोगता नित्यरुग्णशरीरता । जन्मभूमिवात्सल्यं जन्मस्थानपरित्यागपूर्व्वकदेशान्तरगमनविमुखता । सन्तोषः सर्व्वथाभावादिविकारोपदौर्म्मनस्य एव परितोषः । भीरुत्वं भयशीलता । एते षट् व्यापारा इत्यर्थः । महत्त्वस्य महत्त्वलाभस्य व्याघाताः प्रतिबन्धकराः ॥ ७ ॥

सम्पदेति । यो जनः स्वल्पयापि अल्पपरिमितयापि सम्पदा धनसम्पत्त्या सुस्थितंमन्यः आत्मानं सुस्थितं मन्यते योऽसौ तादृशो भवति । विधिर्विधाता कृतकृत्यः कृतकार्य्यः निश्चिन्त इत्यर्थः । सन्, तस्य जनस्य तां सम्पदं न वर्द्धयति न वृद्धिं प्रापयति इत्यहं मन्ये ॥ ८ ॥

निरुत्साहमिति । काचित् सीमन्तिनी वधूः, निरुत्साहम् उद्यमशून्यं निरानन्दम् आनन्दरहितं सर्व्वदा विषण्णहृदयमित्यर्थः । निर्व्वीर्य्यं तेजोहीनम्, अरिनन्दनम् अरीणां शत्रूणाम् आनन्दजनकम् । ईदृशं

को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥ १५ ॥

अथ गच्छतस्तस्य सुदुर्गनाम्नि महारण्ये सञ्जीवको भग्नजानुर्निपतितस्तमालोक्य वर्द्धमानोऽचिन्तयत् ॥ १६ ॥

करोतु नाम नीतिज्ञो व्यवसायमितस्ततः ।
फलं पुनस्तदेव स्यात् यद्विधेर्मनसि स्थितम् ॥ १७ ॥

किन्तु, विस्मयः सर्व्वथा हेयः प्रत्यूहः सर्व्वकर्म्मणाम् ।
तस्माद्विस्मयमुत्सृज्य साध्ये सिद्धिर्विधीयताम् ॥ १८ ॥

इति सञ्चिन्त्य सञ्जीवकं तत्र परित्यज्य वर्द्धमानः पुनः स्वयं धर्म्मपुरं नाम नगरं गत्वा महाकायमन्यवृषभमेकं समानीय धुरि नियोज्य चलितः । ततः सञ्जीवकोऽपि कथं कथमपि खुरत्रये भरं कुर्व्वन् उत्थितः ॥ १९ ॥

प्रियवादिनां प्रियं प्रीतिकरं वदन्ति ये ते तेषां सम्बन्धे परः अनात्मीयः कः ? न कोऽपि इत्यर्थः ॥ १५ ॥

अथेति । महत् अरण्यं महारण्यम् । भग्नजानुः भग्नं जानु यस्य सः ॥ १६ ॥

करोत्विति । नीतिज्ञः नीतिशास्त्रनिपुणो जनः इतस्ततः सर्व्वत्र व्यवसायम् अध्यवसायं करोतु । फलं पुनः विधेर्विधातुर्मनसि यत् स्थितं तदेव भवतीति शेषः ॥ १७ ॥

विस्मय इति । सर्व्वथा सर्व्वतोभावेन विस्मयः प्रतिपत्तिमूढता हेयः दूरीकर्त्तव्यः । यतः सर्व्वकर्म्मणाम् अशेषकार्य्याणां प्रत्यूहः विघ्नजनकः । तस्मात् कारणात् विस्मयम् उत्सृज्य परित्यज्य साध्ये सम्पादनीये कर्त्तव्ये इत्यर्थः । कर्म्मणि सिद्धिः फलोत्पादनं विधीयतां क्रियतां विचक्षणैरिति शेषः ॥ १८ ॥

इतीति । सञ्चिन्त्य चिन्तयित्वा । परित्यज्य विहाय । चलितः गतः । कथं कथमपि कष्टातिशयेन । खुरत्रये अभग्नखुरत्रितये । भरम् कुर्व्वन् विदधत् ॥ १९ ॥

निमग्नस्य पयोराशौ पर्व्वतात् पतितस्य च।
तक्षकेणापि दष्टस्य आयुर्म्मर्म्माणि रक्षति॥ २० ॥
नाकाले म्रियते जन्तुर्व्विद्धः शरशतैरपि
कुशाग्रेणैव संस्पृष्टः प्राप्तकालो न जीवति ॥ २१ ॥

अरक्षितं तिष्ठति दैवरक्षितं
सुरक्षितं दैवहतं विनश्यति।
जीवत्यनाथोऽपि वने विसर्ज्जितः
कृतप्रयत्नोऽपि गृहे न जीवति ॥ २२ ॥

ततो दिनेषु गच्छत्सु सञ्जीवकः स्वेच्छाहारादिलाभेन अरण्यानीं परिभ्रमन् हृष्टपुष्टाङ्गो बलवन्ननाद।

निमग्नस्येति। पयोराशौ समुद्रे निमग्नस्य समुद्रसलिलाभ्यन्तरं गतस्येत्यर्थः। पर्व्वतात् शैलाग्रात् पतितस्य च विच्युतस्य च, तक्षकेण महाविषसर्पेणेत्यर्थः। दष्टस्यापि जनस्य आयुः विधातृनिरूपितजीवनकालः, मर्म्माणि मर्म्मस्थानानि रक्षति, अत्याहितेभ्य इति शेषः ॥२०॥

नाकाले इति। जन्तुः प्राणी शरशतैः बहुसङ्ख्यबाणैः विद्धोऽपि विदारिताङ्गोऽपि अकाले असमये आयुःशेषे इत्यर्थः। न म्रियते न गतासुर्भवति। प्राप्तकालः प्राप्तः उपस्थितः कालः मृत्युसमयः यस्य, तादृशो जनः कुशाग्रेणैव कुशस्याग्रभागेनैव संस्पृष्टः ताडितः सन् न जीवति ॥ २१ ॥

अरक्षितमिति। अरक्षितं मानवेन अपालितं दैवरक्षितं भाग्येन रक्षितं परिपालितं सत् तिष्ठति। सुरक्षितं मानवेन सदुपाययत्नाभ्यां दैवहतं दैवेन भागधेयेन हतं नाशितं द्रव्यं विनश्यति। वने अरण्यमध्ये विसर्ज्जितः परित्यक्तः अनाथः अरक्षकोऽपि जीवति। गृहे भवने कृतप्रयत्नः कृतः प्रयत्नः, जीवनरक्षार्थमिति शेषः। यस्मिन् तादृशोऽपि जनो न जीवति कालप्राप्तो भवतीत्यर्थः ॥ २२ ॥

तत इति। स्वेच्छाहारादिलाभेन, स्वेच्छया यथाभिलाषेण आहारादीनां भक्ष्यद्रव्यप्रभृतीनां लाभः प्राप्तिः तेन। अरण्यानी

तस्मिन् वने पिङ्गलनामा सिंहः स्वभुजोपार्ज्जितराज्य
सुखमनुभवन्निवसति । तथा चोक्तम् ॥ २३ ॥

नाभिषेको न संस्कारः सिंहस्य क्रियते मृगैः ।
विक्रमार्ज्जितराज्यस्य स्वयमेव मृगेन्द्रता ॥ २४ ॥

स चैकदा पिपासाकुलितः पानीयं पातुं यमुनाकच्छ
मगच्छत् । तेन च तत्र सिंहेनाननुभूतपूर्व्वं प्रलयघनगर्जि
तमिव सञ्जीवकनर्द्दितमश्रावि । तत् श्रुत्वासौ पानीय
मपीत्वा सचकितं परावृत्य स्वस्थानमागत्य किमिदमित्या
लोचयंस्तूष्णीं स्थितः । स च तथाविधः करटकदमनकाभ्यां
तन्मन्त्रिपुत्राभ्यां शृगालाभ्यां दृष्टः । तं तथाविधं दृष्ट्वा द
मनकः करटकमाह स्म । सखे करटक ! किमित्ययमुदका
स्वामी पानीयमपीत्वा सचकितो मन्दं मन्दमवतिष्ठते

मज्ञावनं परिभ्रमन् तत्र विचरन् इत्यर्थः । हृष्टपुष्टाङ्गः हृष्टं प्र
ल्लासयुक्तमित्यर्थः । पुष्टं पुष्टियुक्तं मङ्गमित्यर्थः । स चाङ्गं य
यस्य सः । बलवत् उच्चैस्तरां ननाद शब्दं कृतवानित्यर्थः । स्वभुजो
र्ज्जितं स्वभुजाभ्यां निजबाहुभ्याम् उपार्ज्जितं स्वायत्तीकृतं लब्धमित्य
यत् राज्यं राजत्वं तस्य सुखम् आनन्दम् अनुभवन् भुञ्जन् ।
कालं यापयति ॥ २३ ॥

नाभिषेक इति । मृगैः हरिणादिभिः सिंहस्य मृगराज
अभिषेकः न तीर्थोदकैः राज्येऽभिषेचनं, न संस्कारः न
संस्करणं क्रियते अनुष्ठीयते । परन्तु स्वयमेव विक्रमार्ज्जितरा
विक्रमेण पराक्रमेण अर्ज्जितम् उपार्ज्जितं यत् राज्यं तस्य
विक्रमेण अर्ज्जितं राज्यं येन तस्य मृगेन्द्रस्य मृगेन्द्रता मृगाधिप
भवतीति शेषः ॥ २४ ॥

स चेति । एकदा एकस्मिन् काले पिपासाकुलितः पिपासया
पानकाङ्क्षया आकुलितः व्याकुलीकृतः । पानीयं जलं पातुम्

रटको ब्रूते, मित्र दमनक ! मम सम्मतेनास्य सेवैव न क्रियते। तत् किमस्य चेष्टानिरूपणेन ? यतश्चानेन राज्ञा विनापराधेन चिरमवधीरिताभ्यामावाभ्यां महद्दुःखमनुभूतम् ॥ २५ ॥

सेवया धनमिच्छद्भिः सेवकैः पश्य यत् कृतम्।
स्वातन्त्र्यं यच्छरीरस्य मूढैस्तदपि हारितम् ॥२६॥

स कर्तुं यमुनाकच्छं यमुनाया नद्याः सविकटवृक्षनिम्नतीरम् अन-
नुभूतपूर्वं पूर्वं नानुभूतम्, अश्रुतपूर्वमित्यर्थः ।
प्रलयघनगर्जितमिव प्रलयस्य प्रलयकालस्य घना मेघाः तेषां गर्जितं
ध्वनिरिव सञ्जीवकगर्हितं सञ्जीवकस्य तदाख्यवृषस्य गर्हितं
रावः कदाचि श्रुतम्। तत् श्रुत्वा आकर्ण्य असौ सिंहः पानीयं
जलम् अपीत्वा न आस्वाद्य सचकितं सभयं परिहृत्य प्रत्यावृत्य, निवृत्य
इत्यर्थः। स्वस्थानं निजभूमिम् आगत्य आगम्य इदं किम् ? किमेतत् ?
आलोच्य मनसा विचार्य तूष्णीं मौनेन स्थित इत्यर्थः। स्थितः उप-
विष्टः। तथाविधः तादृशः, भीत इत्यर्थः। करटकदमनकाभ्यां करटकश्च
दमनकश्च तौ ताभ्याम्। मन्त्रिपुत्राभ्याम् तस्य सिंहस्य मन्त्रिणः
पितृस्य पुत्राभ्यां तनयाभ्यां शृगालाभ्यां जम्बुकाभ्यां दृष्टः अव-
लोकितः। तं सिंहं तथाविधं भीतम्। किमिति किमर्थम्। उदकार्थी
जलपानाभिलाषी स्वामी अधिपतिः। पानीयं जलम् अपीत्वा अनास्वाद्य
मन्दं मन्दं शङ्कितभावेनेत्यर्थः। अवतिष्ठते आस्ते। मम सम्मतेन मम मतानु-
सारेण, अस्य सिंहस्य सेवा भक्तकार्यं न क्रियते न अनुष्ठीयते। तत्
तस्मात् कारणात् अस्य सिंहस्य चेष्टा निरूपणेन, चेष्टायाः मनोविकारस्य
कार्यानुमानप्रदर्शनं निरूपणेन निर्णयेन। किं ? प्रयोजनाभावः
इत्यर्थः। अनेन राज्ञा अवधीरिताभ्याम् अवज्ञाताभ्याम् आवाभ्यां
महत् अतीव दुःखं क्लेशः अनुभूतं भुक्तम् ॥ २५ ॥

सेवयेति। सेवया चाकर्या धनमिच्छद्भिः धनाभार्थिभिः सेवकैः

अपरञ्च, शीतवातातपक्लेशान् सहन्ते ये पराश्रिताः।
तदंशेनापि मेधावी तपस्तप्त्वा सुखी भवेत्॥२०

अन्यच्च, एतावज्जन्मसाफल्यं यदनायत्तवृत्तिता।
ये पराधीनतां यातास्ते वै जीवन्ति के मृताः?॥२१

अपरञ्च, एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर।
एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः॥२२

किञ्च, अबुधैरर्थलाभाय पण्यस्त्रीभिरिव स्वयम्।

...ऐः यत् उक्तम् अनुचितं तत् यत्र ... । ... स्वातन्त्र्यं स्वाधीनता, मूढैः ... तदपि ... ॥१९॥

शीतवातेति। पराश्रिताः परमाश्रयन्ति ये ते ... जनाः ... इत्यर्थः। तान् शीतवातातपक्लेशान् ... वातश्च आतपश्च तेभ्यः क्लेशान् ... सहन्ते अनुभवन्ति, मेधावी धीमान् जनः तदंशेनापि तेषां क्लेशानां ... अंशेनापि तपः तप्त्वा तपसा कृत्वा सुखी ... भवेत् ॥ २० ॥

एतावदिति। यत् अनायत्तवृत्तिता न आयत्ता पराधीना ... वर्त्तनं यस्य, तस्य भावः, स्वाधीनता इत्यर्थः। एतावत् एतदेव ... साफल्यं जन्मनः जननस्य साफल्यं सफलता। ये पुरुषाः पराधीनतां ... अन्यस्य अधीनताम् आयत्ततां याताः ते यदि जीवन्ति तदा के ... मृताः मृत्युवशं गताः। ये पराधीनास्ते मृता एव इति भावः ॥२१॥

एहीति। एहि आगच्छ, गच्छ याहि। पत नीचगामी ... उत्तिष्ठ ऊर्ध्वगामी भव। वद कथय। मौनं मूकत्वं समाचर अनुतिष्ठ ... एवम् अनेन प्रकारेण आशाग्रहग्रस्तैः आशाकृपैव धनाभिलाषादि ... ग्रहेण कुम्भीरादि-जलजन्तुना ग्रस्तैः आक्रान्तैः अर्थिभिः ... भिक्षुभिः जनैरिति शेषः। धनिनः धनशालिनः क्रीडन्ति। ... वानरभल्लुकादिनर्त्तकाः आत्मविनोदार्थं वानरभल्लुकादिभिः क्रीडन्ति यथा इत्यर्थः ॥ २२ ॥

आत्मा संस्कृत्य संस्कृत्य परोपकरणीकृतः ॥ ३० ॥

अन्यच्च, या प्रकृत्यैव चपला निपतत्यशुचावपि ।

स्वामिनो बहु मन्यन्ते दृष्टिं तामपि सेवकाः ॥ ३१ ॥

विशेषतश्च,

प्रणमत्युन्नतिहेतोर्जीवितहेतोर्विमुञ्चति प्राणान् ।

दुःखीयति सुखहेतोः को मूढः सेवकादन्यः ॥ ३२ ॥

अपरञ्च, मौनान्मूर्खः प्रवचनपटुर्वातुलो जल्पको वा,

क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः ।

धृष्टः पार्श्वे वसति नियतं दूरतश्चाप्रगल्भः

सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ३३ ॥

यद्वैरिति । अबुधैः, न बुधा अबुधाः तैः, अज्ञानैः । अवि-नाशाय धनप्राप्तये वणिग्भिरिव वारविलासिनीभिरिव स्वयम् संस्कृत्य संस्कृत्य विशेषेण अलङ्कृत्य । आत्मा शरीरं परोपकरणीकृतः परेषां अन्येषाम् उपकरणतामापादितः ॥ ३० ॥

या प्रकृत्येति । या दृष्टिः, प्रकृत्या स्वभावेन एव चपला चञ्चला । या अशुचौ अपवित्रेऽपि वस्तुनि निपतति पतिता भवति । सेवकाः अन्याः स्वामिनो प्रभोः तामपि दृष्टिं, कृपादृष्टिमिति भावः । बहु मन्यन्ते प्रार्थयन्तीति भावः ॥ ३१ ॥

प्रणमतीति । उन्नतिहेतोः उत्कर्षनिमित्तम् उच्चपदलाभार्थमिति यावत् । प्रणमति आत्मानमवनतं करोति । जीवितहेतोः जीवनोपाय-निमित्तं प्राणान् जीवनं विमुञ्चति परित्यजति । सुखहेतोः सुखलाभ-मत्यासया दुःखीयति दुःखमनुभवति । सर्व्वेव सेवक इति शेषः । अतएव सेवकादन्यः अन्यात् भिन्नः को मूढः मूर्खः । न कोऽपि इत्यर्थः ॥ ३२ ॥

मौनादिति । मौनात् मौनावलम्बनात् मूर्खः मूढः । कथ्यते इति शेषः । प्रवचनपटुः प्रकृष्टवाक्य-प्रयोगकुशलः वातुलः उन्माद-ग्रस्तः, वा अथवा जल्पकः वाचालः । सर्व्वत्र उच्यते इति शेषः । क्षान्त्या क्षमया विशिष्टः विशेषणे तृतीया । क्षमाशील इत्यर्थः ।

दमनकोऽब्रवीत्, मित्र ! सर्वथा मनसापि नैतत् कर्त्तव्यम्

कथं नाम न सेव्यन्ते यत्नतः परमेश्वराः ।
अचिरेणैव ये तुष्टाः पूरयन्ति मनोरथान् ॥ २४

अन्यच्च, कुतः सेवाविहीनानां चामरोद्धूतसम्पदः ।
उद्दण्डधवलच्छत्रवाजिवारणवाहिनी ॥ २५ ॥

करटको ब्रूते, तथापि किमनेनाव्यापारेणास्माकम्
अव्यापारेषु व्यापारः सर्वथा परिहरणीयः ॥ २६ ॥

भीरुः भयशीलः । यदि न सहते असहिष्णुरित्यर्थः । प्रायशः प्रायेण न अभिजातः न विनीतः, उद्धत इत्यर्थः । धृष्टः प्रगल्भः नियतं सदा पार्श्वे निकटे वसति तिष्ठति । भर्त्तुरिति शेषः । अप्रगल्भः धृष्टताशून्यः दूरतः । न पार्श्वे वसतीत्यर्थः । परमगहनः अतीव दुरवगाहः सेवाधर्मः योगिनामपि योगयुक्तानामपि अगम्यः दुर्लभ्यः ॥ २३ ॥

दमनक इति । सर्व्वथा सर्व्वतोभावेन । एतत् मूर्त्तीनिर्दिष्टम् मन्तव्यम् । मनसापि हृदयेनापि न कर्त्तव्यम् न धारणीयम्

कथमिति । परमेश्वरा भर्त्तारः कथं नाम यत्नतः प्रयत्नेन सेव्यन्ते सेविता भवन्ति । अनुजीविभिरिति शेषः । यतः ये ईश्वराः तुष्टाः प्रीताः सन्तः अचिरेणैव अल्पकालेनैव मनोरथान् अभीष्टानि पूरयन्ति संसाधयन्ति ॥ २४ ॥

कुत इति । सेवाविहीनानां सेवया रहितानां जनानां सम्बन्धे चामरोद्धूतसम्पदः चामरेण चमरीपुच्छनिर्म्मितव्यजनेन उद्धूता विकारिताः सम्पदः ऐश्वर्य्यं कुतः ? न केनापि भवन्तीत्यर्थः । तथा उद्दण्डधवलच्छत्रवाजिवारणवाहिनी, उद्गता दण्डा येषां तानि उद्दण्डानि धवलानि छत्राणि आतपत्राणि, वाजयः अश्वाः, वारणानि हस्तिनः तैः सह वाहिनी सैन्यं च कुतः इति अनुवृत्तम् ॥ २५ ॥

करटक इति । अस्माकम् अनेन अव्यापारेण अनधिकारचर्चया किं ? किं फलं भविष्यतीत्यर्थः । अव्यापारेषु अनधिकारविषयेषु व्यापारः इच्छार्थं सर्व्वथा सर्व्वतोभावेन परिहरणीयः परित्याज्यः ॥ २६ ॥

यथा, अव्यापारेषु व्यापारं यो नरः कर्त्तुमिच्छति ।
स भूमौ निहतः शेते कीलोत्पाटीव वानरः ॥२७॥

दमनकः पृच्छति, कथमेतत् ? करटकः कथयति, अस्ति मगधदेशे धर्मारण्यसन्निहितवसुधायां शुभदत्तनाम्ना कायस्थेन विहारः कारयितुमारब्धः । तत्र करपत्रविदार्यमाणकाष्ठस्तम्भस्य कियद्दूरविदीर्णखण्डद्वयस्य मध्ये कीलकः सूत्रधारेण निहितः । तत्र च वनवासी महान् वानरयूथः क्रीडनार्थमागतः । तेष्वेको वानरः कालदण्डप्रेरित इव तं कीलकं हस्ताभ्यां धृत्वोपविष्टः । ततस्तस्य मुष्कद्वयं लम्बमानं काष्ठद्वयाभ्यन्तरे प्रविष्टम् । अनन्तरं सहजचपलतया महता प्रयत्नेन कीलकमाकृष्टवान् ।

अव्यापारेष्विति । यो नर अव्यापारेषु अनधिकृतविषयेषु व्यापारं व्यवहारं, कृत्यार्थमित्यर्थः । कर्त्तुं विधातुम् इच्छति अभिलषति, सः, कीलोत्पाटी कीलं कीलकम् उत्पाटयति उन्मूलयति यः सः कीलोत्पाटी वानर इव निहतः सन् विनष्टः सन् भूमौ शेते लुण्ठितो भवति ॥ २७ ॥

दमनक इति । धर्मारण्यसन्निहितवसुधायां, धर्मं धर्मपथम् अरण्यं वनं धर्मारण्यं तस्य सन्निहिता समीपवर्त्तिनी वसुधा भूमिः, तस्याम् । शुभदत्तनाम्ना शुभदत्तसंज्ञकेन कायस्थेन करण नामक जातिविशेषेण विहारः प्रमोदभूमिः कारयितुं उत्पादयितुम् आरब्ध उपक्रान्तः । तत्र विहारस्थाने । करपत्रविदार्यमाणकाष्ठस्तम्भस्य, करपत्रेण काष्ठविदारकास्त्रविशेषेण विदार्यमाणः पाट्यमानः यः काष्ठस्य स्तम्भः स्कन्धः, तस्य । कियद्दूरविदीर्णखण्डद्वयस्य कियद्दूरं विदीर्णं खण्डद्वयं यस्य तस्य । एतच्चैतत् यत्नेन छिद्यते कर्त्तेति ५४ छिन्नमेवास्य । एतत् धारयतीति सूत्रधारः शिल्पकरत्वेन निहितः प्रोथितः । वनवासी वने अरण्ये वसति अवतिष्ठते योऽसौ वनवासी ।

आकृष्टे सति काष्ठाभ्यां चूर्णिताण्डद्वयः पञ्चत्वं गतः। अतो ऽहं ब्रवीमि । अव्यापारेषु व्यापारमित्यादि । दमनो ब्रूते, तथापि स्वामिचेष्टानिरूपणं सेवकैः कर्त्तव्यम् । करटको ब्रूते, यः सर्व्वाधिकारे नियुक्तः प्रधानमन्त्री स करोतु । यतोऽनुजीविना पराधिकारचर्चा न कर्त्तव्या ॥ ३८ ॥

पश्य, पराधिकारचर्च्चां यः कुर्य्यात् स्वामिहितेच्छया ।
स विषीदति चीत्कारात् ताड़ितो गर्दभो यथा ॥ ३९ ॥

वानरयूथः वानरसङ्घः । क्रीड़नार्थं विहारार्थम् । आयातः आगतः । कालदण्डप्रेरित इव कालस्य यमस्य दण्डेन चालित इव । काष्ठभेदकदण्डखण्डं हस्ताभ्यां कराभ्यां धृत्वा गृहीत्वा । काष्ठद्वयस्य मध्ये विदीर्णकाष्ठाभ्यन्तरे इत्यर्थः । तथा स्वभावसिद्धचाञ्चल्येन हेतुना महता सातिशयेन । प्रयत्नेन ... । कीलकं काष्ठविदारकदण्डम् । आकृष्टवान् चकर्ष । चूर्णिताण्डद्वयः चूर्णितं खण्डखण्डीकृतम् अण्डद्वयं कोषयुगलं यस्य सः पञ्चत्वं गतः मृतः । तथापि अव्यापारेषु व्यापारकरणानौचित्येऽपि स्वामिचेष्टानिरूपणं स्वामिनः प्रभोः चेष्टायाः कार्य्याभिलाषस्य निरूपणं निर्णयः सेवकैः भृत्यैः कर्त्तव्यं विधेयम् । सर्व्वाधिकारे सर्व्वेषु कार्य्येषु अधिकारे विषये नियुक्तः कृतव्यापारः प्रधानमन्त्री श्रेष्ठसचिवः । अनुजीविना भृत्येन पराधिकारचर्चा परस्य अधिकारः पराधिकारः, तस्य चर्चा अनुशीलनम् । न कर्त्तव्या न विधेया ॥ ३८ ॥

पराधिकारेति । यो भृत्यः स्वामिहितेच्छया स्वामिनो भर्त्तुः हितस्य मङ्गलानुष्ठानस्य इच्छया अभिलाषेण पराधिकारचर्च्चां परस्य अधिकारः पराधिकारः, तस्य चर्च्चाम् अनुशीलनं कुर्य्यात् यथा चीत्कारेण शब्देन गर्द्दभः खरः ताड़ितः चालितः सन् विषीदति, तथा स विषीदति ॥ ३९ ॥

दमनकः पृच्छति, कथमेतत्? करटकः कथयति। अस्ति वाराणस्यां कर्पूरपटो नाम रजकः। स चैकदाभिनववयस्कया भार्य्यया सह चिरात् केलिं कृत्वा निर्भरं सुप्तः। तदनन्तरं द्रव्याणि हर्तुं तद्गृहं चौरः प्रविष्टः। तस्य प्राङ्गणे गर्द्दभो बद्धस्तिष्ठति। कुक्कुरश्चोपविष्टः। तं चौरमवलोक्य गर्द्दभः श्वानमाह, भवतोऽयं व्यापारः। तत् किमिति त्वमुच्चैः शब्दं कृत्वा स्वामिनं न जागरयसि? कुक्कुरो ब्रूते, नियोगस्यास्य चिन्ता त्वया न कार्य्या। त्वमेव जानासि यथाहमस्य गृहरक्षां करोमि। यतोऽयं चिरान्निर्वृतो ममोपयोगं न जानाति। तेनाधुना ममाहारदानेऽपि मन्दादरः। विना विधुरदर्शनं स्वामिनोऽनुजीविषु मन्दादरा भवन्ति। गर्द्दभो ब्रूते, शृणु रे वर्व्वर! ॥४०॥

अस्तीति। अभिनववयस्कया अभिनवं तरुणं वयो यस्याः तया भार्य्यया पत्न्या, केलिं सङ्गमम्। कृत्वा सम्पाद्य। निर्भरं गाढ़ं सुप्तो निद्रितः। द्रव्याणि भोजनपात्रादीनि। हर्त्तुम् अपहर्त्तुम्। प्राङ्गणे चत्वरे। गर्द्दभः खरः। बद्धः संयतः। अवलोक्य दृष्ट्वा। श्वानं कुक्कुरम्। व्यापारः कार्य्यम्। किमिति किमर्थम्। न जागरयसि न प्रबुद्धं करोषि। अस्य नियोगस्य अधिकारस्य चिन्ता अनुध्यानम्। कार्य्या विधेया। गृहरक्षां गृहस्य चौरादिभ्यो रक्षणं करोमि तज्जानासि। चिरात् बहुकालावधि, निर्वृतः चिन्तारहितः। उपयोगम् उपयोगिताम् प्रयोजनमित्यर्थः। आहारदाने भोजनप्रदाने। मन्दादरः मन्दः शिथिलः आदरः समादरो यस्य सः। विधुरदर्शनं विधुरस्य कातरताकारणस्य भयस्येत्यर्थः। दर्शनं साक्षात् करणम्। विना व्यतिरेकेण स्वामिनो भर्त्तारः अनुजीविषु भृत्यवर्गेषु मन्दादराः अनादरा भवन्ति। वर्व्वर! मूढ़! ॥ ४० ॥

जायते इति। यः कार्य्यकाले धर्म्मसम्पादनसमये जायते प्रार्थ-

याचते कार्य्यकाले यः स किं भृत्यः स किं सुहृत्?

कुक्कुरो ब्रूते,

यो न सम्भावयेद् भृत्यान् कार्य्यकाले स किं प्रभुः? ॥४१

किञ्च, आश्रितानां भृतौ स्वामिसेवायां धर्म्मसेवने।

पुत्त्रस्योत्पादने चैव न सन्ति प्रतिहस्तकाः ॥ ४२

ततो गर्द्दभः सकोपमाह, आः पापीयांस्त्वं, स्वामिकार्य्योपेक्षां करोषि। भवतु, यथा स्वामी जागर्ति तथा मया कर्त्तव्यम् ॥ ४३ ॥

यतः, पृष्ठतः सेवयेदर्कं जठरेण हुताशनम्।

स्वामिनं सर्वभावेन परलोकममायया ॥ ४४ ॥

इत्युक्त्वा स अतीव चीत्कारं कृतवान्। ततः स रजक

यते। स किंभृत्यः कुत्सितभृत्यः। स किंसुहृत् कुत्सितमित्रम्। यो जनः कार्य्यकाले भृत्यान् अनुजीविनः न सम्भावयेत् सम्मानयेत्, किंप्रभुः, अथवा स किं प्रभुः? अपितु न प्रभुरित्यर्थः ॥ ४१ ॥

आश्रितानामिति। आश्रितानां शरणागतानां भृतौ भरणे, स्वामिसेवायां स्वामिनो भर्त्तुः सेवायां सेवने, धर्म्मसेवने धर्म्माणां पारलौकिककार्य्याणां सेवने अनुष्ठाने, पुत्त्रस्य सन्तानस्य उत्पादने जनने चैव प्रतिहस्तकाः प्रतिनिधयः न सन्ति न भवन्ति ॥ ४२ ॥

तत इति। सकोपं कोपेन रोषेण सह। पापीयान् पापिष्ठः। स्वामिकार्य्योपेक्षां स्वामिनो भर्त्तुः कार्य्ये उपेक्षाम् औदासीन्यम्। यथा येन उपायेन स्वामी भर्त्ता जागर्त्ति निद्रां परित्यजति तथा तादृशम् मया कर्त्तव्यम् ॥ ४३ ॥

पृष्ठत इति। अर्कं सूर्य्यं पृष्ठतः पृष्ठेन सेवयेत् पृष्ठेन रौद्रं गृह्णीयादित्यर्थः। जठरेण उदरेण हुताशनं अग्निम् अश्नातीति हु... वह्निम्। सर्व्वभावेन सर्व्वतोभावेन सर्व्वोपायेन वा स्वामि... अमायया अकपटेन परलोकं पारलौकिकानुष्ठानं सेवयेत् ॥ ४४ ॥

न चीत्कारेण प्रबुद्धो निद्राविमर्दकोपादुत्थाय गर्दभं गुडेन ताडयामास। ततस्तेन ताडनेन गर्दभः पञ्चत्वं गतः। अतोऽहं ब्रवीमि, पराधिकारचर्चामित्यादि। पश्य, पशूनामन्वेषणमस्माकं नियोगः। अतः स्वनियोगस्यैव चर्चा क्रियताम्। विमृश्य। किन्त्वद्य तथापि चर्चया न प्रयोजनम्, यतः, आवयोर्भक्षितशेषाहारः प्रचुरः तिष्ठति। दमनकः सरोषमाह, कथमाहारमात्रार्थी भवान् नृपं सेवते? सेवकेन एतदयुक्तमुक्तम् ॥४५॥ यतः,

सुहृदामुपकारकारणात् द्विषतामप्यपकारकारणात्।
नृपसंश्रय इष्यते बुधैर्जठरं को न बिभर्त्ति केवलम् ॥४६॥

इतीति। इति एवम् उक्त्वा कथयित्वा चीत्कारम् उच्चरवम्। प्रबुद्धः जागरितः। निद्राविमर्दकोपात् निद्राया विमर्दः व्याघातः तेन यः कोपस्तस्मात्। उत्थाय शय्यां परित्यज्य गर्दभं रासभं लगुडेन यष्ट्या ताडयामास प्रहृतवान्। ताडनेन प्रहारेण पञ्चत्वं गतः मृतः। पशूनां हरिणादीनाम् अन्वेषणम् अनुसन्धानम् अस्माकं नियोगः। अधिकृतकर्म। अतः कारणात् स्वनियोगस्य आत्माधिकारस्य चर्चा अनुशीलनं क्रियताम् अनुष्ठीयताम्। विमृश्य विविच्य। अद्य वर्तमाने दिवसे तया चर्चया अनुशीलनेन न प्रयोजनं कार्यम्। भक्षितशेषाहारः भक्षितस्य भुक्तस्य शेषः अवशिष्टः आहारः भक्ष्यद्रव्यं प्रचुरः पर्याप्तः तिष्ठति वर्तते। सरोषं सकोपम्। आहारमात्रार्थी आहारमात्रं भोजनमात्रम् अर्थयति प्रार्थयते योऽसौ। सेवकेन परिचारकेण अयुक्तं न्यायविरुद्धम् उक्तं कथितम् ॥ ४५ ॥

सुहृदामिति। सुहृदाम् आत्मीयानाम् उपकारकारणात् उपकृतिनिमित्तं द्विषतां शत्रूणाम् अपकारकारणात् अनिष्टाचरणनिमित्तं बुधैः पण्डितैः नृपसंश्रयः नृपस्य राज्ञः संश्रयः आश्रयः इष्यते प्रार्थ्यते को जनः केवलम् एकमात्रं जठरं निजोदरं न बिभर्त्ति न पूरयति सर्वं एव येन केनापि स्वोदरं पूरयन्तीति भावः ॥ ४६ ॥

जीविते यस्य जीवन्ति विप्रा मित्राणि बान्धवाः।
सफलं जीवितं तस्य आत्मार्थे को न जीवति?॥१७॥

यस्मिन् जीवति जीवन्ति बहवः स तु जीवतु।
काकोऽपि किं न कुरुते चञ्च्वा स्वोदरपूरणम्?॥१८॥

पशुभिर्याति दासत्वं पुराणैः कोऽपि मानवः।
कोऽपि लक्षैः कृती कोऽपि लक्षैरपि न लभ्यते॥१९॥

मनुष्यजातौ तुल्यायां भृत्यत्वमतिगर्हितम्।
प्रथमो यो न तत्रापि स किं जीवत्सु गण्यते?॥२०॥

तथा चोक्तम्, वाजिवारणलोहानां काष्ठपाषाणवाससाम्

जीविते इति। यस्य जीविते जीवने सति, विप्राः [illegible] मित्राणि सुहृदः, बान्धवाः ज्ञातयश्च जीवन्ति जीवं [illegible] तस्य जीवितं जीवनधारणं सफलं सार्थकम्। अन्येषां [illegible] जीवतीति भावः॥१७॥

यस्मिन्निति। यस्मिन् जने जीवति प्राणान् धारयति सति [illegible] जनाः, अनुजीविन इत्यर्थः। जीवन्ति स तु जीवतु। तथाहि [illegible] अपि काकोऽपि किं चञ्च्वा स्वचञ्च्वा स्वोदरपूरणं न कुरुते [illegible] आत्मोदरं पूरयतीति भावः॥१८॥

पशुभिरिति। कोऽपि मानवो मनुष्यः पशुभिः [illegible] पुराणैः पणैः दासत्वं दासभावं याति गच्छति। कोऽपि [illegible] [illegible] पुराणैरित्यर्थः, कृतः दासीकृतः। कोऽपि महात्मा [illegible] न लभ्यते॥१९॥

मनुष्यजाताविति। मनुष्यजातौ तुल्यायां सर्वसाधारण्येऽपि [illegible] भृत्यत्वं दासभावः अतिगर्हितम् अतीवनिन्दितम्, [illegible] यो जनः न प्रथमः न प्रभुः, सोऽपि [illegible] जीवत्सु जीवितमनुष्यमध्ये गण्यते? गण्यते

नारीपुरुषतोयानामन्तरं महदन्तरम् ॥ ५१ ॥

ा हि, अल्पस्नायुवसावशेषमलिनं निर्मांसमप्यस्थिकम्
॥ लब्ध्वा परितोषमेति न च तत्तस्य क्षुधाशान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
र्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम् ॥५२॥

तरञ्च, पश्य सेव्यसेवकयोरन्तरम् ।

लाङ्गूलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनं च ।
श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ॥ ५३ ॥

वाजीति । वाजिवारणलोहानां अश्वद्विपायसां काष्ठपाषाण-
वस्त्राणां दारुप्रस्तरवस्त्राणां नारीपुरुषतोयानां रमणीपुरुषजलानाम्
अन्तरं परस्परभेदः महदन्तरं अतीव दूरतरम् ॥ ५१ ॥

अल्पेति । श्वा कुक्कुरः अल्पस्नायुवसावशेषमलिनम् अल्पाना स्नायु-
नाम सूक्ष्मशिराणां वसायाः मेदसः अवशेषः
परिणामः तेन मलिनं विकृतं निर्मांसं मांसशून्यम् अपि अस्थिकम्
अस्थि लब्ध्वा आस्वाद्य परितोषम् एति परितुष्टो भवतीत्यर्थः, च किन्तु
तु अस्थि तस्य पुनः क्षुधाशान्तये क्षुन्निवृत्तये न भवतीति शेषः । सिंहः
मृगेन्द्रः अङ्कमागतं क्रोडे उपस्थितमपि जम्बुकं शृगालं त्यक्त्वा परि-
त्यज्य द्विपं करिणं निहन्ति घातयति । सर्वो जनः कृच्छ्रगतोऽपि कष्टा-
वस्थां प्राप्तोऽपि सत्त्वानुरूपं निजबलसदृशं फलं वाञ्छति अभि-
लषति ॥ ५२ ॥

पश्येति । सेव्यसेवकयोः प्रभुभृत्ययोः अन्तरं तारतम्यम् ।

लाङ्गूलेति । श्वा कुक्कुरः पिण्डदस्य अन्नदातुः समीपे लाङ्गूल-
चालनं लाङ्गूलस्य पुच्छस्य चालनम् अधः निम्नदेशे चरणावपातं चरणयोः
पादयोः अवपातं पतनं, भूमौ भूतले निपत्य पतित्वा वदनोदरदर्शनं

जीविते यस्य जीवन्ति विप्रा मित्राणि बान्धवाः।
सफलं जीवितं तस्य आत्मार्थे को न जीवति ॥
यस्मिन् जीवति जीवन्ति बहवः स तु जीवतु।
काकोऽपि किं न कुरुते चञ्च्वा स्वोदरपूरणम् ॥
...यस्य पञ्चभिर्याति दासत्वं पुराणैः कोऽपि मानवः।
कोऽपि लक्षैः कृती कोऽपि लक्षैरपि न लभ्यते ॥
...तः मनुष्यजातौ तुल्यायां भृत्यत्वमतिगर्हितम्।
प्रथमो यो न तत्रापि सोऽपि जीवत्सु गण्य...
...चीनम्, शाक्तिवारणाक्षेशानां कातरपात...

जीविते इति। यस्य जीविते जीवने सति, विप्राः
...पि बान्धवाः, बान्धवाः सपिण्डादयः जीवन्ति जीव...
जीवितं जीवनधारणं सफलं सार्थकम्। आत्मार्थे
...भावः ॥ १७ ॥
यस्मिन्निति। यस्मिन् जने जीवति प्राणान् धारयति सति
...नुजीविन इत्यर्थः। जीवन्ति स तु जीवतु। तथाहि
काकोऽपि किं चञ्च्वा त्रोट्या स्वोदरपूरणं न कुरुते।
...पूरयन्तीति भावः ॥ १८ ॥
...भिरिति। कोऽपि मानवो मनुष्यः पञ्चभिः पञ्चसं...
...दासत्वं दासभावं याति गच्छति। कोऽपि जनः...
...पुराणैरित्यर्थः, ततः दासीकृतः। कोऽपि महात्मा...
...ते ॥ १९ ॥
...तायामिति। मनुष्यजातौ तुल्यायां सर्वसाधारणेऽभूतायां
...भृत्यत्वं दासभावः अतिगर्हितम् अतीवनिन्दितम्, तत्रापि
...मः न प्रभुः, सोऽपि अधमः
...मनुष्यमध्ये गण्यते? गण्यते

नारीपुरुषतोयानामन्तरं महदन्तरम् ॥ ५१ ॥

यथा हि, अल्पस्नायुवसावशेषमलिनं निर्मांसमप्यस्थिकम्
श्वा लब्ध्वा परितोषमेति न च तत्तस्य क्षुधाशान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम् ॥ ५२ ॥

अपरञ्च, पश्य सेव्यसेवकयोरन्तरम् ।

लाङ्गूलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनं च ।
श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ॥ ५३ ॥

वाजीति । वाजिवारणलोहानां अश्वहस्तिपाषाणानां काष्ठपाषाण-वस्त्राणां दारुपाषाणवस्त्राणां नारीपुरुषतोयानां रमणीपुरुषजलानाम् अन्तरं परस्परभेदः महदन्तरं अतीव दूरतरम् ॥ ५१ ॥

अल्पेति । श्वा कुक्कुरः अल्पस्नायुवसावशेषमलिनम् अल्पाभिः स्नायु-भिः अल्पाभिः वसाभिः शरीरस्थस्नेहपदार्थविशेषाभ्याञ्च यः अवशेषः अवशिष्टांशः तेन मलिनं विकृतं निर्मांसं मांसशून्यम् अपि अस्थिकम् अस्थि लब्ध्वा आस्वाद्य परितोषम् एति परितुष्टो भवति, न किन्तु अस्थि तस्य पुनः क्षुधाशान्तये क्षुन्निवृत्त्यै न भवतीति शेषः । सिंहः शार्दूलः अङ्कमागतं क्रोडे उपस्थितमपि जम्बुकं शृगालं त्यक्त्वा परि-हृत्य द्विपं हस्तिनं निहन्ति घातयति । सर्वो जनः कृच्छ्रगतोऽपि कष्टा-वस्थां प्राप्तोऽपि सत्त्वानुरूपं निजबलसदृशं फलं वाञ्छति अभि-लषति ॥ ५२ ॥

अपरमिति । सेव्यसेवकयोः प्रभुभृत्ययोः अन्तरं तारतम्यम् ।

लाङ्गूलेति । श्वा कुक्कुरः पिण्डदस्य अन्नदातुः कृते लाङ्गूल-चालनं लाङ्गूलस्य पुच्छस्य चालनम् अधो निम्ने चरणावपातं चरणयोः पादयोः अवपातं पतनं, भूमौ भूतले निपत्य पतित्वा वदनोदरदर्शनं

किञ्च, यज्जीव्यते क्षणमपि प्रथितं मनुष्यै-

र्विज्ञानविक्रमयशोभिरभज्यमानम् ।

तन्नाम जीवितमिह प्रवदन्ति तज्ज्ञाः

काकोऽपि जीवति चिराय बलिं च भुङ्क्ते ॥

अपरञ्च अहितहितविचारशून्यबुद्धेः

श्रुतिविषयैर्बहुभिर्बहिष्कृतस्य ।

उदरभरणमात्रकेवलेच्छोः

पुरुषपशोश्च पशोश्च को विशेषः ? ॥

करटको ब्रूते । आवां तावदप्रधानौ, तद

तस्य प्रभोः अनादरस्य समादराभावस्य दर्शनम् अवलोकनञ्च कुरु
दयति । गजपुङ्गवस्तु धीरं गम्भीरं विलोकयति पश्यति, ।
शेषः । चाटुशतैश्च बहुप्रियवाक्यैश्च भुङ्क्ते भोग्यवस्तूनीति शेषः
यज्जीव्यत इति । यत् जीवितं जीवनं विज्ञानविक्रम
विज्ञानं दर्शनशास्त्रविषयकं ज्ञानं, विक्रमः पराक्रमः, यशः कर्
तैः अभज्यमानम् अकुण्ठ्यमानम् अतएव प्रथितं विख्यातं यद्
अल्पकालमपि मनुष्यैर्जीव्यते जीवनम् अपवाह्यते, इह लोके
तद्विषयकज्ञानसम्पन्नाः पण्डिता इत्यर्थः । तन्नाम जीवितं जीवनं प्र
कथयन्ति । अन्यथा काकोऽपि वायसोऽपि चिराय बहुकालं
बलिञ्च पूजोपहारञ्च भुङ्क्ते अश्नाति ॥ ५४ ॥
अहितहितेति । अहितहितविचारशून्यबुद्धेः अहितस्य
करकार्यस्य हितस्य श्रेयस्करकार्यस्य तयोर्विचारशून्याः विवेक
बुद्धिर्यस्य तस्य बहुभिः श्रुतिविषयैः वेदविहितकार्यैः बहि
रहितस्येत्यर्थः । उदरभरणमात्रकेवलेच्छोः उदरभरणमात्रे उदरपूर्ति
केवला इच्छा वाञ्छा यस्य तस्य, पुरुषपशोः पुरुषेषु मध्ये पशोः
पशोश्च पशुगर्भसम्भूतजीवस्य च को विशेषः को भेदः ॥ ५५ ॥
करटक इति । अप्रधानौ नीचपदे स्थापितौ । विचारणया वि

नया विचारणया ? दमनकः पुनराह, कियता कालेना-
यः प्रधानतामप्रधानतां वा लभेत ॥ ५६ ॥ यतः,

स्यचित् कश्चिदिह स्वभावाद्भवत्युदारोऽभिमतः खलो वा ।
के गुरुत्वं विपरीततां वा स्वचेष्टितान्येव नरं नयन्ति ॥५७॥

श, आरोप्यते शिला शैले यत्नेन महता यथा ।
निपात्यते क्षणेनाधस्तथात्मा गुणदोषयोः ॥ ५८ ॥

द् । स्वयत्नायत्तो ह्यात्मा सर्वस्य ॥ ५९ ॥

यात्यधोऽधो व्रजत्युच्चैर्नरः स्वैरेव कर्मभिः ।
कूपस्य खनिता यद्वत् प्राकारस्येव कारकः ॥ ६० ॥

करटको वदति, अथ भवान् किं ब्रवीति ? दमनक आह,
यं तावत् स्वामी पिङ्गलकः पानीयमपीत्वा कुतोऽपि भयात्

— । अप्रधानः पश्चिम । प्रधानता श्रेष्ठताम् । अप्रधानतां हीनताम् ॥५६॥
न कस्यचिदिति । इह जगति कश्चित् जनः कस्यचित् जनस्य सम्बन्धे
भावात् प्रकृत्यनुसारेण उदारः औदार्यसम्पन्न, अभिमतः प्रियः, खलो वा
दो वा न भवति । परन्तु लोके स्वचेष्टितान्येव आत्मव्यवहारा एव नरं
मुष्यं गुरुत्वं गौरवं विपरीततां वैपरीत्यं, लाघवमित्यर्थः । वा नयन्ति
[illegible]वन्ति ॥ ५७ ॥

आरोप्यत इति । शिला प्रस्तरः यथा महता यत्नेन, अतीव प्रयासेनेत्यर्थः ।
शैले पर्वते आरोप्यते उद्धीयते, यथा क्षणेन अधो निम्ने निपात्यते, द्वितीय
[illegible]ः । गुणदोषयोः सम्बन्धे आत्मा जीवः तथा तद्रूप एव भवति ॥ ५८ ॥
[illegible] तदुक्तेति । स्वयत्नायत्त स्वस्य निजस्य यो यत्नः प्रयासः तस्य आयत्तः
[illegible]धीनः ॥५९॥

[illegible] यातीति । नरो मनुष्यः स्वैर्निजैरेव कर्मभिः व्यवहारैः अधोऽधः निम्नात्
[illegible]स्थानं याति एवं उच्चैः उच्चादुच्चतरस्थानमित्यर्थः । याति गच्छति, अत्र
[illegible]दृष्टान्तमाह, कूपस्येति । यद्वत् कूपस्य खनिता खनकः, तद्वत् प्राकारस्य
[illegible]स्यैव कारकः निर्माता । कूपस्य खनकः क्रमशः निम्नात् निम्नतरस्थानं
[illegible]ति, प्राकारनिर्माता तु उच्चादुच्चतरस्थानं गच्छतीति भावः ॥ ६० ॥
करटक इति । कुतोऽपि कस्मादपि । भयात् भीतात् । सविर्द्व सभयम् ।

सचकितं परिक्रम्योपविष्टः। करटको ब्रूते, किं तत्र जानासि? दमनको वदति, किं प्रज्ञावतामविदितमस्ति॥

उक्तञ्च, उदीरितोऽर्थः पशुनापि गृह्यते

हयाश्च नागाश्च वहन्ति देशिताः।

अनुक्तमप्यूहति पण्डितो जनः

परेङ्गितज्ञानफला हि बुद्धयः॥ ६२॥

अपि च, आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च।

नेत्रवक्त्रविकारेण लक्ष्यतेऽन्तर्गतं मनः॥ ६३

तदत्र भयप्रस्तावेऽहमेनं प्रज्ञाबलेनात्मीयं करिष्यामि॥ ६४

यतः, प्रस्तावसदृशं वाक्यं सद्भावसदृशं प्रियम्।

आत्मशक्तिसमं कोपं यो जानाति स पण्डितः॥ ६५

परिक्रम्य प्रतिनिवृत्य। उपविष्टः आसीनः। प्रज्ञावतां बुद्धिमताम्। अवि-
ज्ञातम्॥ ६१॥

उदीरित इति। उदीरितः कथितः अर्थो विषयः पशुनापि अ-
ज्ञानिनापि गृह्यते अनुभूयते। देशिताः बोधिताः हयाः अश्वाः
हस्तिनश्च वहन्ति रथादिकं स्थानान्तरं नयन्ति। पण्डितः विचक्षणो
लोकः अनुक्तमपि अकथितमपि विषयमिति शेषः। ऊहति तर्कयति
हि यतः बुद्धयः परेङ्गितज्ञानफलाः परेषाम् अन्येषाम् इङ्गितज्ञानं चे-
ष्टा फलं यासां तादृशो भवन्ति इति शेषः॥ ६२॥

आकारैरिति। आकारैः आकृतिभिः, इङ्गितैः चेष्टाविशेषैः,
गत्या गमनेन, चेष्टया इन्द्रियव्यापारैः, भाषणेन वाक्यकथनेन, नेत्र-
योः नयनयोः वक्त्रस्य मुखस्य च विकारेण भङ्ग्या अन्तर्गतं
मनः लक्ष्यते ज्ञायते॥ ६३॥

तदिति। अत्र अस्मिन्, भयप्रस्तावे भीतिस्थले, अहं प्रज्ञाबलेन ए-
नं पिङ्गलकम् आत्मीयम् आयत्तं करिष्यामि॥ ६४॥

प्रस्तावसदृशमिति। यो जनः प्रस्तावसदृशं प्रस्तावानुरूपं, वाक्यं
सद्भावानुरूपं, प्रियं प्रियानुष्ठानं आत्मशक्तिसमं निजशक्त्यनुरूपं
कोपं जानाति, स पण्डितः विज्ञः॥ ६५॥

करटको वदति, सखे! त्वं सेवानभिज्ञः ६६। पश्य,

अनाहूतो विशेद् यस्तु अपृष्टो बहु भाषते।
आत्मानं मन्यते प्रीतं भूपालस्य स दुर्मतिः॥ ६७॥

दमनको ब्रूते, भद्र! कथमहं सेवानभिज्ञः? पश्य,

किमप्यस्ति स्वभावेन सुन्दरं वाप्यसुन्दरम्।
यदेव रोचते यस्मै भवेत् तत्तस्य सुन्दरम्॥ ६८॥

अन्यच्च, यस्य यस्य हि यो भावस्तेन तेन हितं नरम्।
अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत्॥ ६९॥

अन्यच्च, कोऽत्रेत्यहमिति ब्रूयात् सम्यगादेशयेति च।
आज्ञामवितथां कुर्यात् यथाशक्ति महीपतेः॥ ७०॥

अपि च, अल्पेच्छुर्धृतिमान् प्राज्ञश्छायेवानुगतः सदा।

करटक इति। सेवानभिज्ञः न अभिजानातीति अनभिज्ञः, सेवायां [illegible] अनभिज्ञः ६६।

अनाहूत इति। यः, सेवक इति शेषः। अनाहूतः अनाकारितोऽपि [illegible] प्रविशति, प्रभुसन्निधिमिति शेषः। यः अपृष्टः अजिज्ञासितोऽपि बहु [illegible] भाषते जल्पति, सः आत्मानं भूपालस्य राज्ञः प्रीतं प्रीतिपात्रं मन्यते [illegible], सः दुर्मतिः मूढः॥ ६७॥

किमपीति। स्वभावेन प्रकृत्या सुन्दरं मनोहरम् असुन्दरं कुत्सितं वापि [illegible] अस्ति? नापि किञ्चिदपि नास्तीत्यर्थः। यदेव यस्मै रोचते, तदेव तस्य सुन्दरं मनोहारि। अत्र यस्मै इति रुच्यर्थयोगे चतुर्थी॥ ६८॥

यस्येति। मेधावी [illegible] जनः यस्य यस्य जनस्य यो भावः स्वभावः, तेन भावेन तं नरम् अनुप्रविश्य [illegible] भूत्वा इत्यर्थः। क्षिप्रम् आत्मवशं निजायत्ततां नयेत् प्रापयेत्। [illegible] कुर्यादित्यर्थः॥ ६९॥

कोऽत्रेति। अत्र कः इति प्रश्ने इति शेषः। अहम्, [illegible]। [illegible] आदेशय आज्ञापय इति च ब्रूयात् वदेत्। यथा-[illegible] महीपतेः राज्ञः आज्ञाम् आदेशम् अवितथाम् [illegible] [illegible]॥ ७०॥

अल्पेच्छुरिति। यः अल्पेच्छुः [illegible], [illegible]

प्रविष्टो न विरक्तेन न रागवर्जितं ब्रूयात्॥ ७१॥

करटको ब्रूते, कदाचिद् नाप्रस्तावप्रवेशात् स्वामी। दमनक आह, भद्र नैव। नानापृष्टेनापि प्रभुहितं अवश्यं करणीयम् ७२।

यतः, दोषभीतेरनारम्भः कापुरुषस्य लक्षणम्।
कैरजीर्णभयाद्भ्रातर्भोजनं परिहीयते॥ ७३॥

अन्यच्च, आसन्नमेव नृपतिर्भजते मनुष्यं
विद्याविहीनमकुलीनमसंस्कृतं वा।
प्रायेण भूमिपतयः प्रमदा लताश्च
यः पार्श्वतो भवति तं परिवेष्टयन्ति॥ ७४॥

करटको ब्रूते, अथ तत्र गत्वा किं वक्ष्यसि? दमनक आह, शृणु किमनुरक्तो विरक्तो वा मयि स्वामीति ज्ञास्ये तावत् पैङ्गलावी। प्राह: [illegible]। यदा सर्वदा [illegible] अनुगता अनुगामी। तत्र [illegible] न विरक्तेन न रागवर्जितं [illegible], न कर्त्तव्याकर्त्तव्यं विचारविदग्धः। न रागवर्जितं रागवर्जितो [illegible] पुरुष एव राजसन्निधाने स्थातव्यमिति भेदः॥ ७१॥

करटक इति। अनवसरे अप्रस्तावे प्रवेशात् उपस्थानात् स्वामी [illegible] कदाचित् तान् अवमन्यते अवमानयतीत्यर्थः। अप्रस्तावे गमनेन [illegible] कुपिताः भवन्तीति भावः। अपृष्टेनापि प्रश्नेन [illegible] स्वामिहितं अवश्यं करणीयं विधेयम्॥ ७२॥

दोषभीतेरिति। भ्रातः! दोषभीतेः अनिष्टापातभयात्, अनारम्भः [illegible] कार्याणां कापुरुषस्य अधमस्य [illegible] लक्षणम्। अजीर्णभयात् अपरिपाक [illegible] भोजनम् आहारः परिहीयते परित्यज्यते॥ ७३॥

आसन्नमिति। नृपतिर्भूपालः विद्याविहीनं मूर्खम्, अकुलीनं दुष्कुलजातम्, असंस्कृतं अलङ्कारविहीनं वा आसन्नमेव समीपवर्त्तिनमेव जनं [illegible] भजते अनुगृह्णाति, तथाहि भूमिपतयः राजानः, प्रमदाः स्त्रियः [illegible] च यः पार्श्वतो भवति समीपे तिष्ठति, तं परिवेष्टयन्ति आश्रयन्ति

करटक इति। किं वक्ष्यसि किं कथयिष्यसि। अनुरक्तः [illegible]

करटको ब्रूते किं तज्ज्ञानलक्षणम्? दमनको ब्रूते, शृणु । ७५

दूरादवेक्षणं हासः सम्प्रश्ने सादरो भृशम् ।
परोक्षेऽपि गुणश्लाघा स्मरणं प्रियवस्तुषु ।
तत्सेवकेऽनुरक्तिश्च दानं प्रीतिविवर्द्धनम् ।
सुरक्तेश्वरचिह्नानि दोषेऽपि गुणसंग्रहः ॥ ७६ ॥
कालयापनमाशानां वर्द्धनं फलखण्डनम् ।
विरक्तेश्वरचिह्नानि जानीयान्मतिमान् नरः ॥ ७७ ॥

एतज्ज्ञात्वा यथा चायं मदायत्तो भविष्यति, तद्वदामि । यथा,

अपायसन्दर्शनजां विपत्तिमुपायसन्दर्शनजां च सिद्धिम् ।
मेधाविनो नीतिविधिप्रयुक्तां पुरः स्फुरन्तीमिव दर्शयन्ति ॥७८॥

अनुरक्त इत्यर्थः । विरक्तः असन्तुष्टः । तज्ज्ञानलक्षणं तयोः अनुरागविरागयोः ज्ञानस्य बोधस्य लक्षणं चिह्नं किम् ॥ ७५ ॥

दूरादिति । दूरात् दूरतरप्रदेशात् अवेक्षणं दर्शनं; हासः हास्यं, सम्प्रश्ने जिज्ञासायां, भृशम् अत्यर्थम्, सादरः समादरः, परोक्षेऽपि असमक्षेऽपि, गुणश्लाघा गुणानां प्रशंसा, प्रियवस्तुषु अभीष्टद्रव्यादिषु, उपस्थितेष्विति शेषः । स्मरणं स्मृतिः, तत्सेवके तस्मिन् भृत्ये, अनुरक्तिः अनुरागः, दानं द्रव्यादिप्रतिपादनं, प्रीतिवर्द्धनं सन्तोषसाधनं, दोषेऽपि दूषितकर्मानुष्ठानेऽपि, गुणसंग्रहः गुणग्रहणम् । एतानि सुरक्तेश्वरचिह्नानि, सुरक्तस्य सम्यगनुरागयुक्तस्य ईश्वरस्य प्रभोः चिह्नानि लक्षणानि ॥ ७६ ॥

कालयापनमिति । कालयापनं प्रार्थितविषये समयक्षेपणं, आशानां प्रत्याशानां वर्द्धनं वृद्धिकरणं, फलखण्डनं फलस्य प्रत्यादिकस्य वस्तुनः अप्रदानं बाधनं मतिमान् बुद्धिमान्, नरो जनः एतानि विरक्तेश्वरचिह्नानि विरक्तस्य विरागयुक्तस्य ईश्वरस्य चिह्नानि जानीयात् अनुभवेत् ॥ ७७ ॥

एतदिति । मम आयत्तः अनुवर्त्तीत्यर्थः । तत् वक्ष्यामि वर्णयिष्यामि ।

अपायेति । मेधाविनः नीतिशास्त्रविदुषाः नीतिविधि प्रयुक्तां यथाविधानेनानुष्ठिताम्, अपायसन्दर्शनजाम् अपायस्य अन्यायाचरणस्य सन्दर्शनजाम् आविर्भावेनोत्पन्नां, विपत्तिं विपदम्, उपायसन्दर्शनजाम् उपायोद्भावनप्रभवाम् सिद्धिं सफलतां, पुरः अग्रे स्फुरन्तीमिव प्रदीप्तामिव दर्शयन्ति लोकयन्ति ॥७८॥

अपरस्य, दोषा गुणा, गुणा दोषा, दोषा दोषा, गुणा गुणाः

रक्ते, विरक्ते, मध्यस्थे, स्वामिनि त्रिविधा गुणाः ॥७९॥

करटको ब्रूते, "तथाप्यप्राप्ते प्रस्तावे न वक्तुमर्हसि । यतः,

अप्राप्तकालवचनं बृहस्पतिरपि ब्रुवन् ।

प्राप्नुयाद्बुद्ध्यवज्ञानमपमानं च शाश्वतम् ॥ ८० ॥

दमनकोऽब्रवीत्, मित्र ! मा भैषीः । नाहमप्राप्तावसरं वचनं वक्ष्यामि । यतः,

आपद्युन्मार्गगमने कार्य्यकालात्ययेषु च ।

अपृष्टेनापि वक्तव्यं भृत्येन हितमिच्छता ॥ ८१ ॥

दोषा इति । दोषाः विरुद्धव्यापाराः, गुणा गुणवत् प्रतीयन्ते । गुणाः दोषवत् प्रतीयन्ते इत्यर्थः । दोषाः दोषाः दोषरूपेणैव दृश्यन्ते इत्यर्थः । गुणाः गुणाः गुणस्वरूपेण लक्ष्यन्ते इत्यर्थः । रक्ते अनुरक्ते, विरक्ते विरागशालिनि, मध्यस्थे अनुरागविरागशून्ये च, स्वामिनि प्रभौ, त्रिविधा गुणाः दृश्यन्ते इति शेषः । अनुरक्ते स्वामिनि, दोषा अपि गुणायन्ते, विरक्ते स्वामिनि गुणाःअपि दोषायन्ते, मध्यस्थे स्वामिनि दोषा दोषायन्ते, गुणा एव गुणायन्ते इति भावः ॥ ७९ ॥

तथापीति । अप्राप्ते अनुपस्थिते, प्रस्तावे विषये न वक्तुमर्हसि न किमपि कथयितुं योग्यो भवसि ।

अप्राप्तेति । अप्राप्तकालवचनं अप्राप्ते अनुपस्थिते, काले समये, वाक्यं, ब्रुवन् कथयन्, बृहस्पतिरपि वाचस्पतिरपि, बुद्ध्यवज्ञानं बुद्धेः अवमाननां शाश्वतं नियतम् अपमानञ्च मानहानिञ्च प्राप्नुयात् लभते ॥ ८० ॥

दमनक इति । मा भैषीः न त्वं भीतो भव, अहं न अप्राप्तावसरवचनं अप्राप्ते अनुपस्थिते अवसरे समये वचनं वाक्यं, वक्ष्यामि कथयिष्यामि ।

आपदीति । हितमिच्छता मङ्गलाकाङ्क्षिणा भृत्येन अनुजीविना आपदि आपत्काले उपस्थिते, उन्मार्गगमने असत्कार्य्यानुष्ठानसमये, प्रभोरिति शेषः । कार्य्यकालात्ययेषु च कार्य्यस्य कर्त्तव्यकर्म्मानुष्ठानस्य कालात्ययेषु समयक्षेपेषु अजिज्ञासितेनापि वक्तव्यं कथयितव्यम् ॥ ८१ ॥

यदि च प्राप्तावसरोऽपि मन्त्रो मया न वक्तव्यस्तदा मन्त्रि-
त्वमेव ममानुपपन्नम्। यतः,

कल्पयति येन वृत्तिं येन च लोके प्रशस्यते सद्भिः।
स गुणस्तेन च गुणिना रक्ष्यः संवर्द्धनीयश्च॥ ८२॥

भद्र अनुजानीहि, पिङ्गलकसमीपमहं गच्छामि। करटको ब्रूते,
शिवमस्तु यथाभिप्रेतमनुष्ठीयताम्। ८३।

गम्यतामर्थलाभाय क्षेमाय विजयाय च।
शत्रुपक्षविनाशाय पुनरागमनाय च॥ ८४॥

ततो दमनको विस्मित इव पिङ्गलकसमीपं गतः। अथ
दूरादेव राज्ञा दृष्टः सादरं प्रवेशितस्तं साष्टाङ्गं प्रणम्योपविष्टः।
राजाह चिराद्दृष्टोऽसि। दमनको ब्रूते, यद्यपि मया सेवकेन

यदि चेति। यदि च प्राप्तावसरोऽपि प्राप्तः उपस्थितः अवसरो यस्य तथाभूतोऽपि मन्त्रः कर्त्तव्याकर्त्तव्यपरामर्शः मया न वक्तव्यः न विज्ञापितव्यः, तदा मन्त्रित्वमेव सचिवत्वमेव अनुपपन्नम् अनुपयुक्तम्।

कल्पयतीति। येन गुणेन वृत्तिं जीवनं कर्त्तुं कल्पयति सम्पद्यते, येन च गुणेन सद्भिः साधुभिः लोके जगति प्रशस्यते, स गुणः तेन प्रसिद्धेन गुणिना रक्ष्यः पालनीयः संवर्द्धनीयश्च वृद्धिं प्रापणीयश्च॥ ८२॥

भद्रेति। भद्र कल्याणिन्! अनुजानीहि अनुमन्यस्व, अहं पिङ्गलकसमीपं तदाश्रयविषयविधिं, गच्छामि यामि। यथाभिप्रेतम् अभिप्रेतम् अन-तिक्रमम् अनतिक्रम्य, अनुष्ठीयतां क्रियताम्॥ ८३॥

गम्यतामिति। अर्थलाभाय धनोपार्जनाय, क्षेमाय मङ्गलाय, विजयाय जयनिमित्तं, शत्रुपक्षविनाशाय विपक्षदलसंहाराय, पुनरागमनाय च पुनः प्रत्यागमनाय च, गम्यतां प्रस्थीयताम्॥ ८४॥

तत इति। विस्मित इव विस्मयापन्नवत्। दृष्टः अवलोकितः। सादरं आदरेण सह, प्रवेशितः सभाभ्यन्तरं प्रापितः। साष्टाङ्गं अष्टाङ्गेन सह, प्रणम्य प्रणम्य, उपविष्टः आसीनः। चिरात् बहुकालानन्तरं, दृष्टोऽसि दर्शनपथं गतोऽसि। सेवकेन भृत्येन, श्रीमद्देवपादानाम् इति बहुवचनं सम्मानार्थे प्रयोगः, भवत इति भावः। प्रयोजनम् आवश्यकम्। प्राप्तकाले उपस्थितसमये,

...मीमहे वयमात्मनो न किञ्चित् प्रयोजनमस्ति, तथापि राजन्
अनुजीविना सान्निध्यमवश्यं कर्त्तव्यमित्यागतोऽस्मि । ८५ ।
दन्तस्य निर्घर्षणकेन राजन् । कर्णस्य कण्डूयनकेन वापि ।
तृणेन कार्यं भवतीश्वराणां किमङ्गवाक्पाणिमता नरेण ॥

यद्यपि स्वामिना चिरावधीरितस्य मे बुद्धिविनाशः श[illegible]
तदपि न ।

मणिर्लुठति पादेषु काचः शिरसि धार्यते ।
क्रयविक्रयवेलायां काचः काचो मणिर्मणिः ॥ ८७ ।

अन्यच्च.

कदर्थितस्यापि च धैर्यवृत्तेर्बुद्धेर्विनाशो न हि शङ्कनीयः ।

अनुजीविना सेवकेन, सान्निध्यं समीपेऽवस्थानम्, अवश्यं नियमेन, [illegible]
विधेयम्, इति आगतोऽस्मि उपस्थितोऽस्मि, अहमिति शेषः । ८५ ।

दन्तस्येति । राजन् भूपते ! दन्तस्य दशनस्य आकारेकरणम् । [illegible]
केन मार्ज्जनविधायकेन, अथवा किंवा कर्णस्य कण्डूयनकेन कण्डूतिविना[illegible]
तृणेनापि ईश्वराणां प्रभूणां कार्यं भवति । अतएव अङ्गवाक्पा[illegible]
शरीरवाक्यकृत्यविशिष्टेन नरेण मनुष्येण किं वक्तव्यमिति शेषः । [illegible]
अवश्यं कार्यं भवतीति भावः । ८६ ।

यद्यपीति । चिरावधीरितस्य चिरात् बहुकालात्, अवधीरितस्य [illegible]
तस्य अनादृतस्य इत्यर्थः । बुद्धिविनाशः बुद्धिध्वंसः शङ्क्यते आशङ्क्यते, [illegible]
न । मम बुद्धिध्वंसो न शङ्कनीय इत्यर्थः ।

मणिरिति । मणिः बहुमूल्यरत्नम्, पादेषु चरणेषु लुठति, [illegible]
भूषणरूपेणेत्यर्थः । काचः तदाख्यया प्रसिद्धद्रव्यविशेषः, शिरसि [illegible]
धार्यते स्थाप्यते, तथापि क्रयविक्रयवेलायाम् । मूल्यदानपूर्वकं द्रव्य[illegible]
क्रयः, मूल्यग्रहणपूर्वको द्रव्यत्यागः विक्रयः, तयोः वेलायां काले, काचः [illegible]
एव, मणिर्मणिरेव, मस्तके धारणात् नहि काचस्य बहुमूल्यता, [illegible]
च भवति इति भावः ॥ ८७ ॥

[illegible]त । कदर्थितस्य अवमानितस्य, धैर्यवृत्तेः धैर्यशालिनः, [illegible]
बुद्धिभ्रंशः नहि शङ्कनीयः न आशङ्कनीयः । तथाहि [illegible]

ःक्षतस्यापि तनूनपातो नाधःशिखा याति कदाचिदेव ॥८८॥

देव ! सर्व्वथा विशेषज्ञेन स्वामिना भवितव्यम् । यतः,

निर्विशेषं यदा राजा समं सर्व्वेषु वर्त्तते ।
तदोद्यमसमर्थानामुत्साहः परिहन्यते ॥ ८९ ॥

न्यच्च, त्रिविधाः पुरुषा राजन् ! उत्तमाधममध्यमाः ।
नियोजयेत् तथैवैतांस्त्रिविधेष्वेव कर्मसु ॥ ९० ॥

तः　स्थान एव हि युज्यन्ते भृत्याश्चाभरणानि च ।
न हि चूड़ामणिः पादे नूपुरो न च मूर्द्धनि ॥ ९१ ॥

पिच　। कनकभूषणसंग्रहणोचितो
यदि मणिस्त्रपुणि प्रणिधीयते ।

अधोहतस्यापितस्य तनूनपातो वह्नेः शिखा कदाचिदेव न अधो याति न
भूम्यप्रदेशाभिमुखं गच्छति ॥ ८८ ॥

सर्व्वथेति । विशेषज्ञेन विशेषं जानाति यः सः विशेषज्ञः तेन ।

निर्विशेषमिति । यदा यस्मिन् समये राजा भूपः सर्व्वेषु अनुजीविषु
ार्य्यक्षमेषु कार्य्याक्षमेषु च इत्यर्थः । निर्व्विशेषं तारतम्यरहितं यथा तथा, समं
ल्यं वर्त्तते, व्यवहरतीति भावः । तदा तस्मिन् समये, उद्यमसमर्थानां कार्य-
क्षमाणाम् इत्यर्थः । उत्साहः कार्य्याध्यवसायः परिहन्यते परिहीयते ॥८९॥

त्रिविधा इति । राजन् ! उत्तमाधममध्यमाः, उत्तमाश्च अधमाश्च मध्य-
माश्च ते, इति त्रिविधाः पुरुषाः । केचित् उत्तमाः, केचिन्मध्यमाः, केचि-
दधमाः सन्तीति भावः । तथैव एतान् त्रिविधपुरुषान्, त्रिविधेष्वेव कर्म्मसु
उत्तमाधममध्यमेषु कार्य्येष्वित्यर्थः । नियोजयेत् नियुक्तान् कुर्य्यात् ॥ ९० ॥

स्थान इति । भृत्याः अनुजीविनः आभरणानि अलङ्काराश्च स्थान एव
चितस्थानप्रदेश एव युज्यन्ते उपयुक्तानि भवन्ति, यथोपयुक्तप्रदेशेष्वेव शोभन्ते
इति भावः । नहि चूड़ामणिः चूड़ास्थितरत्नं, पादे चरणे, नूपुरः चरणाभ-
रणञ्च, न च मूर्द्धनि मस्तके युज्यते इति शेषः ॥ ९१ ॥

कनकेति । कनकभूषणसंग्रहणोचितः सुवर्णभूषणयोगयोग्यः मणिः रत्नं,
यदि त्रपुणि सीसके प्रणिधीयते योज्यते, तदा स मणिः न विरौति न

न स विरौति न चापि स शोभते
भवति योजयितुर्वचनीयता ॥ ९२ ॥

अन्यच्च, मुकुटे रोपितः काचश्चरणाभरणे मणिः ।
न हि दोषो मणेरस्ति किन्तु साधोरविज्ञता ॥ ९३

बुद्धिमाननुरक्तोऽयमयमुभयगुणो जनः ।
इति भृत्यविचारज्ञो भृत्यैरापूर्यते नृपः ॥ ९४ ॥

अन्यच्च, अश्वः शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च ।
प्राप्य मनुष्यविशेषं भवन्ति योग्या अयोग्याश्च ॥ ९५

अन्यच्च, किं भक्तेनासमर्थेन किं शक्तेनापकारिणा ।
भक्तं शक्तं च मां राजन् ! नावज्ञातुं त्वमर्हसि ॥

रिति, न च शोभते न च शोभमानो भवति, किन्तु योजयितुः संयोज-
वनीयता निन्दा भवति ॥ ९२ ॥

मुकुट इति । यदि मुकुटे शिरोभूषणे काचः रोपितः स्थापितः
टे च चरणाभरणे नूपुरादौ मणिः अमूल्यश्च स्थापितः स्यात्, तदा
तस्य दोषो न भवति, किन्तु साधोः अलङ्कर्तुरित्यर्थः । अविज्ञता
यता, मूर्खता इति यावत् । प्रकाशते इति शेषः ॥ ९३ ॥

बुद्धिमानिति । अयं बुद्धिमान् तीक्ष्णबुद्धिः, अयं जनः अनुरक्तः
क्तः, अयं जनः उभयगुणः उभयविधगुणसम्पन्नः, बुद्धिमान् अनुरक्तश्च
ति एवं भृत्यविचारज्ञः भृत्यविचारे समर्थः नृपो राजा भृत्यैः अनुजीवि-
आपूर्यते संवर्द्धते ॥ ९४ ॥

अश्व इति । अश्वः घोटकः, शस्त्रं खड्गादिकं, शास्त्रं काव्यालङ्कारा-
णा देवनाद्यविशेषः, वाणी वाक्यं, नरः अनुजीवी मनुष्यः, नारी
कामिनी च, मनुष्यविशेषं प्राप्य योग्यमयोग्यं वा नरमासाद्य इत्यर्थः । यो-
उपयुक्ताः, अयोग्याः अकर्मण्याः वा भवन्ति ॥ ९५ ॥

किमिति । भक्तेन भक्तियुक्तेन, असमर्थेन कार्याक्षमेण जनेन किं,
कार्यं सिध्यतीति भावः । शक्तेन कार्यदक्षेण, अपकारिणा अहित-
जनेन च किं ? हे राजन् ! त्वं भक्तं भक्तियुक्तं शक्तं कार्यक्षम-
माम् अवज्ञातुम् अवमानयितुं न अर्हसि न योग्यो भवसि ॥

अवज्ञानाद्राज्ञो भवति मतिहीनः परिजन-
स्ततस्तत्प्राधान्याद्भवति न समीपे बुधजनः ।
बुधैस्त्यक्ते राज्ये न हि भवति नीतिर्गुणवती
विपन्नायां नीतौ सकलमवशं सीदति जगत् ॥ ९७ ॥

अन्नं जनपदा नित्यमर्चयन्ति नृपार्चितम् ।
नृपेणावमतो यस्तु स सर्वैरवमन्यते ॥ ९८ ॥

बालादपि ग्रहीतव्यं युक्तमुक्तं मनीषिभिः ।
रवेरविषये किं न प्रदीपस्य प्रकाशनम् ॥ ९९ ॥

पिङ्गलको ब्रूते, भद्र ! दमनक ! किमेतत् ? त्वमस्माकं प्रधानामात्यपुत्रः सुधीरियत्कालं नीत्वा कुतोऽपि पिशुनवचनाद्गतोऽसि ? इदानीं यथाभिमतं ब्रूहि । दमनको ब्रूते, देव ! पृच्छामि किंचिदुच्यताम् । उदकार्थी स्वामी पानीय-

अवज्ञानादिति । राज्ञः भूपतेः, अवज्ञानात् औदासीन्यात्, परिजनः अनुचरः, मतिहीनः मूढो भवति । अवमानबुद्ध्या विज्ञः तत्समीपे न तिष्ठति । ततः तदनन्तरं तत्प्राधान्यात् तेषां मूर्खाणां प्राधान्यात्, समीपे बुधजनः पण्डितो जनः, न भवति न गच्छतीत्यर्थः । अथ बुधैः त्यक्ते राज्ये, राजकदपि परित्यक्ते इति, नीतिः राजनीतिः, गुणवती युक्ता न भवति; नीतौ राजनीतौ, विपन्नायाम् अवसन्नायां सत्यां, सकलं राज्यमित्यर्थः । अवशं सत् सीदति अवसीदति ॥ ९७ ॥

अन्नमिति । जनपदाः देशवासिनः सर्वे नृपार्चितं नृपेण राज्ञा अर्चितं जनं नित्यं नियतम् अर्चयन्ति सम्मानयन्ति । यो जनः नृपेण अवमतः तिरस्कृतः, स सर्वैः जनपदवासिभिरित्यर्थः, अवमन्यते अवज्ञायते ॥ ९८ ॥

बालादिति । मनीषिभिः पण्डितैः बालादपि बालकादपि, युक्तं युक्तियुक्तम् उक्तं वाक्यं ग्रहीतव्यम् । रवेः सूर्यस्य अविषये अविद्यमानस्थाने किं प्रदीपस्य प्रकाशनं प्रकाशकत्वं न ? भवतीति भावः ॥ ९९ ॥

पिङ्गलक इति । प्रधानामात्यपुत्र इति प्रधानामात्यः तस्य पुत्रः प्रधानामात्यपुत्रः प्रधानसचिवतनयः इत्यर्थः । सुधीः उन्नतबुद्धिमान्, इयत्कालम् एतावत्कालं नीत्वा यापयित्वा पिशुनवचनात् खलवाक्यात् च आगतोऽसि

अपोत्वा [illegible] [illegible] इवावतिष्ठते? [illegible] मद्युक्तं तथा, किन्तु [illegible] [illegible] प्राक् [illegible] न कोऽपि। [illegible] [illegible], [illegible]। [illegible] [illegible], [illegible] [illegible]। तथा च [illegible] [illegible] शब्दो महान्। शब्दानुरूपेण च [illegible] बलेनापि भवितव्यम्। दमनको ब्रूते, देव! स तावदयं महान् भयहेतुः, यदस्माभिरप्याकर्णितः। किं स मन्त्री यः प्रथमं भूमित्यागं युद्धं चोपदिशति? अपरं च देव! अस्मिन् कार्यसन्देहे भृत्यानामुपयोग एव ज्ञातव्यः ॥१००॥ यतः,

बन्धुस्त्रीभृत्यवर्गस्य बुद्धेः सत्त्वस्य चात्मनः।
आपन्निकषपाषाणे नरो जानाति सारताम् ॥१०१॥

सिंहो ब्रूते, "भद्र! महती शङ्का मां बाधते।" [illegible] स्वगतमाह, अन्यथा राज्यसुखं परित्यज्य स्थानान्तरं गन्तुं

न [illegible]। यथाभिमतं यथाभिलषितम्। [illegible] [illegible] इव [illegible]। भद्रकं साधु कथितम्। [illegible] [illegible]। तद्विधः [illegible]। [illegible] अपूर्वः [illegible] सत्त्वेन प्राणिना [illegible]। [illegible] [illegible] परित्यागार्हम्॥ शब्दानुरूपेण शब्दसदृशेन। आकर्णितः श्रुतः, [illegible] [illegible], भूमित्यागं राज्यपरिहारं, युद्धोद्योगम् उद्यमम् उप [illegible] विधापयति। कार्यसन्देहे कार्यस्य कर्तव्यस्य सन्देहे संशये [illegible] उपयुक्तता ज्ञातव्या अवगन्तव्या ॥ १०० ॥

बन्धुरिति। नरो मनुष्यः आपन्निकषपाषाणे विपद्रूपकषणप्रस्तरे [illegible] भृत्यवर्गस्य बन्धवश्च स्त्रियश्च भृत्याश्च ते तेषां वर्गः। तस्य आत्मनः [illegible] धियः, सत्त्वस्य बलस्य च सारतां कार्योपयोगितां जानाति ॥ १०१ ॥

सिंह इति। महती शङ्का अतीव भयं मां बाधते अभिभवति। [illegible] [illegible] राज्यसुखं राजत्वसम्भोगजनितसुखं परित्यज्य विहाय, [illegible]

म्भापसे ? प्रकामं ब्रूते, देव ! यावदहं जीवामि, तावद्भयं र्त्तव्यम्। किन्तु करटकादयोऽपि आश्वास्यन्ताम्। यस्मा- त्प्रतीकाराय दुर्लभः पुरुषसमवायः ॥ १०२ ॥

ततस्तौ दमनककरटकौ राज्ञा महाप्रसादेन पूजितौ भय- कारं प्रतिज्ञाय चलितौ। करटको गच्छन् दमनकमाह, ! किं शक्यप्रतीकारोऽयं भयहेतुरशक्यप्रतीकारो वेति न त्वा भयोपशमं प्रतिज्ञाय कथमयं महाप्रसादो गृहीतः ? ऽनुपकुर्वाणो न कस्यापि उपायनं गृह्णीयात्, विशेषतो ः ॥ १०३ ॥ पश्य

यस्य प्रसादे पद्मास्ते विजयश्च पराक्रमे।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ॥ १०४ ॥

॥ हि, बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।

ः कथ्यत् ध्यानम्। जीवामि प्राणान् धारयामि। आश्वास्यन्ताम् आश्वा- सेन आत्मसात् क्रियन्ताम्। आपत्प्रतीकाराय आपदां विपदां प्रति- विधाननिमित्तम्। पुरुषसमवायः पुरुषाणां मन्त्रिणां योधानाञ्च समवायः मेलनं, दुर्लभः दुःखेन लभ्यते इत्यर्थः ॥ १०२ ॥

तत इति। महाप्रसादेन महता पारितोषिकेण, पूजितौ सत्कृतौ। प्रतीकारं भयस्य भीतिकारणस्य प्रतीकारं प्रतिविधानं, निवारणमित्यर्थः। तज्ञाय अङ्गीकृत्य, चलितौ प्रस्थितौ। शक्यप्रतीकारः शक्यः साध्यः प्रती- कारः प्रतिविधानं यस्य सः। भयहेतुः भयकारणम्। अशक्यप्रतीकारः अशक्यः साध्यः प्रतीकारो यस्य सः। न ज्ञात्वा अनुसन्धाय। भयोपशमं भीति- निवृत्तिं, प्रतिज्ञाय प्रतिश्रुत्य कथं किमर्थम् अयं महाप्रसादः सुविपुलः पारि- तोषिकः गृहीतः आसादितः। यतो यस्मात् अनुपकुर्वाणः उपकारमकुर्वन्, कस्यापि उपायनम् उपढौकनं न गृह्णीयात् आददीत कुर्यात् ॥ १०३ ॥

...इति। यस्य प्रसादे प्रसन्नतायां पद्मा लक्ष्मीः आस्ते वसति, परा- क्रमे प्रभावे, आस्ते इति शेषः। यस्य क्रोधे कोपे मृत्युः सर्वे स राजा सर्वतेजोमयः, सर्वेषां तेजसां सर्वदिक्पतिः ॥ १०४ ॥

भूमिपः राजा बालोऽपि शिशुरपि मनुष्य इति मनुष्य

महतो देवता ह्येषा नररूपेण तिष्ठति ॥ १०५ ॥

दमनको विहस्याह, मित्र! तूष्णीमास्यताम्, ज्ञातं मया भयकारणम्। बलीवर्दनर्दितम्। वृषभाश्चास्माकं भक्ष्याः, किं पुनः सिंहस्य। करटको ब्रूते, यद्येवं तदा स्वामित्रासस्तत्रैव किं नापनीतः? दमनको वदति, यदि स्वामित्रासस्तत्रैव मुच्यते, कथमयं महाप्रसादलाभः स्यात् ॥ १०६ ॥

अपरञ्च, निरपेक्षो न कर्त्तव्यो भृत्यैः स्वामी कदाचन।
निरपेक्षं प्रभुं कृत्वा भृत्यः स्याद्दधिकर्णवत् ॥ १०७ ॥

करटकः पृच्छति, कथमेतत्? दमनकः कथयति। अस्त्युत्तरापथे अर्बुदशिखरनाम्नि पर्वते महाविक्रमो नाम सिंहः। तस्य पर्वतकन्दरमधिशयानस्य केशराग्रं मूषिकः कश्चिच्छिनत्ति। स सिंहः केशराग्रं लूनं बुद्ध्वा कुपितो विवरान्

इति बुद्ध्वा इत्यर्थः। न अवमन्तव्यः न अवज्ञेयः। हि यतः एषा भूमिप महती देवता नररूपेण मनुष्याकारेण तिष्ठति वर्त्तते ॥ १०५ ॥

दमनक इति। विहस्य हसित्वा। तूष्णीम् आस्यतां नीरवः स्थीयताम्, मया भयकारणं शङ्काहेतुः ज्ञातम् अवगतम्, बलीवर्द्देन वृषभेण नर्द्दितं कृतः। भक्ष्याः खाद्याः। स्वामित्रासः स्वामिनो भयं, तत्रैव तत्क्षणे किं न अपनीतः दूरीकृतः। मुच्यते अपनीयते। महाप्रसादलाभः भूरिपरिमाणस्य प्रसादस्य पारितोषिकस्य लाभः प्राप्तिः ॥ १०६ ॥

निरपेक्ष इति। भृत्यैः अनुजीविभिः स्वामी प्रभुः कदाचन कदाचित् निरपेक्षः, निर्नास्ति अपेक्षा भृत्यावश्यकता यस्य तादृशो न कर्त्तव्यः विधातव्यः। यतः भृत्यः अनुजीवी प्रभुं स्वामिनं निरपेक्षं भृत्यापेक्षाशून्यं कृत्वा दधिकर्णवत् दधिकर्णनामकमार्ज्जार इव स्यात् भवेत् ॥ १०७ ॥

करटक इति। उत्तरापथे तन्नामक-हिमालयसन्निहित-स्थाने। महाविक्रमः विक्रमः पराक्रमो यस्य तादृशः। पर्व्वतकन्दरं पर्व्वतस्य महीरुहस्य कन्दरम् अधिशयानस्य, तत्र सुप्तस्य इत्यर्थः। केशराग्रं केशराणां सटानां प्रान्तभागं, कश्चित् मूषिकः आखुः छिनत्ति कन्तति। लूनम् छिन्नं,

दं मूषिकमलभमानोऽचिन्तयत्, किं विधेयमत्र ! भवत्वेवं [illegible]यते ॥ १०८ ॥

क्षुद्रशत्रुर्भवेद्यस्तु विक्रमान्नैव लभ्यते ।
तमाहर्त्तुं पुरस्कार्य्यः सदृशस्तस्य सैनिकः ॥ १०९ ॥

इत्यालोच्य तेन ग्रामं गत्वा दधिकर्णनामा विड़ालो मांसाद्याहारेण सन्तोष्य प्रयत्नादानीय स्वकन्दरे धृतः। ततस्तद्भयात् मूषिको वहिर्न निःसरति। तेनासौ सिंहोऽक्षतकेशरः सुखं स्वपिति। मूषिकशब्दं यदा यदा शृणोति, तदा तदा सविशेषं तं विड़ालं मांसाहारदानेन संवर्द्धयति। अथैकदा स मूषिकः क्षुधापीड़ितो वहिः सञ्चरंस्तेन मार्जारेण प्राप्तो व्यापादितः खादितश्च। अनन्तरं स सिंहो यदा कदाचिदपि मूषिकशब्दं न शुश्राव, तदोपयोगाभावात् तस्य विड़ालस्याहारदाने मन्दादरो बभूव। अतोऽहं ब्रवीमि, निरपेक्षो न कर्त्तव्य इत्यादि ॥ ११० ॥

[illegible] गत्वा, कुपितः क्रुद्धः सन् विवरान्तर्गतं गर्त्तमध्यस्थितं मूषिकम् अलभमानः [illegible] अचिन्तयत् ? अचिन्तयत् चिन्तयामास । अत्र विवरे किं विधेयं किं कर्त्तव्यम् ॥ १०८ ॥

क्षुद्रशत्रुरिति । यस्य क्षुद्रशत्रुः निकृष्टो विपक्षो भवेत् । विक्रमात् पराक्रमेण यदि स न लभ्यते न आयत्तीक्रियते, तदा तम् आहर्त्तुं संग्रहीतुं [illegible] सदृशः, तुल्यपराक्रमः । सैनिकः सेनापुरुषः, पुरस्कार्य्यः नियोक्तव्यः ॥ १०९ ॥

इतीति । आलोच्य मनसा विचार्य्य । मांसाद्याहारेण मांसप्रभृतिभोजनदानेन । सन्तोष्य परितोष्य । प्रयत्नात् यत्नातिशयेन । आनीय समानीय । स्वकन्दरे निजगह्वरमध्ये, धृतः रक्षितः । तद्भयात् तस्य विड़ालस्य भयात् । न बहिः न निःसरति । अक्षतकेशरः अक्षताः अच्छिन्नाः केशराः यस्य सः । [illegible] मूषिकशब्दम् आकर्ण्य । यदा यदा शृणोति, तदा तदा तम् [illegible] मांसाद्याहारेण । इतीदं विशेष-

ततो दमनकः करटकेन सञ्जीवकसमीपं गतः । तत्र टङ्कशिलातले साटोपमुपविष्टः । दमनकः सञ्जीवकमिदम् अब्रवीत् । अरे वृषभ ! एषोऽहं राज्ञा पिङ्गलकेन रक्षार्थं नियुक्तः । सेनापतिः करटकः समाज्ञापयति, आगच्छ, नो चेदस्मादरण्याद्दूरमपसर । अन्यथा ते फलं भविष्यति । न जाने क्रुद्धः स्वामी किं विधास्यति । देशव्यवहारानभिज्ञः सञ्जीवकः ससम्भ्रममुपसृत्य साष्टाङ्गपातं करटकं प्रणतवान् ॥ १११ ॥ तथा चोक्तम्,

मतिरेव बलाद्गरीयसी
यदभावे करिणामियं दशा ।
इति घोषयतीव डिण्डिमः
करिणो हस्तिपकाहतः क्वणन् ॥ ११२ ॥

रूपेण, संवर्द्धयति परितोषयति । क्षुधापीडितः क्षुधया व्यथितः सञ्चरन् बहिःप्रदेशे भ्राम्यन् । तेन मार्जारेण बिडालेन, प्राप्तः [illegible] दितो विनाशितः, खादितश्च भक्षितश्च । उपयोगाभावात् प्रयोजन[illegible] आहारदाने भोजनदाने, मन्दादरः शिथिलप्रयत्नः ॥ ११० ॥

तत इति । सञ्जीवकसमीपं सञ्जीवकनामकवृषभसन्निधिम् । सा[illegible] रिकरम्, उपविष्टः आसीनः । अरण्यरक्षार्थं वनरक्षणाय, नियुक्तः [illegible] समाज्ञापयति आदिशति । दूरं दूरतरप्रदेशम् अपसर गच्छ । विरुद्धं फलं निष्पत्तिः, मृत्युरिति भावः । क्रुद्धः कुपितः, विधास्यति क[illegible] देशव्यवहारानभिज्ञः देशस्य व्यवहारः आचारः, तत्र अनभिज्ञः [illegible] सत्रासम् । उपसृत्य उपगम्य, साष्टाङ्गपातम् अष्टानाम् [illegible] [illegible]गेन सह । क्रियाविशेषणे द्वितीया । प्रणतवान् प्रणना[illegible] [illegible]ति । बलात् शारीरसामर्थ्यात् मतिरेव बुद्धिरेव [illegible] [illegible]भावे यस्याः बुद्धेरसत्तायां करिणां गजानाम् इयं दृश्य[illegible] [illegible] अधीनता इत्यर्थः । हस्तिपकाहतः [illegible] [illegible]नाहतः ताडितः, क्वणन् शब्दायमानः, करिणो [illegible] [illegible], इति बोधयतीव ज्ञापयतीव ॥ ११२ ॥

अथ सञ्जीवकः सशङ्कमाह, सेनापते ! किं मया कर्त्तव्यं
तदभिधीयताम् । करटको ब्रूते, वृषभ ! यदत्र कानने
स्थातुमिच्छा वर्त्तते, तदा देवपादारविन्दं गत्वा प्रणम
सञ्जीवको वदति, तदभयवाचं प्रयच्छ आगच्छामि । करटके
नोक्तं, शृणु रे बलीवर्द ! अलमनया शङ्कया ॥ ११३ ॥ यतः,

प्रतिवाचमदत्त केशवः शपमानाय न चेदिभूभुजे ।
अनुहुङ्कुरुते घनध्वनिं, न हि गोमायुरुतानि केशरी ॥११४

अपरञ्च,
तृणानि नोन्मूलयति प्रभञ्जनो
मृदूनि नीचैः प्रणतानि सर्वतः ।
समुच्छ्रितानेव तरून् प्रबाधते
महान् महत्स्वेव करोति विक्रमम् ॥ ११५ ॥

ततस्तौ सञ्जीवकं नातिदूरे संस्थाप्य पिङ्गलकसमीपं गतौ

अथेति । सशङ्कं सचकितम् । सेनापते ! सेनानायक । मया किं कर्त्तव्यं कि
विधेयं, तत् अभिधीयतां कथ्यताम् । कानने वने । स्थातुम् अवस्थातुम्, इच्छा
अभिलाषः, तदा देवपादारविन्दं देवस्य राज्ञः पादारविन्दं चरणसरोज
प्रणम नमस्कुरु । अभयवाचम् अभीतिसूचकं वाक्यं, प्रयच्छ देहि ॥ ११२ ॥

प्रतिवाचमिति । केशवः कृष्णः शपमानाय कटूक्तिप्रयोगं कुर्वते, चेदि
भुजे शिशुपालाय, प्रतिवाचं प्रतिवाक्यं न अदत्त न दत्तवान्, न किमप्यु
त्तरितवान् । केशरी सिंहः, घनध्वनिं मेघशब्दम् अनुहुङ्कुरुते मेघशब्दानन्तरं
प्रतिगर्जति इत्यर्थः । नहि गोमायुरुतानि, गोमायूनां शृगालानां रुतानि
रवान्, अनुहुङ्कुरुते इत्यर्थः ॥ ११४ ॥

तृणानीति । प्रभञ्जनः प्रबलो वायुः सर्वतः प्रणतानि सर्वतो नम्राणि
नीचैः क्षुद्राणि, मृदूनि कोमलानि, दुर्बलानि च, तृणानि न उन्मूलयति
उच्छिनत्ति, किन्तु समुच्छ्रितान् उन्नतशिरसः, उन्नतान् इत्यर्थः । तरून्
वृक्षानेव प्रबाधते आक्रामति । यथाहि महान् विक्रमशाली बलीयान्
महत्सु एव अत्यधिकशक्तौ एव विक्रमं पराक्रमं करोति प्रकाशयति ॥ ११५ ॥

ततस्ताविति । नातिदूरे अदूरवर्त्तिस्थाने संस्थाप्य अवस्थाप्य । द्वारस्थ
द्वारदेश इव । द्वारकौ दृष्टौ । प्रदत्तं नमस्कृत्य । उपविष्टौ आसीनौ

ततो राज्ञा सादरमालोकितौ प्रणम्योपविष्टौ। राजाह, दृष्टः? दमनको ब्रूते, देव। दृष्टः, यद्देवेनाकर्णितं तत्तथा महाबलोऽसौ देवं द्रष्टुमिच्छति। सज्जीभूयोपविश्यताम्, किन्तु शब्दमात्रान्न भेतव्यम् ॥ ११६ ॥

अम्भसा भिद्यते सेतुस्तथा मन्त्रोऽप्यरक्षितः।
पैशुन्याद्भिद्यते स्नेहो वाग्भिर्भिद्येत कातरः ॥ ११७ ॥

तथा चोक्तम्, शब्दमात्रान्न भेतव्यमज्ञात्वा शब्दकारणम्।
शब्दहेतुं परिज्ञाय कुट्टिनी गौरवं गता ॥ ११८ ॥

राजाह, कथमेतत्? दमनकः कथयति। "अस्ति श्रीपर्वतमध्ये ब्रह्मपुराख्यं नगरम्। तत्र शैलशिखरे घण्टाकर्णो नाम राक्षसः प्रतिवसतीति जनप्रवादः श्रूयते। एकदा घण्टामादाय पलायमानः कश्चिच्चौरो व्याघ्रेण व्यापादितः। तत्पाणिपतिता घण्टा वानरैः प्राप्ता। ते वानरास्तां घण्टामनु

आकर्णितम् श्रुतम्। महाबलः महत् बलं सामर्थ्यं यस्य सः। सज्जीभूय सज्जो भूत्वा, उपविश्यताम् आस्यताम्, न भेतव्यं न शङ्कितव्यम् ॥ ११६ ॥

अम्भसेति। सेतुः आलिः अम्भसा जलेन यथा भिद्यते, उच्छिद्यते, अरक्षितः अगोपितः मन्त्रोऽपि परामर्शोऽपि, भिद्यते [illegible]। स्नेहः अनुरागः, भिद्यते उच्छिद्यते। कातरः [illegible] ॥ ११७ ॥

शब्दमात्रादिति। शब्दकारणं शब्दस्य हेतुम् अज्ञात्वा [illegible] शब्दमात्रात् [illegible] न भेतव्यं [illegible]। तथाहि [illegible] कारणं परिज्ञाय [illegible] कुट्टिनी [illegible] गौरवं गता प्राप्ता ॥ ११८ ॥

[illegible]

त। ततो नगरजनैर्मनुष्यः खादितो दृष्टः, प्रतिक्षणं
त्तस्य श्रूयते। ११९।

न्तरं घण्टाकर्णः कुपितो मनुष्यान् खादति घण्टां च
।, इत्युक्त्वा जनाः सर्वे नगरात् पलायिताः। ततः करा-
नाम कुट्टिन्या विमृश्य मर्कटा, घण्टां वादयन्ति, स्वयं
राजा विज्ञापितः। देव! यदि कियद्धनोपक्षयः क्रियते
ऽहं घण्टाकर्णं साधयामि। ततो राज्ञा तुष्टेन तस्यै धनं
। कुट्टिन्या च मण्डलं कृत्वा तत्र गणेशादिगौरवं दर्श-
स्वयं वानरप्रियफलान्यादाय वनं प्रविश्य फलान्याकी-
। १२०।

तो घण्टां परित्यज्य वानराः फलासक्ता बभूवुः। कुट्टिनी
ण्टां गृहीत्वा नगरमागता सकललोकपूज्याभवत्। अतो-
ब्रवीमि, शब्दमात्रान्न भेतव्यमिति। १२१।

मानवः। खादितो भक्षितः। दृष्टः अवलोकितः। प्रतिक्षणं क्षणे
घण्टारावः घण्टाध्वनिः। श्रूयते आकर्ण्यते॥ ११९॥
अनन्तरमिति। कुपितः क्रुद्धः। खादति भक्षयति। पलायिताः अपगा-
[illegible]ताः। विमृश्य विविच्य। विचार्य निश्चित्य। विज्ञापितः निवेदितः।
धनोपक्षयः [illegible] धनानाम् अर्थानाम् उपक्षयः व्ययः।
[illegible]मि निगृह्णामि। तुष्टेन सन्तोषयुक्तेन। दत्तं वितरितम्। मण्डलं देवपूजा-
[illegible]म्। कृत्वा निष्पाद्य। तत्र मण्डले। गणेशादिगौरवं गणेशादीना
[illegible] गौरवं पूजाबाहुल्यम्।
[illegible] वानरप्रियफलानि [illegible]
[illegible] आदाय गृहीत्वा। वनम् अरण्यम्। प्रविश्य
[illegible]। फलानि तानि [illegible] विकीर्णानि॥ १२०॥
ततो घण्टामिति। परित्यज्य [illegible] [illegible]
[illegible]
[illegible]

ततः सञ्जीवकमानीय दर्शनं कारितवन्तौ। पश्चात् वने चिरमन्योन्यं परमप्रीत्या निवसति। अथ कदाचि सिंहस्य भ्राता स्तब्धकर्णो नाम सिंहः समागतः। तस्य आतिथ्यं कृत्वोपवेश्य पिङ्गलकस्तदाहाराय पशून् हन्तुं चलितः। अत्रान्तरे सञ्जीवको वदति। देव! अद्य हतमृगाणां मांसानि? राजाह, दमनककरटकौ जानीतः। सञ्जीवको ब्रूते, किमस्ति नास्ति वा? सिंहो विहस्याह, नास्त्येव तत्। सञ्जीवको ब्रूते, कथमेतावन्मांसं ताभ्यां खादितम्? राजाह, खादितं व्ययितम् अवधीरितं च। प्रत्यहमेष क्रमः। सञ्जीवको ब्रूते, कथं श्रीमद्देवपादानामगोचरेणैवं क्रियते? राजाह, मदीयागोचरेणैव क्रियते। सञ्जीवको ब्रूते, नैतदुचितम्। तथा चोक्तम्,

नानिवेद्य प्रकुर्वीत भर्त्तुः किञ्चिदपि स्वयम्।
कार्य्यमापत्प्रतीकारादन्यत्र जगतीपतेः॥

तत इति। सञ्जीवकं तदाख्यवृषभम्। आनीय आहूय। दर्शनं साक्षात्कारम्। कारितवन्तौ सम्पादितवन्तौ। चिरं चिरकालम्। परमप्रीत्या आतिशयस्नेहेन। निवसति तिष्ठति। समागतः समायातः। आतिथ्यं सत्कारम्। कृत्वा विधाय। उपवेश्य आसने सन्निवेश्य। तदाहाराय भोजनाय। पशून् हन्तुम्। चलितः प्रस्थितः। अत्रान्तरे अवसरे। हतमृगाणां व्यापादितानां मृगाणां हरिणादीनां मांसानि। [illegible]

[illegible]

कमण्डलूपमोऽमात्यस्तनुत्यागो बहुग्रहः ।
नृपते ! किंक्षणो मूर्खो दरिद्रः किंवराटकः ? ॥१२४॥
[त्य]त्यः सदा श्रेयान् यः काकिन्यापि वर्द्धयेत् ।
[को]षवतः प्राणाः प्राणाः प्राणा न भूपतेः ॥ १२५ ॥
किञ्चान्यैर्न कुलाचारैः सेव्यतामेति पूरुषः ।
धनहीनः स्वपत्न्यापि त्यज्यते किम्पुनः परैः ॥ १२६ ॥
[ए]च्च राज्ञे प्रधानदूषणम् । पश्य,
अतिव्ययोऽनपेक्षा च तथार्ज्जनमधर्म्मतः ।
मोषणं दूरसंस्थानं कोषव्यसनमुच्यते ॥ १२७ ॥

[कम]ण्डलूपम इति । नृपते राजन् ! अमात्यः मन्त्री कमण्डलूपमः कम[ण्डलुतुल्यः], [यः] तनुत्यागः तनुः स्वल्पः त्यागः वितरणं यस्य तादृशः । बहुग्रहः [बहु गृ]ह्णाति यः सः बहुग्रहः । मूर्खो जनः किङ्क्षणः कुत्सितः क्षणः [illegible] दरिद्रो दीनः किंवराटकः [illegible] । मूर्खः समयस्य बहु-[मूल्यतां], दरिद्रः वराटकस्य बहुमूल्यतां च न जानातीति भावः ॥ १२४ ॥
[भृत्य इ]ति । यः अमात्यः सदा सर्व्वदा काकिन्यापि वर्द्धयेत्, राजानमिति [शेषः], [स] अमात्यः कविभिः श्रेयान् प्रशस्ततरः । "वराटकानां दशकद्वयं यत् [सा का]किणी ताश्च पणश्चतस्रः" इति लीलावती ॥ तथाहि कोषवतः धना[ढ्यस्य] [illegible] भूपतेः राज्ञः कोषः प्राणाः जीवनम् । प्राणा न प्राणाः न [illegible] ॥ १२५ ॥
[किञ्चान्यै]रिति । पूरुषः जनः अन्यैः धर्म्मव्यतिरिक्तैः कुलाचारैः कुलधर्म्मैः सेव्यता[म्], न एति न प्राप्नोति । मनुष्यः धनेनैव सेव्यो भवतीति भावः । तदपि [धनही]नः दुर्गतो जनः स्वपत्न्यापि निजभार्य्ययापि परित्यज्यते परिहीयते । [किम्पुन]ः परैः अन्यैः । परैस्तु सुतरामेव त्यज्यते इति भावः ॥ १२६ ॥
[एतच्च]ेति । प्रधानदूषणम् मुख्यं दोषः ।
अतिव्यय इति । अतिव्ययः अपव्ययः, अनपेक्षा निरपेक्षा, अधर्म्मतः च अर्ज्जनम् उपार्ज्जनम्, मोषणं वञ्चनम् । दूरसंस्थानं दूरे रक्षणम्, एतं कोषव्यसनं कोषस्य धनागारस्य व्यसनम् उच्यते कथ्यते । [illegible] [illegible] दह तत् व्यसनम् [illegible] ॥ १२७ ॥

यतः, क्षिप्रमायमनालोच्य व्ययमानः स्ववाञ्छया ।
असणायत एवासौ धनी वैश्रवणोपमः ॥ १२८ ॥

तथाकर्ण्य स्तब्धकर्णो ब्रूते, शृणु भ्रातः ! चिराश्रितौ दमनककरटकौ सन्धिविग्रहकार्य्याधिकारिणौ । कार्य्याधिकारी न धनाधिकारे नियोक्तव्यः । अपरं च नियोगिप्रसङ्गे मया यत्किञ्चित् श्रुतं तत्कथयामि । १२९ ।

ब्राह्मणः क्षत्त्रियो बन्धुर्नाधिकारे प्रशस्यते ।
ब्राह्मणः सिद्धमप्यर्थं कृच्छ्रेणापि न यच्छति ॥
नियुक्तः क्षत्त्रियो द्रव्ये खड्गं दर्शयते ध्रुवम् ।
सर्वस्वं ग्रसते बन्धुराक्रम्य ज्ञातिभावतः ॥ १३० ॥

क्षिप्रमिति । आयं धनागमम् अनालोच्य न विविच्य स्ववाञ्छया अभिलाषेण क्षिप्रं शीघ्रं व्ययमानः धनव्ययं कुर्वन् वैश्रवणोपमः कुबेरसदृशः धनवान् असौ कोऽपि जनः असणायते एव असण इव भिक्षुक इव आचरतीत्यर्थः । परिक्षीयत एवासौ इत्यपि पाठः ॥ १२८ ॥

तदिति । स्तब्धकर्णः अभ्यागतः सिंहस्य भ्राता । चिराश्रितौ बहुकालावधि आश्रितौ अनुगतौ । सन्धिश्च विग्रहश्च तौ सन्धिविग्रहौ, तयोः कार्य्ये अधिकारिणौ अधिकृतौ, भूपालान्तरेण सह नियमपूर्वकम् [illegible] सन्धिः । विग्रहो भेदः, संग्राम इत्यर्थः । कार्य्याधिकारी सन्धिविग्रहे अधिकृतः । धनाधिकारे कोषाध्यक्षतायाम् । न नियोक्तव्यः न स्थापयितव्यः । नि[illegible]प्रस्तावे अधिकारप्रदानविषये ॥ १२९ ॥

[illegible] इति । ब्राह्मणो विप्रः, क्षत्त्रियः क्षत्त्रजातिः, बन्धुः [illegible] पुत्रादिः [illegible] अधिकारे कार्य्यविशेषे नियोगे न प्रशस्यते न प्रशस्तो भवति । ब्राह्मणः [illegible] सिद्धमपि निष्पन्नप्रायमपि अर्थं विषयं कृच्छ्रेणापि [illegible] न यच्छति न [illegible] अर्पयति । नियुक्तः द्रव्याधिकारः क्षत्त्रियः ध्रुवं निश्चयं [illegible] दर्शयते, क्षत्त्रियः [illegible] एव उचतां प्रदर्शयतीति भावः । बन्धुः [illegible] पुत्रादिः ज्ञातिभावात् ज्ञातित्वभावात् आक्रम्य स्वायत्तीकृत्य सर्वस्वं [illegible] धनादिकं ग्रसते [illegible] ॥ १३० ॥

अपराधेऽपि निःशङ्को नियोगी चिरसेवकः।
स स्वामिनमवज्ञाय चरेच्च निरवग्रहः ॥ १२१ ॥
उपकर्त्ताधिकारस्थः स्वापराधं न मन्यते।
उपकारं ध्वजीकृत्य सर्वमेव विलुम्पति ॥ १२२ ॥
उपांशुक्रीड़ितोऽमात्यः स्वयं राजायते यतः।
अवज्ञा क्रियते तेन सदा परिचयाद्ध्रुवम् ॥ १२३ ॥
अन्तर्दुष्टः क्षमायुक्तः सर्वानर्थकरः किल।
शकुनिः शकटारश्च दृष्टान्तावत्र भूपते! ॥ १२४ ॥
सदायत्याप्यसाध्यः स्यात् समृद्धः सर्व एव हि।
सिद्धानामयमादेश ऋद्धिश्चित्तविकारिणी ॥ १२५ ॥

अपराध इति। चिरसेवकः बहुकालावधि सेवाकार्ये नियुक्तः नियोगी अधिकारी अपराधेऽपि दोषे कृतेऽपीत्यर्थः। निःशङ्कः शङ्कारहितः भवति चेत्। स नियोगी निरवग्रहः सन् निरङ्कुशः सन् स्वस्वामिनं निजप्रभुम् अवज्ञाय अवमत्य चरेत् विहरेत् ॥ १२१ ॥

उपकर्त्तेति। उपकर्त्ता कृतोपकारः जनः अधिकारस्थः अधिकारे स्थितः सन् स्वापराधं निजदोषं न मन्यते न गणयति, स च उपकर्त्ता पूर्वोपकृतिं ध्वजीकृत्य पुरस्कृत्य सर्वमेव सर्वस्वमेव विलुम्पति अपहरति ॥ १२२ ॥

उपांशुक्रीड़ित इति। यतः यस्मात् उपांशुक्रीड़ितः रहस्यक्रीडासहायः प्रभावापन्न इत्यर्थः। अमात्यः सचिवः स्वयं राजायते राजा इव आचरति ध्रुवं निश्चितं सदा सर्वदा परिचयात् सम्पर्कात् हेतोः तेन अमात्येन राज्ञा अवहेला क्रियते सम्पाद्यते ॥ १२३ ॥

अन्तर्दुष्ट इति। किल प्रसिद्धौ, अन्तर्दुष्टः अन्तरे दोषपरिपूर्णः, क्षमायुक्तः बाह्ये क्षमायोगः, सर्वानर्थकरः सर्वान् अनर्थान् अनिष्टापातान् करोति जनयति यः सः तादृशो भवतीति भावः। भूपते राजन्! अत्र विषये शकुनिः कौरवः, दुर्योधनस्य मातुल इत्यर्थः, शकटारश्च बदान्य-नन्दराजस्य दृष्टान्तौ आदर्शस्वरूपौ ॥ १२४ ॥

सदायत्येति। हि निश्चये समृद्धः ऐश्वर्यसम्पन्नः सर्व एव सदा सर्वदा स्वकाम् एकदापि असाध्यः अनिवार्यतरः

प्राप्तार्थाग्रहणं द्रव्यपरिवर्त्तोऽनुरोधनम् ।
उपेक्षा बुद्धिहीनत्वं भोगोऽमात्यस्य दूषणम् ॥ १२६ ॥
नियोग्यार्थग्रहापायो राज्ञां नित्यपरीक्षणम् ।
प्रतिपत्तिप्रदानं च तथा कर्मविपर्य्ययः ॥ १२७ ॥
नापीड़िता वमन्त्युच्चैरन्तःसारं महीपतेः ।
दुष्टव्रणा इव प्रायो भवन्ति हि नियोगिनः ॥ १२८ ॥
मुहुर्नियोगिनो बोध्या वसुधारा महीपतेः ।
सकृत् किं पीड़ितं स्नानवस्त्रं मुञ्चेद्घृतं कम् ॥ १२९ ॥

सिद्धपुरुषाणाम् अयम् आदेशः उपदेशः, यत् ऋद्धिः धनसम्पत्तिः विका-रिणी चित्तस्य विकारिणी विकृतिसम्पादिका, भवतीति शेषः ॥ १२५ ॥

प्राप्तेति । प्राप्तार्थाग्रहणं प्राप्तानाम् उपस्थितानाम् अर्थानां धनस्य-कानाम् अग्रहणम् अनादानम्, द्रव्यपरिवर्त्तः द्रव्याणां विनिमयः, अनु-स्वजनानामनुरोधरक्षा, उपेक्षा औदास्यम्, बुद्धिहीनत्वं मूढ़ता, भोगः चन्दनवनितादिसम्भोगे अभिनिवेशः, एतत् सर्व्वम् अमात्यस्य सचिवस्य दोषः ॥ १२६ ॥

नियोग्येति । नियोग्यार्थग्रहापायः नियोग्यस्य स्वामिनः अर्थग्रह-सञ्चयस्य अपायः नाशः, राज्ञां भूपालानां नित्यपरीक्षणं नियतं परीक्षा, राजा मयि अनुरक्तो विरक्तो वेति, नियतपरीक्षणमित्यर्थः । प्रतिपत्ति-प्रतिपत्तेः प्रभुसन्तोषलब्धद्रव्यस्य प्रदानं अन्यस्मिन् वितरणम्, तथा कर्म-विपर्य्ययः कर्म्मणः कार्य्यस्य विपर्य्ययः व्यत्यासः, कार्य्यस्य वैपरीत्यकरणमिति । एतत् सर्व्वम् अमात्यस्य दूषणमिति पूर्व्वश्लोकेनान्वयः ॥ १२७ ॥

नापीड़िता इति । महीपतेः राज्ञः नियोगिनः अधिकारविशेषनि-जनाः प्रायः प्रायेण दुष्टव्रणा इव शरीरस्य दूषितव्रणा इव भवन्ति यस्मात् यतस्ते दुष्टव्रणा नियोगिनश्च अपीड़िता न निष्पीड़िताः सन्तः उच्चैरति-अन्तःसारं दुष्टव्रणपक्षे पूयादिकं नियोगिपक्षे अन्तर्गतभावं न वमन्ति उद्गिरन्ति ॥ १२८ ॥

मुहुरिति । महीपतेः राज्ञः । कर्त्तरि षष्ठी । नियोगिनः अधिकारि-वसुधाराः धनसञ्चयाः मुहुर्वारंवारं बोध्याः अनुसन्धेयाः तद्

एतत् सर्वं ज्ञात्वा यथावसरं व्यवहर्त्तव्यम् । पिङ्गलको अस्ति तावदेवं, किन्तु एतौ सर्वथा न मम वचनकरौ । दमनको ब्रूते, एतत् सर्वथानुचितम् ॥ १४० ॥

आज्ञाभङ्गकरान् राजा न क्षमेत सुतानपि ।
विशेषः को नु राज्ञश्च राज्ञश्चित्रगतस्य च ॥ १४१ ॥

स्तब्धस्य नश्यति यशो विषमस्य मैत्री
नष्टेन्द्रियस्य कुलमर्थपरस्य धर्मः ।
विद्याफलं व्यसनिनः कृपणस्य सौख्यं
राज्यं प्रमत्तसचिवस्य नराधिपस्य ॥ १४२ ॥

पितश्च, तस्करेभ्यो नियुक्तेभ्यः शत्रुभ्यो नृपवल्लभात् ।
नृपतिर्निजलोभाच्च प्रजा रक्षेत् पितेव हि ॥ १४३ ॥

...स्य स्नानकालीनवस्त्रं किं करोत् पीडितं यत् कर्दमं ... ...र्वः । रक्षेत् त्यजेत् ॥ १३८ ॥

एतदिति । यथावसरं अवसरमनतिक्रम्य यथाकालमित्यर्थः । व्यवहर्त्तव्यम् ...रणीयम् । वचनकरौ वचने स्थितौ । अनुचितम् अविधेयम् ॥ १४० ॥

आज्ञाभङ्गेति । राजा भूपतिः आज्ञाभङ्गकरान् आज्ञापालनविमुखान् ...अपि सुतानपि न क्षमेत नानुमन्येत । आज्ञाभङ्गे तु राज्ञः प्रकृतभूपा... चित्रगतस्य चित्रपटलिखितस्य च राज्ञः को विशेषः को भेदः ॥ १४१ ॥

स्तब्धस्येति । स्तब्धस्य उद्धतस्वभावस्य, यशः सद्गुणकीर्त्तनम्, विषमस्य ...म् ... मैत्री मित्रता, नष्टेन्द्रियस्य इन्द्रियदोषसम्पन्नस्य, कुलं मर्यादा, अर्थपरस्य धनलोलुपस्य धर्मः, व्यसनिनः द्यूतमृगयादिव्यसनवता... विद्याफलं विद्याध्ययनफलं, कृपणस्य व्ययकुण्ठस्य सौख्यं सुखं, ...सचिवस्य प्रमत्तः उन्मार्गगामी सचिवो यस्य तादृशस्य नराधिपस्य राज्ञः ...ं नश्यति ध्वस्तं भवति ॥ १४२ ॥

तस्करेभ्य इति । नृपतिः राजा पितेव जनक इव प्रजाः राज्यस्थित... ...न् तस्करेभ्यः चौरेभ्यः, नियुक्तेभ्यः नियुक्तेभ्यः, नियतकार्येभ्य इत्यर्थः । ...भ्यः रिपुभ्यः, नृपवल्लभात् राजप्रियजनात्, निजलोभात् आत्मलोभात्, ...त् अत्याचारात् रक्षां कुर्यात् ॥ १४३ ॥

भ्रातः ! सर्वथा मद्वचनं क्रियताम् । आहारोऽप्यद्यास्माभि
कृत एव । अयं शस्यभक्षकः सञ्जीवको भोजनाधिकारे नि
ज्यताम् । एतद्वचनात् तथानुष्ठिते सति पिङ्गलकसञ्जीवक
सर्वबन्धुपरित्यागेन महता स्नेहेन कालोऽतिवर्त्तते । ततो
जीविनामप्याहारदाने शैथिल्यदर्शनाद्दमनककरटकावन्यो
चिन्तयतः । तदाह दमनकः । किमत्र विधेयम् ? आत्मकृतो
दोषः । स्वयं कृतेऽपि दोषे परिदेवनमप्यनुचितम् ॥ १४४ ॥
तथा चोक्तम्, "स्वर्णरेखामहं स्पृष्ट्वा बद्धात्मानञ्च दूतिका ।
आदित्सुश्च मणिं साधुः स्वदोषाद्दुःखिता इमे ॥ १४५ ॥
करटकः पृच्छति, कथमेतत् ? दमनकः कथयति ।
काञ्चनपुरनाम्नि नगरे वीरविक्रमो नाम राजा । तस्य
ारिणा कश्चित् नापितो वध्यभूमिं नीयमानः कन्दर्प
ना परिव्राजकेन साधुद्वितीयेन नायं वध्य इत्युक्त्वा वस्त्रा

भ्रातरिति । सर्वथा सर्वतोभावेन । मद्वचनं मम वाक्यम् ।
नम् । भोजनाधिकारे भोजनस्य भक्ष्यद्रव्यस्य अधिकारे
धिकारित्वे । नियुज्यतां स्थाप्यताम् । अनुष्ठिते कृते सति ।
ेन सर्वेषां बन्धूनां मित्राणां परित्यागो विसर्जनं यस्मिन् ।
ेयमेतत् । अतिवर्त्तते गच्छति । अनुजीविनां सेवकानाम् ।
द्रव्यप्रदाने । शैथिल्यदर्शनात् औदास्यावलोकनात् । अन्योन्यं
ेयं कर्त्तव्यम् । आत्मकृतः आत्मना कृतः अनुचितः । परिदेवनं
ुचितम् अकर्त्तव्यम् ॥ १४४ ॥

स्वर्णरेखामिति । अहं स्वर्णरेखां सुवर्णमयीं रेखां स्पृष्ट्वा
दूतिका च आत्मानं बद्ध्वा बन्धनावस्थायां संस्थाप्य साधुर्भिक्षुः
मणिरत्नम् आदित्सुः ग्रहीतुमिच्छुः, इमे एते त्रयः
निजकृतेनैव दोषेण हेतुना दुःखिताः दुःखभागिनो जाताः ॥ १४५ ॥
करटक इति । धर्म्माधिकारिणा धर्म्माधिकरणे नियुक्तेन ।
निपुणविवेकेन, अपूर्वाद्भुतेन इत्यर्थः । साधुद्वितीयेन साधुः

:। राजपुरुषा ऊचुः, किमिति नायं वध्यः ? स आह,
ताम्। स्वर्णरेखामहं स्पृष्टा इत्यादि पठति। ते आहुः,
मेतत् ? परिव्राजकः कथयति ॥ १४६ ॥

अहं सिंहलद्वीपस्य भूपतेर्जीमूतकेतोः पुत्रः कन्दर्पकेतुः।
कदा केलिकाननावस्थितेन मया पोतवणिङ्मुखाच्छ्रुतं,
त्र समुद्रमध्ये चतुर्दश्यामाविर्भूतकल्पतरुतले मणिकिरणा-
कर्बुरपर्य्यङ्के स्थिता सर्वालङ्कारभूषिता लक्ष्मीरिव वीणां
दयन्ती कन्या काचिद्दृश्यत इति। ततोऽहं तं पोतवणिज-
दाय पोतमारुह्य तत्र गतः। अनन्तरं तत्र गत्वा मया
व सा अवलोकिता। ततस्तल्लावण्यगुणाकृष्टेन पश्चान्म-
पि झम्पो दत्तः। तदनन्तरं कनकपत्तनं प्राप्य सुवर्णप्रासादे
व सा पर्य्यङ्कस्था विद्याधरीभिरभिनवयौवनाभिरुपास्य-
ना मयावलोकिता ॥ १४७ ॥

तोयो यस्य तेन। न अयं वध्यः हन्तव्यः। वक्षःस्थले वसनप्रान्ते। एतः
हीतः ॥ १४६ ॥

अहमिति। केलिकाननावस्थितेन केलिकानने क्रीडोद्याने अवस्थितेन
धिष्ठितवता। पोतवणिङ्मुखात् पोतवणिजां पोतद्वारा वाणिज्यं कुर्वतां
खात् वदनात्। श्रुतम् आकर्णितम्। आविर्भूतकल्पतरुतले आविर्भूतस्य प्रक-
भूतस्य कल्पतरोः कल्पद्रुमस्य तले अधस्तात्। मणिकिरणावलीकर्बुरपर्य्यङ्के
णीनां रत्नानां ये किरणाः तेषां आवली श्रेणी तया कर्बुरं चित्रितवर्णं यत्
र्य्यङ्कं तस्मिन्। स्थिता आसीना। सर्वालङ्कारभूषिता सर्वैः सकलैः अलङ्कारैः
शोभूषणैः भूषिता अलंकृता। वीणां देवानां वादनीययन्त्रविशेषम्। पोत-
णिजं नौकाद्वारा वाणिज्यकारिणम्। आदाय गृहीत्वा। पोतं नौकाम्।
आरुह्य अधिरुह्य। तत्र, यत्र सा दृष्टा तस्मिन् स्थाने। गतः प्रस्थितः। तथैव
र्वोक्तानुरूपैव सा कामिनी अवलोकिता दृष्टा। तल्लावण्यगुणाकृष्टेन तस्याः
लावण्यं शरीरकान्तिः तदेव गुणः रज्जुः तेन आकृष्टेन आहृतेन। कनक-
पत्तनं तदाख्यनगरम्। सुवर्णप्रासादे हिरण्मयाट्टालिकायाम्। पर्य्यङ्कस्था
पर्य्यङ्कस्था। अभिनवयौवनाभिः नूतनतारुण्यवतीभिः। उपास्यमाना से-

तथाप्यहं दूरादेव दृष्ट्वा तस्याः प्रभावात् सादरं सम्भाषितः तत्सख्या च मम कथितं समाख्यातम् । एषा कन्दर्पकेलि नाम्नो विद्याधरचक्रवर्त्तिनः पुत्री रत्नमञ्जरी नाम, अनया प्रतिज्ञातम् । यः कनकपत्तनं स्वचक्षुषागत्य पश्यति, स पितुरगोचरेऽपि मां परिणेष्यतीति । अतोऽस्या मनसः कामं तदिमां गान्धर्वविवाहेन परिणयतु भवान् । अथ तत्र गान्धर्वविवाहे तया सहाहं रममाणश्चिरं तत्र तिष्ठामि । एकदा रहसि तयोक्तं. स्वामिन् ! स्वेच्छया सर्वमिदं भोक्तव्यं, किन्तु एषा चित्रगता स्वर्णरेखा नाम विद्याधरी न कदाचित् स्प्रष्टव्या । पश्चादुपजातकौतुकेन मया सा रेखा स्वहस्तेन स्पृष्टा । तया च चित्रगतयाप्यहं चरणपद्मेनागत्य स्वराष्ट्रे पतितः । अतो दुःखार्त्तोऽहं प्रव्रज्य पृथिवीं परिभ्रमन् इमां नगरीमनुप्राप्तः ॥१४८॥

अथ चातिक्रान्ते दिवसे गोपगृहे सुप्तः सन् प्रदोषसमये स गोपो गोष्ठादागतः स्ववधूं दूत्या सह मन्

माना । अवलोकिता दृष्टा ॥ १४७ ॥

तथापीति । सादरं समादरेण सह । सम्भाषितः कृतसम्भाषणः । तत्सख्या तस्याः कामिन्याः सख्या सहचर्या । इत्या जिज्ञासित समाख्यातं कथितम् । विद्याधरचक्रवर्त्तिनः विद्याधराधिपस्य । प्रतिज्ञा कृता इत्यर्थः । स्वचक्षुषा निजदृष्ट्या मां परिणेष्यति मम पाणिग्रहणं करिष्यतीत्यर्थः । गन्धर्वविवाहेन गन्धर्वविवाहनामकविवाहरीत्या । सम्पन्ने । रममाणः क्रीड़मानः । चिरं बहुदिनम् । रहसि निर्ज्जने । रत्नमञ्जर्या । उक्तं कथितम् । स्वेच्छया आत्मेच्छानुसारेण । नीया । उपजातकौतुकेन सञ्जातकुतूहलेन । चित्रगतया भित्तौ । चरणपद्मेन पादसरोजेन । आहतस्ताड़ितः । स्वराष्ट्रे निजराज्ये । दुःखेन कातरः । प्रव्रजितः प्रव्रज्याश्रमं गृहीतवान् ॥ १४८ ॥

अथ चेति । अतिक्रान्ते अतीते । गोपगृहे गोपस्य भवने ।

मपश्यत् । ततस्तां गोपीं ताडयित्वा स्तम्भे बद्धा सुप्तः ।
अर्द्धरात्रेऽस्य नापितस्य वधूर्दूती पुनस्तां गोपीमुपेत्यावदत्,
वियोगानलदग्धोऽसौ मुमूर्षुरिव वर्त्तते महानुभावः ।
इमामानमत्र बद्धा तिष्ठामि, त्वं तत्र गत्वा तं सम्भाव्य
रमागच्छ ॥१४८ ॥

तथानुष्ठिते सति स गोपः प्रबुद्धोऽवदत् । इदानीं जारा-
कं कथं न यासि । ततो यदा सा दूती न किञ्चित् ब्रूते,
दर्पान्मम वचनस्योत्तरं न ददासि ! इत्युक्त्वा प्रकुप्य तस्या-
न नासिका छिन्ना । तथा कृत्वा पुनः सुप्तो गोपो निद्रामुपा-
तः । अथागता सा गोपी दूतीमपृच्छत् । का वार्त्ता ? दूती

गतः । अपश्यत् दृष्टवान् । प्रदोषसमये सायकाले । गोपः गोपालकः ।
तात् मोरवमपश्यानात् । वधूं निजभार्याम् । दूत्या [illegible] । [illegible]
[illegible] कुर्वन्तीम । अपश्यत् दृष्टवान् ।
तां गोपीं निजभार्याम् [illegible] । ताडयित्वा प्रहृत्य । [illegible] ।
[illegible] । [illegible] । अर्द्धरात्रे रात्रेरर्द्धे अर्द्ध-
[illegible] । [illegible] ।
[illegible] । वधूः भार्या । दूती [illegible] । सा गोपी
[illegible] । [illegible] । अवदत् अकथयत् । वियोगानलदग्धः
[illegible] । मुमूर्षुरिव [illegible] । [illegible]
[illegible] । महानुभावः महान् अनुभावो यस्य सः, [illegible] । [illegible]
[illegible] । [illegible]
[illegible] ॥ १४८ ॥

[illegible] । अनुष्ठिते कृते सति । प्रबुद्धः [illegible] । अवदत् [illegible] ।
[illegible] । [illegible] । [illegible]
[illegible] । [illegible] । न किञ्चित् ब्रूते [illegible] । [illegible]
[illegible] । [illegible] । [illegible] । [illegible]
[illegible] । [illegible] । [illegible] । [illegible]
[illegible] । [illegible] । [illegible] । [illegible] ।

...ाप, पश्य, मम मुखमेव वार्त्तां कथयति । अनन्तरं
...पी तथैवात्मानं बद्धावस्थिता । दूती छिन्ननासिका ...
...गृहं प्रविश्य स्थिता ॥ १५० ॥

ततः प्रभाते तेन नापितेन क्षुरभाण्डं याचिता सती ...
...सौ क्षुरभाण्डमदत्त्वा क्षुरमेकं प्रादात् । पश्चादस्य ...
...कुपितः क्षुरं दूरादेव गृहे प्रक्षिप्तवान् । अथ कृतार्त्तनादा ...
...नापराधेनानेन मम नासिका छिन्ना ? इत्युक्त्वा धर्मा-
...धिकारिसमीपमेनमानीतवती । सा च गोपी तेन गोपेन ...
...च । अरे पाप ! को मां महासतीं निरूपयितुं समर्थः ...
...न व्यवहारमष्टौ लोकपाला एव जानन्ति ॥ १५१ ॥

...ः सुप्तः शयानः । निद्राम् उपगतः निद्रितः । अथ आगता जारसं...
... पूरयित्वा प्रत्यागता । दूतीं कुट्टिनीम् । अपृच्छत् जिज्ञासितवती । ...
...र्त्ता ? को वृत्तान्तः । मम मुखं वदनमेव । वार्त्तां वृत्तान्तम् । कथयिष्यति ...
...थयिष्यति । मम नासाच्छेदेनैव मम सर्ववृत्तान्तोऽनुमेयः इति भा...
...थैव पूर्ववदेव । आत्मानं बद्ध्वा बन्धनावस्थायां संस्थाप्य । अवस्थिता ...
...नं कृतवती । दूती कुट्टिनी नापितवधूरित्यर्थः । छिन्ननासिका छि...
...पेन खण्डितां नासिकां गृहीत्वा हस्तेनादाय । निजगृहं आत्मभवनं ...
...विश्य गत्वा । स्थिता अवस्थानं कृतवती ॥ १५० ॥

...त इति । ततस्तदनन्तरम् । प्रभाते प्रातःकाले । तेन नापितेन ...
...ट्टिनीभर्त्रा इत्यर्थः । क्षुरभाण्डं क्षुराधारं याचिता प्रार्थिता सती ...
...ट्टिनी तस्मै स्वामिने क्षुरभाण्डं क्षुराधारं अदत्त्वा अप्रदाय क्षुरमेकं ...
...कमेव क्षुरमित्यर्थः । प्रादात् दत्तवती । पश्चात् तदनन्तरम् अयं ...
...नीत इत्यर्थः । नापितः प्रकुपितः कोपाविष्टः क्षुरं तमद्दत्तक्षुरं दूरा-
...दूरादेव इत्यर्थः । गृहे भवने प्रक्षिप्तवान् चिक्षेप । अथ अनन्तरं ...
कृतः आर्त्तनादः कातरध्वनिर्यया सा, इयं कुट्टिनी अपराधेन ...
...व्यतिरेकेण अनेन मम स्वामिना इत्यर्थः । मम नासिका छि...
... इति कथयित्वा, एनं स्वस्वामिनं धर्माधिकारिसमीपं धर्माधिकारि...
... ... नियुक्तानां विचारकाणामित्यर्थः । समीपं सन्निधौ । ...

र:,
आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्म्मोऽपि जानाति नरस्य वृत्तम् ॥ १५२ ॥

ततोऽहं यदि महासती निजस्वामिनं विहाय नान्यं मन-
ापि चिन्तयामि ? तदा मम मुखमक्षतं भवतु । ततो याव-
सौ गोपः प्रदीपमानीय तस्या मुखं पश्यति, तावदक्षतं मुख-
वलोक्य तच्चरणयोः पतितः । योऽयमास्ते साधुरेतद्वृत्तान्त-
पि शृणुत ॥ १५३ ॥

अय स्फुटाग्निःसृतो द्वादशभिर्वर्षैर्मलयोपकण्ठादिमां
गरीमागतः । अत्र च वेश्यागृहे सुप्तः । ततः कुट्टन्या गृह-
ारि स्थापितकाष्ठघटितवेतालस्य मूर्ध्नि रत्नमेकमुत्कृष्टमास्ते ।

ाँ चानयामास । अरे पाप । पापात्मन् ! महासती सतीनां मध्ये प्रधा-
म् । निरूपयितुं कथयितुम् । समयः क्षमः । व्यवहारम् आचरणम् ।
किपालाः इन्द्रचन्द्रादयः । जानन्ति अवगच्छन्ति ॥ १५१ ॥

आदित्येति । आदित्यचन्द्रौ आदित्यश्च चन्द्रश्च तौ । सूर्याचन्द्रमसौ,
नलो वायुः, अनलः अग्निः, द्यौः आकाशं, भूमिः पृथिवी, आपो जलं,
हृदयमन्तःकरणं, यमः प्रेतराजः, अहर्दिनं, रात्री रजनी, उभे सन्ध्ये
तःसन्ध्या सायं सन्ध्या च, धर्म्मोऽपि नरस्य मनुष्यस्य वृत्तं चरितं जानाति
वगच्छति ॥ १५२ ॥

अत इति । महासती अत्यन्तं साध्वी पतिव्रतेति । पतिव्रतात्वमस्या
र्थः । निजस्वामिनं स्वभर्तारम् । विहाय त्यक्त्वा । मनसापि चेतसापि ।
न्यं पुरुषं न चिन्तयामि । तदा मनुष्यकृतदंष्ट्रैः । मम मुखं वदनम्
तं पूर्ववत् अक्षतमिदं भवतु । एतद्वृत्तान्तम् एतस्य साधोर्वृत्तान्तं विव-
। शृणुत आकर्णयत ॥ १५३ ॥

इति । स्फुटात् निःसृतात् । निःसृतो निर्गतः । मलयोप-
कण्ठसमीपात् । आगतः उपस्थितः । कुट्टन्या वेश्यायाः
रक्षितः काष्ठेन दारुणा घटितः निर्मितः यो वेतालः

तद् द्रव्यार्थलुब्धेनानेन साधुना रात्रावुत्थाय क्षणो द
तदैव तेन वेतालेन सूत्रसञ्चारितेन माङ्गुष्ठाभ्यां पीडितः सद
नादं चकार। पश्चादुत्थाय कुट्टिन्योक्तं, पुत्र! मल
कराठाद्दागतोऽसि। तत् सर्व्वरत्नानि प्रयच्छास्मै, नो चेदने
त्यक्तव्योऽसि, इत्यमेवायं चेटकः। ततोऽनेन सर्व्वरत्नानि
तानि। अधुना चायमपि हृतसर्व्वस्वोऽस्मासु मिलितः॥१

एतत् सर्वं श्रुत्वा राजपुरुषैर्न्यायः प्रवर्त्तितः। नापि
मुण्डिता। गोपी शासिता। कुट्टिनी च दण्डिता।
धनानि प्रदत्तानि। अतोऽहं ब्रवीमि। स्वर्णरेखामहं
त्यादि। अतः स्वयं कृतोऽयं दोषः, अत्र विलपनमनुचि
त्वर्या विमृश्य। मित्र! सहसैव यथा अनयोः सौहार्द
कारितं तथा भेदोऽपि कार्य्यः॥ १५५॥

यतः,— अतथ्यान्यपि तथ्यानि दर्शयन्ति हि पेशलाः।
समे निम्नोन्नतानीव चित्रकर्मविदो जनाः॥ १५६

वेतालमूर्त्तिरित्यर्थः, तस्य। कुट्टिन्या इति स्थापितक्रियायाः कर्त्ता।
लुब्धेन धनलोलुपेन। सूत्रसञ्चारितेन रज्जुद्वारा चालितेन। आर्त्तनादं
ध्वनिम्। उत्थाय शय्यां परित्यज्य। सर्व्वाणि रत्नानि सर्व्वरत्नानि।
ऽसि मोचनीयोऽसि। समर्पितानि दत्तानि। हृतसर्व्वस्वः हृतं सर्व्वं
सर्व्वधनं यस्य सः। अस्मासु अस्मत्सम्प्रदाने। मिलितः सङ्गतः॥ १५४

एतदिति। न्यायः सूक्ष्मविचारः। प्रवर्त्तितः कृतः। मुण्डिता
शून्यीकृता। गोपी गोपपत्नी, शासिता दण्डिता। स्वयं आत्मना विलप
विलपनं विलापः। अनुचितम् अकर्त्तव्यम्। त्वर्यां सत्वरम्।
विविच्य। सहसैव हठादेव। सौहार्द्दं मित्रता। कारितं सम्पादितम्।
परस्परविच्छेदः। कार्य्यः सम्पादनीयः॥ १५५॥

अतथ्यानीति। चित्रकर्म्मविदः आलेख्यकुशलाः जनाः, समे
... वस्तूनि यथा दर्शयन्ति, तथा, पेशलाः कार्य्यकुशला
अपि मिथ्याभूतान्यपि। तथ्यानि सत्यरूपाणि दर्शयन्ति लोक
प्रकाशयन्ति॥ १५६॥

अन्यच्च, उत्पन्नेष्वपि कार्येषु मतिर्यस्य न हीयते।

स निस्तरति दुर्गाणि गोपी जारद्वयं यथा ॥ १५७ ॥

करटकः पृच्छति, कथमेतत्?। दमनकः कथयति।

अस्ति द्वारावत्यां पुर्य्यां कस्यचिद्गोपस्य वधूर्बन्धकी। सा च ग्रामस्य दण्डनायकेन तत्पुत्रेण च सह रमते ॥ १५८ ॥

तथा चोक्तम्, नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः।

नान्तकः सर्वभूतानां न पुंसां वामलोचना ॥१५९॥

अन्यच्च, न दानेन न मानेन नार्जवेन न सेवया।

न शस्त्रेण न शास्त्रेण विषमाः सर्वथा स्त्रियः ॥१६०॥

यतः, गुणाश्रयं कीर्त्तियुतं च कान्तं

पतिं रतिज्ञं सधनं युवानम्।

उत्पन्नेष्विति। गोपी गोपाङ्गना यथा जारद्वयम् उपपतियुगलं निस्तीर्णवती इति शेषः। तथा यस्य मतिर्बुद्धिः उत्पन्नेषु उपस्थितेषु कार्येषु विषयेषु न हीयते न लुप्यते स दुर्गाणि हठादुपस्थितविपदः निस्तरति अतिक्रामति ॥ १५७ ॥

करटक इति। बन्धकी कुलटा। दण्डनायकेन शान्तिरक्षकप्रधानेन। तत्पुत्रेण दण्डनायकतनयेन। रमते सहभोगसुखमनुभवति ॥ १५८ ॥

नाग्निरिति। अग्निः काष्ठानां दाहद्रव्याणां सम्बन्धे न तृप्यति न शान्तो भवति। तथा महोदधिः समुद्रः आपगानां नदीनां सम्बन्धे, अन्तको यमः सर्वभूतानां सर्वप्राणिनां सम्बन्धे, वामलोचना कामिनी पुंसां पुरुषाणां सम्बन्धे न तृप्यतीति शेषः ॥ १५९ ॥

न दानेनेति। स्त्रियः न दानेन न धनादिसम्प्रदानद्वारा, न मानेन सम्मानप्रदानद्वारा, न आर्जवेन न सरलतापदर्शनेन, न सेवया न सेवाद्वारा, न शस्त्रेण शस्त्रद्वारा, न शास्त्रेण न विद्याविस्तारद्वारा, वशगा भवन्तीति शेषः। अतएव सर्वदा सर्वतोभावेन स्त्रियः शाठ्यैः विपरीताचरणशीलाः ॥ १६० ॥

गुणाश्रयमिति। वनिताः स्त्रियः गुणाश्रयं गुणानामाधारं, कीर्त्तियुतं कीर्त्तिसम्पन्नं, कान्तं कमनीयं, सधनम् ऐश्वर्य्यसम्पन्नं, युवानं तरुणं, रतिज्ञं रतिकार्य्यकोविदं, पतिं स्वामिनं विहाय लघु शीघ्रं इतरं परं पुरुषं शीलादिरहितं

विहाय शीघ्रं वनिता व्रजन्ति
नरं परं शीलगुणादिहीनम् ॥ १६१ ॥

अपरञ्च, न तादृशीं प्रीतिमुपैति नारी
विचित्रशय्यां शयितापि कामम् ।
यथा हि दूर्वादिविकीर्णभूमौ
प्रयाति सौख्यं परकान्तसङ्गात् ॥ १६२ ॥

अथ सा कदाचित् दण्डनायकसुतेन सह रमम-
तिष्ठति । अत्रान्तरे दण्डनायकोऽप्यागतः । तं दृष्ट्वा तत्
कुशूले धृत्वा दण्डनायकेन समं तथैव क्रीडितवती । अनन्
तस्या भर्त्ता गोपो गोष्ठात् समागतः । तमालोक्य गोप्योक्त
दण्डनायक ! त्वं लगुडं गृहीत्वा कोपं दर्शयन् सत्वरं गच्छ
तथानुष्ठिते सति स गोपस्तत्रागत्य भार्य्यां पृष्टवान् । केन क
र्येन दण्डनायकः समागतोऽत्र ? सा ब्रूते, अयं केनापि कारण

सुशीलता-सद्गुणादि-सम्पर्क-रहितम् । आदिपदेन रूपमप्याक्षिप्यते । प
पाठान्तरं, विहाय शीघ्रं वनिता परं नरं प्रयाति हीनं गुणजातिरू
परं नरं परपुरुषम् उपपतिमित्यर्थः । व्रजन्ति गच्छन्ति ॥ १६१ ॥

न तादृशीमिति । नारी रमणी दूर्वादिविकीर्णभूमौ दूर्वाप्रभृति
स्थाने परकान्तसङ्गात् परपुरुषसंसर्गात् यथा सौख्यं सुखानुभवं
प्राप्नोति, विचित्रशय्यां रमणीयशयने शयितापि शयानापि तादृशीं
विधां प्रीतिं परितोषं न उपैति न प्राप्नोति, भर्तृसंसर्गेणेति शेषः ॥ १६२ ॥

अथेति । कदाचित् कस्मिन्नपि समये दण्डनायकपुत्रेण आलि
ष्य तत्रैव । रममाणा रतिसुखमनुभवन्ती । अत्रान्तरे एतस्मिन्
दण्डनायकः तस्य पिता तन्वंशः । आगत उपस्थितः । कुशूले धान्य
धान्यविशेषे । धृत्वा स्थापयित्वा । क्रीडितवती रेमे । गोष्ठात् गोशाल
आगत उपस्थितः । लगुडं यष्टिम् । गृहीत्वा आदाय । कोपं रो
प्रकाशयन् । सत्वरं शीघ्रम् । याहि निर्गच्छ । तथा तदाज्ञ
। अनुष्ठिते कृते । गोपः गोपालकः । भार्य्यां वधूम् । पृष्टवान्

तस्योपरि क्रुद्धः। स च पलायमानोऽत्रागत्य प्रविष्टः। मया कुशूले निक्षिप्य रक्षितः। तत्पित्रा चान्विष्यता गृहे न दृष्टः। सोऽयं कुपित एव गच्छति। ततः सा तत्पुत्त्रं कुशूलाद्बहिराकृष्य दर्शितवती॥ १६३॥

तथा चोक्तम्। आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः॥ १६४॥

अतोऽहं ब्रवीमि। उत्पन्नेष्वपि कार्येषु इत्यादि। करटको ब्रूते, अस्त्वेवं, किन्त्वनयोर्महान् नैसर्गिकः स्नेहः, कथं भेदयितुं शक्यः। दमनक आह, उपायश्चिन्तनीयः। १६५।

तथा चोक्तम्, उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः।
काकी कनकसूत्रेण कृष्णसर्पमघातयत्॥ १६६॥

कस्मात्। केन कारणेन हेतुना। अत्र समागतः मदीयभवने उपस्थितः। तस्योपरि कुपितः। पलायमानः अपसृत्य। अत्र अस्माकं भवने। आगत्य आश्रयाय। प्रविष्टः प्राविशत्। निक्षिप्य स्थापयित्वा। रक्षितः गोपायितः। तत्पित्रा दण्डनायकेन। अन्विष्यता अन्वेषयता। गृहे भवने। न दृष्टः न लोकितः। कुपित एव रुष्ट एव। गच्छति निःसरति। बहिराकृष्य निःसार्य। दर्शितवती। दर्शयामास॥ १६३॥

आहार इति। स्त्रीणां नारीणां आहारः भोजनं द्विगुणः पुरुषापेक्षये-त्यर्थः। तासां स्त्रीणां बुद्धिः चातुर्यं चतुर्गुणा च पुरुषापेक्षया चतुर्गुणिता। व्यवसायः कार्ये प्रवृत्तिः षड्गुणः पुरुषापेक्षया षड्गुणितः। कामश्च सम्भोगाभिलाषश्च अष्टगुणः, स्मृतः कथितः॥ १६४॥

अस्त इति। नैसर्गिकः स्वाभाविकः। स्नेहः परस्परानुरागः। भेद-यितुं पृथक्कर्तुम्। शक्यः साध्यः। उपायः कार्यसाधनसामग्री। चिन्तनीयः अनुसन्धेयः। १६५।

उपायेनेति। उपायेन कौशलेन यत् कार्यं शक्यं साध्यं, पराक्रमैः बलैः तत् न शक्यं न साध्यम्। तथाहि काकी कनकसूत्रेण सुवर्णहारेण, कृष्णसर्पम् अघातयत् विनाशितवान्॥ १६६॥

करटकः पृच्छति, कथमेतत्? दमनकः कथयति।
न्श्चित् तरौ वायसदम्पती निवसतः। तयोश्चापत्या
कोटरावस्थितकृष्णसर्पेण खादितानि। ततः पु
वायसी ब्रूते, स्वामिन्! त्यज्यतामयं तरुः। अत्र याव
सर्पस्तावदावयोः सन्ततिः कदाचिदपि न भविष्यति।

यतः, दुष्टा भार्य्या शठं मित्रं भृत्यश्चोत्तरदायकः।
ससर्पे च गृहे वासो मृत्युरेव न संशयः॥१

वायसो ब्रूते, प्रिये! न भेतव्यम्। वारं वारं
महापराधः सोढ़ः। इदानीं पुनर्न क्षन्तव्यः। व
कथमनेन बलवता कृष्णसर्पेण सार्द्धं भवान् विग्रहीतुं स
वायसो ब्रूते, अलमनया चिन्तया। १६८।

यतः, बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम्।
पश्य सिंहो मदोन्मत्तः शशकेन निपातितः॥

करटक इति। वायसदम्पती स्त्रीपुंवायसौ, निवसतः तिष्ठ
त्यानि शावकाः। तरुकोटरावस्थितकृष्णसर्पेण तरोर्वृक्षस्य को
अवस्थितः उषितः यः कृष्णसर्पः तेन। खादितानि भक्षितानि।
सगर्भा। वायसी काकी। त्यज्यतां परित्यज्यताम्। सन्ततिः अपत्यम्॥१६७

दुष्टेति। दुष्टा दोषयुक्ता भार्य्या पत्नी, शठं धूर्त्तं, मित्रं बन्धुः, उत्त
रदायकः समान-मतयुक्ति-प्रयोगकर्त्ता भृत्यः, ससर्पे सर्पयुक्ते गृहे भवने वा
मृत्युरेव मरणमेव, न संशयः सन्देहाभावः॥१६८॥

वायस इति। न भेतव्यं न शङ्कितव्यम्। महान् अपराधः महापरा
धत्याचार इत्यर्थः। सोढ़ः क्षान्तः। न क्षन्तव्यः न सोढ़व्यः। ब
भवतेन। विग्रहीतुं योद्धुम्। समर्थः क्षमः॥१६९॥

बुद्धिरिति। यस्य बुद्धिः, तस्य बलं सामर्थ्यं, निर्बुद्धेः बुद्धिहीनस्य
बलं बलवत्ता कुतः? बुद्धिहीनो दुर्बल इत्यर्थः। पश्य अवलोकय, मदो
गर्व्वेण उन्मत्तः सिंहः पशुराजः, शशकेन तदाख्यक्षुद्रप्राणिना
निपातितः॥१७०॥

वायसाह, कथमेतत् ? वायसः कथयति । अस्ति मन्दर-
न्नि पर्वते दुर्दान्तो नाम सिंहः । स च सर्वदा पशूनां वधं
दधान एवास्ते । ततः सर्वैः पशुभिर्मेलकं कृत्वा स सिंहो
प्तः । देव ! किमर्थं सर्वपशुवधः क्रियते ? वयमेव
दाहारार्थं प्रत्यहमेकैकं पशुमुपढौकयामः । सिंहेनोक्तं,
द्येतदभिमतं भवतां, तर्हि भवतु । ततः प्रभृति प्रत्यहमेकैकं
शुमुपकल्पितं भक्षयन्नास्ते । अथ कदाचित् कस्यापि वृद्ध-
यकस्य वारः प्राप्तः । ततः सोऽचिन्तयत् ॥ १७१ ॥

त्रासहेतोर्विनीतिस्तु क्रियते जीविताशया ।
पञ्चत्वं चेद्गमिष्यामि किं सिंहानुनयेन मे ॥ १७२ ॥

तन्मन्दं मन्दमुपगच्छामि । ततः सिंहोऽपि क्षुधापीड़ितः
कोपात् तमुवाच । कुतस्त्वं विलम्बादागतोऽसि ? शशकोऽब्र-
वीत् । नाहमपराद्धः, पथि सिंहान्तरेण बलाद्धृतः । तस्याग्रे
पुनरागमनाय शपथं कृत्वा स्वामिनं निवेदयितुमत्रागतो-

वायसोति । वधं विनाशम् । विदधान सम्पादयन् । आस्ते प्रतिवसति ।
मेलकं कृत्वा मिलित्वेत्यर्थः । विज्ञप्तः निवेदितः । सर्वपशुवधः सर्वेषां पशूनां
वधो विनाशः । भवदाहारार्थं भवतः भोजननिमित्तम् । प्रत्यहं प्रतिदिनम् ।
उपढौकयामः उपहारक्रमेण दास्यामः । अभिमतम् अभिप्रेतम् । उपकल्पितम्
उपस्थापितम् । भक्षयन् खादन् । वृद्धशशकस्य वारः पर्यायदिवसः प्राप्तः
उपस्थितः ॥ १७१ ॥

त्रासहेतोरिति । त्रासहेतोर्भयहेतोः जीविताशया प्राणरक्षणेच्छया
विनीतिः विनयः क्रियते अनुष्ठीयते । अहं चेत् यदि पञ्चत्वं मृत्युं गमिष्यामि
प्राप्स्यामि, तदा सिंहानुनयेन सिंहस्य प्रीतिविधानेन मम किम् ? न किमपि
फलं भविष्यतीति भावः ॥ १७२ ॥

तन्मन्दमिति । उपगच्छामि सिंहसमीपवर्त्ती भवामि । क्षुधापीड़ितः
बुभुक्षया कातरः । कोपात् क्रोधात् । विलम्बात् कालातिपातं कृत्वा ।
आगतोऽसि उपस्थितोऽसि । पथि मार्गे । सिंहान्तरेण अपरकेसरिणा । बलात्

ऽस्ति। सिंहः सकोपमाह, सत्वरं गत्वा मां दर्शय, क्वास्ते दुरात्मा तिष्ठति ॥ १७३ ॥

ततः शशकस्तं गृहीत्वा गम्भीरकूपसमीपमागतः। इहागत्य पश्यतु स्वामी, इत्युक्त्वा तस्मिन् कूपजले तस्यैव प्रतिबिम्बं दर्शितवान्। ततोऽसौ दर्पाध्मातस्तस्योपरि आत्मानं निक्षिप्य पञ्चत्वं गतः। अतोऽहं ब्रवीमि। बुद्धिर्यस्य इत्यादि। वायस्युवाच, श्रुतं मया, कर्त्तव्यतां ब्रूहि ॥१७४॥

वायसोऽवदत्। प्रिये! आसन्ने सरसि राजपुत्रः प्रत्यहमागत्य स्नाति। तस्मिन् प्रस्तावे तदङ्गादवतारितं कनकसूत्रं चञ्च्वा धृत्वानीयास्मिन् कोटरे धारयिष्यसि। अथ कदाचित् कनकसूत्रं दृषदि संस्थाप्य स्नातुं प्रविष्टे राजपुत्रे वायस्या तदनुष्ठितम् ॥ १७५ ॥

अथ कनकसूत्रानुसरणप्रवृत्तै राजपुरुषैः कोटरे निरूप्यमाणः कृष्णसर्पो व्यापादितः। ततोऽहं ब्रवीमि। उपायेन

गृहीतः। तस्यापि तस्य समीपे। पुनरागमनाय पुनः प्रत्यागमनाय। दिव्यम्। निवेदयितुं विज्ञापयितुम्। सकोपं सरोषम्। दुरात्मा दुराचारः ॥ १७३ ॥

तत इति। गृहीत्वा समभिव्याहृत्य। गम्भीरकूपसमीपं दुरवगाहकूपसन्निधौ। आगतः उपस्थितः। प्रतिबिम्बं शरीरच्छायाम्। दर्शितवान् दर्शयामास। दर्पाध्मातः दर्पेण बलगर्वेण आध्मातः उत्तेजितः। निक्षिप्य ... वायसी काकी। कर्त्तव्यतां यथाकर्त्तव्यम् ॥ १७४ ॥

वायस इति। आसन्ने समीपवर्त्तिनि। सरसि सरोवरे। राजपुत्रः राजकुमारः। आगत्य आगम्य। स्नाति स्नानं करोति। तदङ्गात् ... अवतारितं मोचितम्। कनकसूत्रं सुवर्णनिर्मितकण्ठाभरणविशेषम्। ... चञ्च्वा ... धृत्वा गृहीत्वा। कोटरे वृक्षगर्ते। धारयिष्यसि ... दृषदि प्रस्तरे। संस्थाप्य संरक्ष्य। अनुष्ठितं कृतम् ॥१७५॥

अथेति। कनकसूत्रानुसरणप्रवृत्तैः कनकसूत्रस्य सुवर्णमयकण्ठाभरणस्य अनुसरणे अन्वेषणे प्रवृत्तैः कृतोद्योगैः। राजपुरुषैः राज...

न्हि गच्छामित्यादि। करटक आह, यद्येवं तदा गच्छ, न्यानः सन्तु ते शिवाः। ततो दमनकः पिङ्गलकसमीपं गत्वा प्रणम्योवाच। देव! अत्याहितं मन्यमानो निवेदयितु-मागतः॥ १७६॥

यतः, आपद्युन्मार्गगमने कार्य्यकालात्ययेषु च।
कल्याणवचनं ब्रूयादपृष्टोऽपि हितो नरः॥ १७७॥

अन्यच्च, भोगस्य भाजनं राजा मन्त्री कार्य्यस्य भाजनम्।
राजकार्य्यपरिध्वंसी मन्त्री दोषेण लिप्यते॥ १७८॥

मात्यानामेष क्रमः,
वरं प्राणपरित्यागः शिरसो वापि कर्त्तनम्।
न तु स्वामिपदावाप्तिपातकेच्छोरुपेक्षणम्॥ १७९॥

रिभिः। निरुध्यमानः निरोद्धमानः। कृष्णसर्पः कालसर्पः। व्यापादितः मारितः। शिवाः कल्याणदायिनः। पिङ्गलकसमीपं पिङ्गलकस्य सन्नि-धिम्। देव! इति राज्ञः सम्बोधनम्। अत्याहितम् उपस्थितविपदम्। मन्य-मानः अनुमानः। निवेदयितुं ज्ञापयितुम्। आगतः उपस्थितः॥ १७६॥

आपदीति। आपदि आपत्काले उपस्थितायामिति शेषः। उन्मार्ग-गमने दुष्कर्म्मप्रवृत्तिसमये कार्य्यकालात्ययेषु च कार्य्यस्य कार्य्यनिर्वाहस्य यः कालः निर्दिष्टसमयः तस्य अत्ययेषु अतिक्रमेषु च, हितः मङ्गलाभिलाषी नरः मनुष्यः अपृष्टोऽपि अजिज्ञासितोऽपि कल्याणवचनं श्रेयस्करवाक्यं ब्रूयात् वदेत्॥ १७७॥

भोगस्येति। राजा भोगस्य विषयसम्भोगस्य भाजनं पात्रं, मन्त्री सचिवः कार्य्यस्य राजकार्य्यनिर्वाहस्य पात्रम्। राजकार्य्यपरिध्वंसी राज-कार्य्यध्वंसकारी मन्त्री सचिवः दोषेण अपराधेन लिप्यते लिप्तो भवति। राजकार्य्यपरिध्वंसे सचिव एव दोषी भवतीत्यर्थः॥ १७८॥

वरमिति। प्राणपरित्यागः जीवनत्यागः, शिरसो मस्तकस्य वापि कर्त्तनं छेदनं वरं श्रेयः इत्यर्थः। तथापि स्वामिपदावाप्तिपातकेच्छोः स्वामिनो राज्ञः पदं तस्य अवाप्तिरूपस्य पातकस्य महापापस्य इच्छोः अभिलाषुकस्य उपे-क्षणम् औदासीन्यं न श्रेयस्करमित्यर्थः॥ १७९॥

पिङ्गलकः सादरं ब्रूते, अथ भवान् किं वक्तुमिच्छति। दमनक आह, अयं तावत् सञ्जीवकस्तवोपरि असदृशव्यवहारी लक्ष्यते। तथा चास्मत्सन्निधाने स्वामिनः शक्तित्रयनिन्दां कृत्वा राज्यमेवाभिलषति। एतच्छ्रुत्वा पिङ्गलकः सभयं साश्चर्यं तूष्णीं स्थितः। दमनकः पुनराह, देव! सर्वामात्यपरित्यागं कृत्वा त्वयैवायं सकलकार्याधिकारे नियुक्तः। स महान् दोषः॥ १८० ॥

यतः,

> अत्युच्छ्रिते मन्त्रिणि पार्थिवे च
> विष्टभ्य पादावुपतिष्ठते श्रीः।
> सा स्त्रीस्वभावादसहा भरस्य
> तयोर्द्वयोरेकतरं जहाति॥ १८१ ॥

अपरञ्च, एकं भूमिपतिः करोति सचिवं राज्ये प्रधानं यदा
तं मोहाच्छ्रयते मदः स च मदालस्येन निर्विद्यते।

युध्यमानस्तदा प्राज्ञो म्रियेत रिपुणा सह ॥ २३ ॥

मत्स्या इति । जलाशयान्तरम् अन्यो जलाशयः । रक्षणहेतुः परित्राणो-
पायः अस्ति वर्त्तते, जलाशयान्तरं प्राप्तेषु युष्मासु रक्षा भवतीत्यर्थः । तत्र
जलाशयान्तरे । नयामि प्रापयामि । दुष्टवकः दुष्टः दुरभिसन्धिसम्पन्नः
वकः क्रौञ्चः । देशे स्थले । स्थापिताः रक्षिताः । अपूर्व्वकुलीरमांसार्थी एतावद्
दभुक्तपूर्व्वकर्कटमांसलोलुपः सन् । सादरम् सबहुमानम् । धृतवान् स्थाप-
यामास । मत्स्यकण्टकाकीर्णाम् मत्स्यानां कण्टकैः अस्थिभिः आकीर्णाम्,
परिव्याप्तां । व्यवहरामि करोमि ॥ २१ ॥

तावदिति । तावत् तत्कालपर्य्यन्तं भयात् सङ्कटात् भेतव्यं शङ्का कर्त्तव्या,
यावत् भयम् अनागतम् अनुपस्थितम् । भयम् आगतम् आपतितं तु दृष्ट्वा
वीक्ष्य अभीतवत् निःशङ्क इव प्रहर्त्तव्यम् प्रतिकर्त्तव्यम् ॥ २२ ॥

अभियुक्त इति । प्राज्ञः पण्डितः अभियुक्तः शत्रुणा आक्रान्तः सन्
यदा आत्मनः किञ्चित् हितम् मङ्गलं न पश्येत् चिन्तयेत् तदा रिपुणा
शत्रुणा सह युध्यमानः युद्धं कुर्व्वाणः म्रियेत प्राणान् त्यजेत् । प्राणनाशे
अवश्यम्भाविनि शौर्य्यमनवलम्ब्य स्वयं म्रियेत शत्रुमपि मारयेदित्यर्थः ॥ २३ ॥

त्यालोच्य स कुलीरस्तस्य बकस्य ग्रीवां चिच्छेद। स बकः पञ्चत्वं गतः। अतोऽहं ब्रवीमि भक्षयित्वा बहून् मत्स्यानित्यादि। ततः पुनरपि राजा स चित्रवर्णोऽब्रवीत्, शृणु भो महामन्त्रिन्। मयैतदालोचितं यदत्रावस्थितेनानेन मेघवर्णेन राज्ञा यावन्ति कर्पूरद्वीपस्योत्तमवस्तुनि तावन्त्यस्माकमुपनेतव्यानि। तेन महता विलासेनास्माभिर्विन्ध्याचले स्थातव्यम्। ३४। दूरदर्शी विहस्याह, देव

अनागतवतीं चिन्तां कृत्वा यस्तु प्रहृष्यति।
स तिरस्कारमाप्नोति भग्नभाण्डो द्विजो यथा ॥३५॥

राजाह, कथमेतत्। दूरदर्शी कथयति अस्ति देवकोट्टनगरे देवशर्म्मा नाम ब्राह्मणः। तेन विषुवसंक्रान्तौ सक्तुपूर्णशरावः प्राप्तः। ततस्तमादायासौ भाण्डपूर्णकुम्भकारमण्डपिकायां रौद्रेणाकुलितः सुप्तः। ततः सक्तुरक्षार्थं हस्ते दण्डमादायाचिन्तयत् यद्यहमिदं सक्तुशरावं विक्रीय दश कपर्द्दकान् प्राप्नोमि, तदा तैरिह समये कपर्द्दकैर्घटशरावादिकमुपक्रीय अनेकधा वृद्धैस्तैर्धनैः पुनः पुनः पूगवस्त्रादिकमुप-

इतीति। ग्रीवाम् कण्ठं चिच्छेद चकर्त्त। पञ्चत्वम् पञ्चीभावं, मरणमिति यावत्। गतः प्राप्तः। आलोचितम् मनसि कल्पितम्। राज्ञा भूपतिना मया। उत्तमवस्तूनि महार्घधनानि "वसु रत्ने धने वसुनम्" इत्यमरः। उपनेतव्यानि उपहर्त्तव्यानि। तेन धनकरणेन। विलासेन सुखभोगेन। स्थातव्य जीवितव्यम् ॥ ३४ ॥

अनागतेति। यस्तु जनः अनागतवतीम् भविष्यां चिन्ताम् कल्पना कृत्वा प्रहृष्यति हृष्यति च भग्नभाण्डः भग्नं त्रुटितं भाण्डं धनकलशः येन स तथाविधः द्विजः ब्राह्मण इव यथा तिरस्कारम् निन्दां प्राप्नोति अधिगच्छति ॥ ३५ ॥

राजेति। विषुवसंक्रान्तौ चैत्रसंक्रान्त्यां। सक्तुपूर्णशरावः धर्जितयवचूर्णपूरितमृत्पात्रं। प्राप्तः प्रतिग्रहेण लब्धः। आदाय गृहीत्वा। भाण्डपूर्ण-

क्रीय विक्रीय वाणिज्यं कृत्वा लक्षसङ्ख्यकधनान्युत्पाद्य विवाह
चतुष्टयं करोमि। ततस्तासु पत्नीषु या रूपयौवनवती तस्यामधि
कानुरागं करोमि। तदनन्तरं सञ्जातेर्ष्यास्ताः सपत्न्यः अन्यो
ऽन्यं यदा द्वन्द्वं करिष्यन्ति तदाऽहं कोपाकुलः सर्वाः सपत्नी
र्लगुडेन ताड़यिष्यामि। इत्यभिधाय तेन लगुड़ः प्रक्षिप्तः य
शरावचूर्णितो भाण्डानि च भग्नानि। ततो भग्नभाण्डश्रवण
दागत्य कुम्भकारेण गले हस्तं दत्त्वा मण्डपिकाद्बहिः कृत
अतोऽहं ब्रवीमि, अनागतवतीं चिन्तामित्यादि। त
राजा रहसि गृध्रं मन्त्रिणं पप्रच्छ, तात यथा कर्त्तव्यं तदु
दिश। २६। गृध्रो वदति

मदोद्धतस्य नृपतेः प्रकीर्णस्येव दन्तिनः।
यान्त्युन्मार्गतया तस्य नेतारः खलु वाच्यताम् ॥२७॥

शृणु तावद्देव, किमस्माभिर्बलदर्पात् दुर्गं भग्नं। नोत्र भ

कुम्भकारमण्डपिकायाम् भाण्डैः मृत्पात्रैः पूर्णायां पूरितायां कुम्भ
मण्डपिकायां विश्रामस्थले। रौद्रेण तपनतापेन व्याकुलितः जातक्लमः।
शेते स्म। उपक्रीय पुनः क्रीत्वा। अनेकशः एकैः बहुशः वृद्धिं गमि
पूगवस्त्रादिकम् पूगाः गुवाकाः वस्त्राणि वासांसि च आदौ यस्य तत्।
ज्यम् पण्यद्रव्यं। विवाहचतुष्टयम् दारचतुष्टयं। अधिकानुरागम् कन्या
करोमि बध्नामि। सञ्जातेर्ष्याः सपत्नीसौभाग्यम् दृष्ट्वा उपचितद्वेषाः। अन्
परस्परं। द्वन्द्वम् कलहं। कोपाकुलः अमर्षविधुरः। चूर्णितः खण्डशो
भाण्डानि कुम्भकारगृहे सम्भृतानि मृत्पात्राणि। भग्नभाण्डश्रवणात्
मानभाण्डानां शब्दं श्रुत्वा। रहसि निर्ज्जने ॥२६॥

मदेति। प्रकीर्णस्य मदोत्कटत्वात् अवशस्य दन्तिनः गजस्येव मदो
न्मत्तस्य राज्ञः नृपतेश्च नेतारः मन्त्रिणः। पक्षे हस्तिपकाः। त
नस्य नतु स्वानां। उन्मार्गतया उत्पथप्रतिपत्त्या खलु निश्चये
यान्ति प्राप्नुवन्ति ॥२७॥

शृण्विति। अस्माभिः कर्त्तृभिः। बलदर्पात् सामर्थ्यगौरवात् बलेन

प्रतापाधिष्ठितेनोपायेन। राजाह, भवतामुपायेन। गृध्रो
ब्रूते यद्यस्मद्वचनं क्रियते तदा स्वदेशे गम्यताम्। अन्यथासन्ने
वर्षाकाले तुल्यबलेन सह पुनर्विग्रहे सत्यस्माकं परभूमिष्ठानां
स्वदेशगमनमपि दुर्लभं भविष्यति। सुखशोभार्थं सन्धाय गम्य-
ताम्। दुर्गं भग्नं कीर्त्तिश्च लब्धैव। मम सम्मतं तावदेतत्। ३८।
यतः, यो हि धर्म्मं पुरस्कृत्य हित्वा भर्त्तुः प्रियाप्रियम्।
अप्रियाण्याह पथ्यानि तेन राजा सहायवान् ॥३९॥
अपरञ्च, सन्धिमिच्छेत् समेनापि सन्दिग्धो विजयो युधि।
न हि संशयितं कुर्य्यात् इत्युवाच बृहस्पतिः ॥४०॥

गृध्र इति। नो वा उत भवतः तव प्रतापाधिष्ठितेन पौरुषान्वितेन उपायेन
साधनेन। यद्यस्मद्वचनं क्रियते, यदि अस्मदुपदेशानुसारेण कार्य्यमुचितं भवति।
स्वदेशे अस्माकं निजे देशे कर्पूरद्वीपे। अन्यथा न गते। आसन्ने प्रत्यासन्ने।
तुल्यबलेन प्रतिद्वन्द्विना विपक्षे समरे प्रवृत्ते सति। परभूमिष्ठानां परस्य
शत्रोः भूमौ राष्ट्रमध्ये स्थानाम् वसतां। दुर्लभम् दुष्करं। सुखशोभा
र्थम् सुखं निरुद्वेगः शोभा गौरवं तयोरर्थं सन्धाय हिरण्यगर्भेण सह सन्धिं
कृत्वा गम्यतां, सन्धिं संस्थाप्य स्वदेशं गत्वा वीतोत्कण्ठः सन् सुखी भव
रिपुभूतं रिपुस्थापनं दत्वा निजचित्तौदार्य्यं च प्रदर्शयेति भावः। दुर्गं भग्नम्
नाशितं। कीर्त्तिः यशश्च लब्धा उपार्ज्जितं, अतोऽस्माकं अत्र प्रयोजनाऽभिष्ट
नास्तीति तात्पर्य्यार्थः ॥ ३८ ॥

य इति। यः नियुक्तानां यो जनः भर्त्तुः स्वामिनः प्रियाप्रियम् इष्टानिष्टं
हित्वा परित्यज्य, अनाहत्येति यावत्। धर्म्मम् कर्त्तव्यरूपं पुरस्कृत्य अग्रे कृत्वा,
धर्मस्येव मतिं बद्ध्वेत्यर्थः। अप्रियाणि भर्त्तुरनभिमतान्यपि पथ्यानि हितानि
आह उपदिशति राजा प्रभुः तेन तथाविधेन नियुक्तेन सहायवान् सहयोगि-
सम्पन्नः। अन्यथा सम्सहायोऽपि च सर्व्वथा निःसहाय एवेत्यर्थः ॥ ३९ ॥

सन्धिमिति। समेन तुल्यबलेनापि रिपुणेति शेषः। बल अदनस्यास्ता-
दवपीति भावः। सन्धिं इच्छेत् सन्धातुं यतेत। अत हेतुं निर्दिशति;
युधि युद्धे विजयः जयलाभः सन्दिग्धः अनिश्चितः। संशयितम् अनिश्चितं न
कुर्य्यात् नाचरेत् इत्यनिति नीतिशास्त्रवेत्ता अभिप्रायः। इति इत्थं आह
उपदिष्टवान् ॥ ४० ॥

अन्यञ्च, सुहृद्बलं तथा राज्यमात्मानं कीर्त्तिमेव च ।
युधि सन्देहदोलस्थं को हि कुर्य्यादबालिशः ॥ ४१ ॥
परन्तु, युद्धे विनाशो भवति कदाचिदुभयोरपि ।
सुन्दोपसुन्दावन्योऽन्यं समवीर्य्यौ हतौ न किम् ॥ ४२ ॥

राजोवाच, कथमेतत् । मन्त्री कथयति, पुरा दैत्यौ [illegible] महोदरौ सुन्दोपसुन्दनामानौ महता कायक्लेशेन त्रैलोक्य-राज्यकामनया चिराच्चन्द्रशेखरमाराधितवन्तौ । ततस्तयो- [illegible] भगवान् परितुष्टः सन् वरं वरयतम् इत्युवाच । अनन्तरं तयोः [illegible] समधिष्ठितया सरस्वत्या तावन्यद्वक्तुकामावन्यदभिहितौ । यद्य- [illegible] यो भगवान् परितुष्टस्तदा स्वप्रियां पार्व्वतीं परमेश्वरो [illegible] ददातु । अथ भगवता क्रुद्धेन वरदानस्यावश्यकतया मूढतया [illegible] पार्व्वती प्रदत्ता । ततस्तस्या रूपलावण्यलुब्धाभ्यां जगद्घाति [illegible]

सुहृदिति । सुहृत् मित्रं । बलम् सैन्यं "बलं चक्रिबलं सैन्यम्" इत्य[illegible] ... राज्यम् राष्ट्रं । आत्मानम् निजशरीरम् । कीर्त्तिम् यशः । [illegible]

[illegible]

युद्ध इति । कदाचित् युद्धे रणे उभयोः युध्यमानयोर्द्वयोरपि [illegible]

[illegible]

[illegible]

[illegible]सोत्सुकाभ्यां पापतिमिराभ्यां समेत्यान्योऽन्यकलहाभ्यां प्रमा-
[illegible]रुषः कश्चित् पृच्छ्यतामिति मतौ कृतायां स एव भट्टारको
द्विजरूपी समागत्य तत्रोपस्थितः । अनन्तम् आवाभ्यामियं
[illegible]लब्धा कस्येयमावयोर्भवति, ब्राह्मणमपृच्छताम् । ४३ ।
[illegible]ह्मणो ब्रूते

ज्ञानश्रेष्ठो द्विजः पूज्यः क्षत्रियो बलवानपि ।
धनधान्याधिको वैश्यः शूद्रस्तु द्विजसेवया ॥ ४४ ॥

[illegible]यां क्षत्रियधर्म्माणौ युद्ध एव युवयोर्नियमः । इत्यभिहिते
[illegible] साधूक्तमनेनेति कृत्वा अन्योऽन्यतुल्यवीर्य्यौ समकालेऽन्योन्य-
[illegible]तेन विनाशमुपगतौ । अतोऽहं ब्रवीमि सन्धिमिच्छेत् समे-
[illegible]नेत्यादि । राजाह तत् किं प्रागेव नेदमुपदिष्टम् । मन्त्री
[illegible]ति तदा किं मम वचनमवसानपर्य्यन्तं श्रुतं भवद्भिः । तदापि

[illegible] । जगद्दारिभ्याम् [illegible] । [illegible] । पापतिमिराभ्याम् पाप एव तिमिर [illegible] [illegible] [illegible] ॥ ४३ ॥

ज्ञानेति । द्विजः ब्राह्मणः [illegible] ॥ ४४ ॥

[illegible]

सप्त सम्मत्या नायं विग्रहारम्भः । यतः सन्धेयगुणयुक्तोऽयं हिरण्यगर्भो न विग्राह्यः ॥ ४५ ॥ तथाचोक्तम् ।

सत्यार्य्यौ धार्म्मिकोऽनार्य्यो भ्रातृसङ्घातवान् बली ।
अनेकयुद्धविजयी सन्धेयाः सप्त कीर्त्तिताः ॥ ४६ ॥
सत्योऽनुपालयन् सत्यं सन्धितो नैति विक्रियाम् ।
प्राणबाधेऽपि सुव्यक्तमार्य्यो नायात्यनार्य्यताम् ॥ ४७ ॥
धार्म्मिकस्याभियुक्तस्य सर्व्व एव हि युध्यते ।
प्रजानुरागाद्धर्म्माच्च दुःखच्छेद्यो हि धार्म्मिकः ॥ ४८ ॥

धानेन परस्परं निहत्य । प्रागेव युद्धप्रवृत्तेः पूर्व्वमेव । अवसानपर्य्यन्तं प्राप्नि । श्रुतम् तत्र किं कर्णो दत्तः । सन्धेयगुणयुक्तः सन्धिसंस्थाप- गुणयार्त्तो । न विग्राह्य विग्रहेण नाभियोक्तव्यः ॥ ४५ ॥

सत्येति । सत्यः सत्यनिष्ठः । आर्य्यः सज्जनः । धार्म्मिकः धर्म्मात्मा । अनार्य्यः दुर्ज्जनः । भ्रातृसंघातवान् भ्रातॄणां सोदराणां संघातः समूहः सोऽस्यास्तीति तथाविधः । बली प्रभूतबल- अनेकयुद्धविजयी बहुयुद्धेषु लब्धजयः । एते सप्त सन्धेयाः सन्धि- कीर्त्तिताः उक्ताः नीतिज्ञैरिति शेषः ॥ ४६ ॥

तत्रैतेषां हेतुन्निर्दिशति सत्य इत्यादिना । सत्यम् अनुपालयन् स्व- भावतः सत्यपालक इति यावत् । सत्यः सत्यनिरतो जनः । आर्य्यः स- त्यो सत्यार्य्यौ । सन्धिरस्य सञ्जातः सन्धितः । तारकादिभ्य इतच् इति प्रत्ययः । सन्धिना बद्ध इत्यर्थः । सन्धिमिति शेषः । विक्रियाम् सन्धिविरोध- आचरणम् । न एति नाधिगच्छति । प्राणबाधेऽपि जीवितनाशेऽपि सत्य इति शेषः । आर्य्यः सज्जनः सुव्यक्तम् स्फुटं अनार्य्यताम् अधार्मिकतां न या- न यातीति, आर्य्यं नाचरतीत्यर्थः ॥ ४७ ॥

धार्म्मिकेति । अभियुक्तस्य रिपुणा आक्रान्तस्य धार्म्मिकस्य पक्षे भूत्वा सर्व्वे, सकल एव जनो युध्यति यावत् । सर्व्वः निखिल एव जनः सहायो भवति । प्रजानां प्रकृतीनां अनुरागः प्रीतिः तस्मात् धर्म्मात् पुण्यात् धार्म्मिकः, अतएव दुःखच्छेद्यः दुःखेन छेद्यः ॥ ४८ ॥

सन्धिः कार्य्योऽप्यनार्य्येण विनाशे समुपस्थिते ।
विना तस्याश्रयेणार्य्यः कुर्य्यान्न कालयापनम् ॥ ४८ ॥
संहतत्वाद्यथा वेणुर्निविडः कण्टकैर्वृतः ।
न शक्यते समुच्छेत्तुं भ्रातृसङ्घातवांस्तथा ॥ ५० ॥
बलिना सह योद्धव्यमिति नास्ति निदर्शनम् ।
प्रतिवातं न हि घनः कदाचिदुपसर्पति ॥ ५१ ॥
जमदग्नेः सुतस्येव सर्व्वः सर्व्वत्र सर्व्वदा ।
अनेकयुद्धजयिनः प्रतापादेव भुज्यते ॥ ५२ ॥
अनेकयुद्धविजयी सन्धानं यस्य गच्छति ।

सन्धिरिति । विनाशे सर्व्वनाशे समुपस्थिते आपतिते सति अनार्य्येण नेनापि सह सन्धिः कार्य्यः विधेयः । तत्र हेतुः, तस्य अनार्य्यस्य आश्रयस्वरूपेण विना, तस्यानुकूल्यमप्राप्येति यावत् । अन्यः आर्य्यः यापनम् कालातिपातं न कुर्य्यात् चिरं न जीवेत् ॥ ४८ ॥

संहतेति । यथा वेणुः वंश संहतत्वात् परस्पर सन्निबद्धत्वात् निविडः [illegible]वृतः तथा कण्टकैः वृतः बहुकण्टकाकीर्णश्च सन् समुच्छेत्तुं कर्त्तितुं न [illegible]ते । भ्रातृसंघातवान् भ्रातृषु अन्योन्यं बोधान्वितः तथैकभावः समुच्छेत्तुं [illegible]क्यत इति भावः ॥ ५० ॥

बलिनेति । बलिना बलवत्तरेण सह योद्धव्यम् युद्धं कर्त्तव्यं इति [illegible]र्शनम् दृष्टान्तः नास्ति । तथाहि घनः मेघः कदाचित् प्रतिवातम् वातोरभि[illegible]न उपसर्पति न चलति ॥ ५१ ॥

जमदग्नेरिति । जमदग्नेः सुतस्य त्रिसप्तवारं कृतनिःक्षत्रियवसुधस्य भग[illegible] परशुरामस्येव अनेकयुद्धजयिनः बहुयुद्धेषु प्राप्तविजयस्य प्रतापात् [illegible] सर्व्वः सम्पद्भागादि सर्व्वत्र सर्व्वस्मिन् देशे सर्व्वदा सर्व्वस्मिन् काले च [illegible]ते भोक्तव्यविषयादि सम्पद्यते ॥ ५२ ॥

अनेकेति । अनेकयुद्धविजयी बहुयुद्धजेता यस्य सन्धानं सन्धिं गच्छति [illegible] सह मैत्री विहितो भवति । तस्य [illegible] [illegible] [illegible] [illegible] तस्य अनेकयुद्धविजयिनः प्रतापेन [illegible] [illegible] [illegible] [illegible] [illegible] दानि [illegible] ॥ ५३ ॥

तत्प्रतापेन तस्याशु वशमायान्ति शत्रवः ॥ ५३ ॥

तदत्र बहुभिर्गुणैरुपेतः सन्धेयोऽयं राजहंसः । चक्रवा
कोऽवदत् प्रणिधे सर्व्वमवगतम् । व्रज पुनरागमिष्यसि । अ
हिरण्यगर्भश्चक्रवाकं पृष्टवान्, मन्त्रिन् असन्धेयाः कति । तान्
विज्ञातुमिच्छामि । ५४ । मन्त्री ब्रूते देव कथयामि शृणु

बालो वृद्धो दीर्घरोगी तथा ज्ञातिबहिष्कृतः ।
भीरुको भीरुकजनो लुब्धो लुब्धजनस्तथा ॥ ५५ ॥
विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिमान् ।
अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः ॥ ५६ ॥
दैवोपहतकश्चैव दैवचिन्तक एव च ।
दुर्भिक्षव्यसनोपेतो बलव्यसनसङ्कुलः ॥ ५७ ॥

तदिति । तत् अतः बहुभिः अथैवैः गुणैः सन्धेयैः गुणैः उपेतः
न्वितः । अवगतम् विदितं । व्रज साम्प्रतं गच्छ । असन्धेयाः सन्धेयोग्य
कति कियत्संख्यकाः ॥ ५४ ॥

असन्धेयान् समुद्दिशति बाल इत्यादिना चतुर्भिः । बालः शि
वृद्धः स्थविरः । दीर्घरोगी चिरमातुरः । ज्ञातिबहिष्कृतः ज्ञातिभिः
बहिष्कृतः परित्यक्तः । भीरुकः स्वयं भीरुस्वभावः । भीरुकजनः भी
भीतः जनः साधनजनो यस्य स तथाविधः । लुब्धः धनतृष्णः । लुब्ध
लुब्धः धनेषु लोलुपः जनः साधनजनो यस्य स तथाविधः । विरक्तप्र
विरक्ता अभक्ता प्रकृति प्रजा यस्य स तथाभूतः । विषयेषु स्रक्चन्दनादि
वस्तुषु अत्यासक्तिमान् अतिनिरतः । अनेकचित्तमन्त्रः अनेकचित्तेषु ब
मनःसु मन्त्रः मन्त्रणा यस्य स तथाविधः, बहुजनश्रावितमन्त्रश्च इत्यर्थः
ब्राह्मणनिन्दकः देवानां ब्राह्मणानाञ्च निन्दकः कुत्साकारी । दैवोपहत
दैवदुर्विपाकः । तत आगत इत्यर्थः । तेन उपहतः विप्रितः । दै
दैवचिन्तकः दैवं भाग्यं चिन्तयति परामृशति तदपेक्षयैव प्रतीक्षते
यः स तथाविधः । दुर्भिक्षव्यसनोपेतः दुर्भिक्षं भक्ष्याभावः तदेव व्यसनं
उपेतः समन्वितः । बलव्यसनसंकुलः बलानां सैन्यानां व्यसनं भयः ते
विद्रोहतः । अदेशस्थः भिन्नराष्ट्रगतावासः । बहुरिपुः बहवः अ

अदेशस्थो बहुरिपुर्युक्तः कालेन यश्च न ।
सत्यधर्मव्यपेतश्च विंशतिः पुरुषा अमी ॥ ५८ ॥
एतैः सन्धिं न कुर्व्वीत विगृह्णीयात् तु केवलम् ।
एते विगृह्यमाणा हि क्षिप्रं यान्ति रिपोर्वशम् ॥ ५९ ॥
बालस्याल्पप्रभावत्वान्न लोको योद्धुमिच्छति ।
युद्धायुद्धफलं यस्मात् ज्ञातुं शक्तो न बालिशः ॥ ६० ॥
उत्साहशक्तिहीनत्वाद् वृद्धो दीर्घामयस्तथा ।
स्वैरेव परिभूयेते द्वावप्येतावसंशयम् ॥ ६१ ॥
सुखोच्छेद्यश्च भवति सर्व्वज्ञातिबहिष्कृतः ।

यश्च न तथाविधः । कालः युद्धोचितः समयः शरदादिः तेन तदनुसारेण युक्तः युद्धे न प्रवृत्तः । कर्त्तरि क्तः । सत्यधर्मव्यपेतः सत्यः सत्यरूपो धर्म्मः तद्व्यपेतः परित्यक्तः । अमी इमे विंशतिः द्विदशसंख्यकाः पुरुषाः अस-न्धेया इति पूर्व्वं राजकृतमन्त्रेणान्वयः ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥

एतैरिति । एतैः कथितैः पुरुषैः सह सन्धिम् मैत्रीं न कुर्व्वीत न साधयेत् । तु किन्तु केवलम् विगृह्णीयात् युध्येत् । हि यतः एते विगृह्य-माणाः युध्यमानाः सन्तः क्षिप्रम् आशु रिपोः विद्विषः वशम् आयत्ततां यान्ति ॥ ५९ ॥

तेष्वेकैकशः हेतुं निर्दिशति बालेति । बालस्य शिशोः अल्पप्रभावत्वात् कोषदण्डजस्वल्पत्वात् "स प्रभावः प्रतापश्च यत् तेजः कोषदण्डजम्" इत्यमरः । लोकः जनः योद्धुम् तमभियोक्तुं न इच्छति न चेष्टते । यस्मात् यतः बालिशः शिशुत्वात् अपरिपक्वबुद्धिः युद्धायुद्धफलम् युद्धस्य करणे अकरणे वा यत् फलम् परिणामः तं ज्ञातुं बोद्धुं न शक्तः समर्थो न भवति ॥ ६० ॥

उत्साहेति । उत्साहशक्तिः उद्योगजातरूपा राज्ञां शक्तिः । तथाह्यमरः "शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः" इति । तया हीनत्वात् अभावतः निर्वाहितत्वात् । वृद्धः स्थविरः । तथा दीर्घामयः चिररोगी च एतौ द्वौ उभा-वपि स्वैः निजैः परिवारैरेव असंशयम् निश्चितं परिभूयेते तिरस्क्रियेते ॥ ६१ ॥

सुखोच्छेद्य इति । सर्व्वज्ञातिबहिष्कृतः सर्व्वैः ज्ञातिभिः सगोत्रैः बहिष्कृतः परित्यक्तः सुखोच्छेद्यः सुखेन अनायासेन उच्छेद्यः विनाश्यः भवति । ज्ञात-

त एवेनं विनिघ्नन्ति घातयन्त्यात्मसात्कृताः ॥ ६२ ॥

भीरुर्युद्धपरित्यागात् स्वयमेव प्रणश्यति ।
तथैव भीरुकजनः संग्रामे तैर्विमुच्यते ॥ ६३ ॥

लुब्धस्यासम्विभागित्वान्न युध्यन्तेऽनुजीविनः ।
लुब्धानुजीविकैरेष दानहीनैर्निहन्यते ॥ ६४ ॥

सन्त्यज्यते प्रकृतिभिर्विरक्तप्रकृतिर्युधि ।
सुखाभियोज्यो भवति विषयेष्वतिसक्तिमान् ॥ ६५ ॥

अनेकचित्तमन्त्रस्तु द्वेष्यो भवति मन्त्रिणाम् ।
अनवस्थितचित्तत्वात् कार्य्ये तैः स उपेक्ष्यते ॥ ६६ ॥

सात्कृताः यतोः स्वपक्षमानीताः ते शत्रव एव एनम् वञ्चयित्वा तं वि[illegible] नाशयन्ति ॥ ६२ ॥

भीरुरिति । भीरुः भयशीलः । युद्धपरित्यागात्, रणभूमेः पलायिते[illegible]त्यर्थः । स्वयम् स्वतः एव प्रणश्यति ध्वंसो भवति । तथैव एवं भीरुजनः भीरुजनसहायः संग्रामे रणस्थले तैः सहायजनैः कर्त्तृभिः विमुच्यते त्यज्यते ॥ ६३ ॥

लुब्धस्येति । असंविभागित्वात् विभज्य अदातृतया । अनुजीविनः नियुक्ताः लुब्धस्य धनतृष्णस्य सम्बन्धे, तत्पक्षो भूत्वेति यावत् । न युध्यन्ते रणं न कुर्वन्ति । दानहीनैः दानं पुरस्कारः तेन हीनैः वर्जितैः लुब्धानुजीविकैः लुब्धैः धन[illegible] लोलुपैः अनुजीविकैः नियुक्तैः एषः लुब्धः निहन्यते निपात्यते ॥ ६४ ॥

सन्त्यज्यत इति । विरक्तप्रकृतिः विरक्ता अभक्ता प्रकृतिः प्रजा यस्य स तथाभूतः । युधि समरे प्रकृतिभिः प्रजाभिः सन्त्यज्यते विमुच्यते । विषये[illegible] भोग्यवस्तुषु अतिसक्तिमान् अत्यासक्तः सुखाभियोज्यः सुखं अनायासं अभियोज्य योद्धव्यः भवति ॥ ६५ ॥

अनेकेति । अनेकचित्तमन्त्रः अनेकानां चित्तेषु स्थापितमन्त्रणः मन्त्रिणाम् अमात्यानां द्वेष्यः द्वेषविषयः भवति सञ्जायते । अनवस्थितचित्तत्वात् कर्त्तव्येषु अस्थिरं चित्तं मनो यस्य स तथाविधः तस्य भावस्तत्त्वं तस्मात् कर्म्माणि तैः मन्त्रिभिः एषः अनेकचित्तमन्त्रः उपेक्ष्यते अनादरेण [illegible] ॥ ६६ ॥

सदा धर्मबलीयस्त्वाद्देवब्राह्मणनिन्दकः ।
विशीर्य्यते स्वयं ह्येष दैवोपहतकस्तथा ॥ ६७ ॥
सम्पत्तेश्च विपत्तेश्च दैवमेव हि कारणम् ।
इति दैवपरो ध्यायन् नात्मानमपि चेष्टयेत् ॥ ६८ ॥
दुर्भिक्षव्यसनी चैव स्वयमेवावसीदति ।
बलव्यसनयुक्तस्य योद्धुं शक्तिर्न जायते ॥ ६९ ॥
अदेशस्थो हि रिपुणा स्वल्पकेनापि हन्यते ।
ग्राहोऽल्पीयानपि जले गजेन्द्रमपि कर्षति ॥ ७० ॥
बहुशत्रुस्तु सन्त्रस्तः श्येनमध्ये कपोतवत् ।
येनैव गच्छति पथा तेनैवासौ विपद्यते ॥ ७१ ॥

सदेति । सदा सर्व्वदैव धर्म्मबलीयस्त्वात् धर्म्मस्य पुण्यानुष्ठानस्य बलीयस्त्वात् प्रभविष्णुत्वात् देवब्राह्मणनिन्दकः धर्म्माश्रयीभूतानां देवानां ब्राह्मणानाञ्च निन्दकः कुत्साकारी । दैवोपहतकः दैवेन दैवदुर्व्विपाकेन हतकः विघ्नितः स्वयं निजदोषेणैव विशीर्य्यते नष्टो भवति ॥ ६७ ॥

सम्पत्तेरिति । दैवपरः केवलं भाग्यापेक्षी जनः । सम्पत्तेः अभ्युदयस्य विपत्तेः विपदश्च दैवम् भाग्यमेव कारणम् हेतुः इति ध्यायन् चिन्तयन् आत्मानमपि न चेष्टयेत्, स्वयं कार्य्यसिद्धौ न यतेत ॥ ६८ ॥

दुर्भिक्षेति । दुर्भिक्षव्यसनी दुर्भिक्षम् अन्नाभावः तदेव व्यसनं दुःखं यस्य तथाभूतः स्वयमेव निजात्मनैव अवसीदति पराभूयते । बलव्यसनयुक्तस्य सैन्यविपर्य्यासादिदुःखसंयुक्तस्य योद्धुम् शक्तिः बलम् "बलम् शक्तिर्बलं सैन्यम्" इत्यमरः । न जायते न संभवते ॥ ६९ ॥

अदेशस्थ इति । अदेशस्थः परराज्यगतावासः स्वल्पकेन क्षुद्रेणापि रिपुणा हन्यते विनाश्यते । तथाहि जलीयात् क्षीणबलोऽपि ग्राहः नक्रः जले गजेन्द्रम् महद्विपं करिराजमपि कर्षति आकृष्य नयति ॥ ७० ॥

बह्विति । बहुशत्रुः बहवः शत्रवो यस्य स तथाविधः । श्येनमध्ये [illegible] पक्षिविशेषाणां मध्ये सन्त्रस्तः कपोतः पारावत इव [illegible] पथा मार्गेण गच्छति [illegible] असौ बहुशत्रुः तेनैव विपद्यते [illegible] ॥ ७१ ॥

अकालसैन्ययुक्तस्तु हन्यते कालयोधिना।
कौशिकेन हतज्योतिर्निशीथ इव वायसः॥ ७२॥
सत्यधर्म्मव्यपेतेन न सन्दध्यात् कदाचन।
ससंहितोऽप्यसाधुत्वादचिराद्याति विक्रियाम्॥७३॥

अपरमपि कथयामि। सन्धिविग्रहासनयानसंश्रयद्वैधीभावाः षाड्गुण्यम्। कर्म्मणामारम्भोपायः पुरुषद्रव्यसम्पत् देशकालविभागो विनिपातप्रतीकारः कार्य्यसिद्धिः पञ्चाङ्गो मन्त्रः। सामदानभेददण्डाश्चत्वार उपायाः। उत्साहशक्तिर्मन्त्रशक्तिः प्रभुशक्तिरिति शक्तित्रयम्। एतत्सर्वमालोच्य नित्यं विजिगीषवो भवन्ति महान्तः॥ ७४॥ यतः,

अकालेति। अकालसैन्ययुक्तः अकाले युद्धानुचितकाले वर्षादौ सैन्येन युक्तः सहायवान्, अकालचालितसैन्य इत्यर्थः। कालयोधिना काले शरदादौ युध्यति यः स तथाविधः तेन। निशीथे अर्द्धरात्रे "अर्द्धरात्रनिशीथौ द्वौ" इत्यमरः। गभीरायां रात्राविति यावत्। हतज्योतिः हतं नष्टं ज्योतिः दृष्टिः यस्य स तथाविधः वायसः काकः कौशिकेन पेचकेनेव हन्यते वध्यते॥ ७२॥

सत्येति। सत्यधर्म्मव्यपेतेन सत्यः सत्यरूपो धर्म्मः पुण्याचारः तेन व्यपेतः हीनः तेन कदाचन कदापि न सन्दध्यात् सन्धिं न कुर्यात्। सः सत्यधर्म्मव्यपेतः सन्धितः सन्धिना बद्धोऽपि असाधुत्वात् पापशीलत्वात् अचिरात् शीघ्रमेव विक्रियाम् याति विपरीतमाचरति॥ ७३॥

अपरमिति। षाड्गुण्यम् नृपाणां षट् गुणाः। तत्र सन्धिः मैत्री विग्रहः समरः। आसनम् परस्परं कालप्रतीक्षया अवस्थानम्। यानम् युद्धयात्रा। संश्रयः प्रबलस्य आश्रयग्रहणम्। द्वैधीभावः सौविदकवत्सतालीकार्य्यं द्वयम्। मन्त्रः मन्त्रणा। पञ्चाङ्गः कर्म्मणामारम्भोपायादिरूपैः पञ्चभिरङ्गैः समन्वितः। तत्र आरम्भोपायः आरब्धस्य कार्य्यप्रवृत्तेः उपायः सम्यक् साधनम्। पुरुषाणां सहायजनानां द्रव्याणां धनधान्यादिकानाञ्च सम्पत्। देशकालविभागः यथायथं देशकालानुसारेण प्रवृत्तिः। विनिपातस्य अधःपतनस्य प्रतीकारः प्रतिविधानम्। उपायाः साम

या हि प्राणपरित्यागमूल्येनापि न लभ्यते ।
सा श्रीर्नीतिविदां वेश्म चञ्चलापि प्रधावति ॥ ७५ ॥
…चोक्तम्, वित्तं यदा यस्य समं विभक्तं
गूढश्च चारो निभृतश्च मन्त्रः ।
न चाप्रियं प्राणिषु यो ब्रवीति
स सागरान्तां पृथिवीं प्रशास्ति ॥ ७६ ॥

किन्तु देव यद्यपि महामन्त्रिणा गृध्रेण सन्धानमुपन्यस्तं …पि तेन राज्ञा सम्प्रति भूतजयदर्पान्न मन्तव्यम् । तदेवं …यताम्, अस्मन्मित्रं सिंहलद्वीपस्य महाबलो नाम सारसो …जा जम्बुद्वीपे कोपं जनयतु ॥ ७७ ॥ यतः,

…गुप्तिमाधाय सुसंहतेन बलेन वीरो विचरन्नरातिम् ।

…। तत्र साम सन्धिः । दानम् अर्थप्रयोगः । भेदः अन्तःकलहोत्पादनम् । …: बाहुबलम् । उत्साहशक्तिः कार्ये उद्योगरूपा । मन्त्रशक्तिः सुमन्त्रणा- …। प्रभुशक्तिः पौरुषरूपा । आलोच्य एतेषु मतिं बद्ध्वा ॥ ७४ ॥

…येति । या श्रीः लक्ष्मीः प्राणपरित्यागमूल्येनापि जीवितविसर्जनरूप- …दपि, अस्तु दत्त्वापीति यावत् । न लभ्यते, सा श्रीः चञ्चला प्रकृत्या …पि नीतिविदां नयकुशलानां वेश्म गृहं प्रधावति, सतृष्णा भूत्वा तत्र …ऽभ्यर्थः ॥ ७५ ॥

वित्तमिति । यदा यस्य वित्तम् धनं समं विभक्तम् अनुजीविषु यथायथं …दरूपेण विभज्य दत्तं । चारः चरवर्गः "अपसर्पश्चरः स्पशः" इत्यमरः । …: प्रच्छन्नचारी । मन्त्रः मन्त्रणा च निभृतः गुप्तः । यश्च प्राणिषु अप्रियम् …ं न ब्रवीति स राजा च सागरान्ताम् समुद्रपर्यन्तां पृथिवीम् धरित्रीम् …ास्ति, शासयतीत्यर्थः ॥ ७६ ॥

किन्त्विति । सन्धानम् सन्धिः उपन्यस्तम् प्रस्तावितः । भूतजयदर्पात् …नां प्राणिनां जयः विजयः तस्मात् दर्पः गर्वः तस्मात् हेतोः । मन्तव्यम् …यम् । जनयतु करोतु, जम्बुद्वीपस्थोऽपि क्रुद्धो भवत्वित्यर्थः ॥ ७७ ॥

सुगुप्तिमिति । वीरः शूरः सुगुप्तिम् सु अत्यन्तं गुप्तिम् गोपनं आधाय …त्वा सुसंहतेन सुसम्बद्धेन बलेन सैन्येन सह विचरन् परिभ्रमन् अरातिम्

ापयेद्येन समं सुतप्तस्तप्तेन सन्धानमुपैति तप्तः ॥ ७८ ॥

ाजाह एवमस्तु । इत्युक्त्वा विचित्रो नाम बकः सुगु-
दत्त्वा सिंहलद्वीपं प्रस्थापितः । अथ प्रणिधिः पुनरा-
उक्तवान्, देव श्रूयतां तावत् तत्रत्यप्रस्तावः । एवं तत्र
णोक्तम्, देव मेघवर्णस्तत्र चिरमुषितः । स वेत्ति वि
यगुणयुक्तो हिरण्यगर्भो राजा न वेति । ततोऽसौ मेघव
तवर्णेन राज्ञा समाहूय पृष्टः वायस कीदृशोऽसौ हिरण्यग
जा । चक्रवाको मन्त्री वा कीदृशः । मेघवर्णो ब्रूते देव
हरण्यगर्भो राजा युधिष्ठिरसमो महाशयः सत्यवाक् । च
ाकसदृशो मन्त्री न क्वाप्यवलोक्यते । राजाह यद्येवं तदा कथ-
मसौ त्वया वञ्चितः ॥ ७९ ॥ मेघवर्णो विहस्य ब्रूते देव

विश्वासप्रतिपन्नानां वञ्चने का विदग्धता ।
अङ्कमारुह्य सुप्तं हि हत्वा किं नाम पौरुषम् ॥ ८० ॥

रिपुं सन्तापयेत् पीडयेत् । येन सन्तापनेन । अरातिरिति ग्राह्यम् । समम् ...
तस्य सुतप्तः भवतीति शेषः । तथाकरणे हेतुः, तप्तः पीडितः तप्तेन पीडितेन
सन्धानम् मैत्रीं उपैति प्राप्नोति । तुल्यावस्थामापन्नस्तुल्येन सन्धितो भवती-
त्यर्थः ॥ ७८ ॥

राजाहेति । एवम् अस्तु भवतु, यथा महाबलः जम्बुद्वीपे कोपं जनयति तथा
क्रियतामित्यर्थः । सगुप्तलेखम् सगुप्तं सुनिभृतं लेखम् लिपिं । तत्रत्यः सिंह-
... किम् उत
वर्णसभामध्यगीयः । उषितः स्थितवान् । वेत्ति जानाति । ज्येष्ठपाण्डवेन स
पृष्टः जिज्ञासितः । युधिष्ठिरसमः युधिष्ठिरेण धर्मपुत्रेण तथाविधः । च
तुल्यः । महाशयः महान् उन्नतं आशयः सत्त्वं यस्य स
... अतमांसो । वञ्चितः प्रतारितः ॥ ७९ ॥

... । विश्वासं प्रत्ययं प्रतिपन्नानां प्राप्तानां वञ्चने प्रतारणे
विकत्थना । न कार्येत्यर्थः । तथाहि अङ्कम् उत्सङ्गं
उत्सङ्गे चिह्ने स्थानापराधयोः" इति विश्वः । आरुह्य अधि

…तु देव तेन सन्निधातुं प्रथमदर्शन एव विज्ञातः । किन्तु …ाशयोऽसौ राजा । तेन मया विप्रलब्धः ॥८१॥ तथा चोक्तम्

आत्मौपम्येन यो वेत्ति दुर्जनं सत्यवादिनम् ।
स एव वञ्चितस्तेन ब्राह्मणश्छागतो यथा ॥ ८२ ॥

राजाह, कथमेतत् मेघवर्णः कथयति, अस्ति गौतमारण्ये …स्तुतयज्ञः कश्चिद्ब्राह्मणो ग्रामान्तरं गत्वा छागमुपक्रीय स्कन्धे धृत्वा गच्छन् धूर्त्तत्रयेणावलोकितः । ततस्ते धूर्त्ता यद्येष छागः केनाप्युपायेन लभ्यते तदा मतिप्रकर्षो भवति इत्यालोच्य …वृक्षत्रयतले तस्य ब्राह्मणस्य वर्त्मन्युपविश्य स्थिताः । …केन धूर्त्तेन स ब्राह्मणोऽभिहितः । भो ब्राह्मण किमिति …कुक्कुरः स्कन्धेनोह्यते । विप्रेणोक्तम् नायं श्वा, यज्ञच्छागो-…म् । अनन्तरं पुनर्द्वितीयेन क्रोशमात्रावस्थितेन तदेवोक्तम् । …कर्ण्य ब्राह्मणश्छागं भूमौ निधाय मुहुर्निरीक्ष्य पुनः स्कन्धे …त्वा दोलायमानमतिश्चलितः ॥ ८३ ॥ यतः …

१. निद्रागतं जनमितिशेषः । … कृत्वा किं नाम पौरुषम् … प्रकारः । … गीतार्थः ॥ ८० ॥

सन्निधीति । विज्ञातः विपक्षद्वेषेण परिचितः । तेन महाशयत्वात् ॥८१॥
आत्मौपम्येनेति । आत्मौपम्येन आत्मनः स्वस्य औपम्येन निदर्शनया जनः दुर्जनम् अधम् सत्यवादिनम् सत्यभाषिणं वेत्ति जानाति, आत्मवत् …मन्यत इत्यर्थः । स एव निश्चये छागतः छागविषयात् । … …णः विप्रः यथा इव तेन दुर्जनेन वञ्चितः प्रतारितः भवतीति शेषः ॥८२॥
राजाहेति । प्रस्तुतयज्ञः प्रस्तुतः उपस्थापितः, आरब्ध इति यावत् । …ः अध्वरो येन स तथाविधः । धृत्वा स्थापयित्वा । मतिप्रकर्षः मतेः बुद्धेः प्रकर्षः उत्कृष्टप्रभावम् । ग्रामान्तरे ग्रामोपान्ते जाता वृक्षाः ते …वृक्षाः तेषां त्रयं तस्य तले मूलेषु । वर्त्मनि गमनमार्गे । उह्यते नीयते । … कुक्कुरः । यज्ञछागः यज्ञपशुभूतश्छागः अजा । क्रोशमात्रावस्थितेन क्रोशैक-…मात्रव्यवधाने उपविष्टेन । मुहुर्मुहुः वारम्वारं निरीक्ष्य परीक्ष्य । दोलाय-

मतिर्दोलायते नूनं सतामपि खलोक्तिभिः ।
ताभिर्विश्वासितो योऽसौ म्रियते चित्रकर्णवत् ॥ ८

राजा पृच्छति कथमेतत् । स कथयति, अस्ति कस्मि
नोद्देशे मदोत्कटो नाम सिंहः । तस्यानुचरास्
काको व्याघ्रः शृगालश्च । अथ तैर्भ्रमद्भिः सार्थाद्भ्रष्ट
दृष्टः पृष्टश्च कुतो भवानागतः । स चात्मवृत्तान्तमकथ
ततस्तैर्नीत्वासौ सिंहाय समर्पितः । तेन चाभयवाचं
चित्रकर्ण इति नाम कृत्वा स्थापितः । एवं काले गच्छति,
कदाचित् सिंहस्य शरीरवैकल्यात् भूरिवृष्टिकारणाच्चा
मलभमानास्ते व्यस्ता बभूवुः । ततः काकव्याघ्रगोमायुभि
चितम् चित्रकर्णमेव यथा स्वामी व्यापादयति तथानु
ताम् । किमनेन कण्टकभुजास्माकम् । व्याघ्रो ब्रूते, स्वा
भयवाचं दत्त्वा गृहीतोऽयम् । कथमेवं सम्भवति । क
वदति इह समये परिक्षीणः स्वामी पापमपि करिष्यति

आनमतिः दोलायमाना संशयेन अस्थिरा । मतिः बुद्धिः ...
चन्चिति शेषः ॥ ८२ ॥

मतिरिति । सताम् साधूनामपि मतिः बुद्धिः खलोक्तिभिः
धूर्त्तानां उक्तिभिः वचनैः हेतुभिः दोलायते संशयदोलामारुह्य ...
याभिः खलोक्तिभिः यः विश्वासितः प्रत्ययमापादितः स चित्रकर्णवत्

अपरं, त्यजेत् क्षुधार्त्ता महिलापि पुत्रं
खादेत् क्षुधार्त्ता भुजगी स्वमण्डम् ।
बुभुक्षितः किं न करोति पापं
क्षीणा नरा निष्करुणा भवन्ति ॥ ८६ ॥

अन्यच्च, मत्तः प्रमत्तश्चोन्मत्तः श्रान्तः क्रोधी बुभुक्षितः ।
लुब्धो भीरुस्त्वरायुक्तः कामुकश्च न धर्मवित् ॥ ८७ ॥

इति निश्चित्य सर्वे सिंहान्तिकं जग्मुः । सिंहेनोक्तम् आहारार्थं प्राप्तं किञ्चित् । काको ब्रूते देव यत्नादपि न प्राप्तं किञ्चित् । सिंहोऽवदत् कोऽधुना जीवनोपायः । काको वदति स्वाधीनाहारपरित्यागात् सर्वनाशोऽयमुपस्थितः । सिंहेनोक्तम् अत्राहारः कः स्वाधीनः । काकः कर्णे कथयति चित्रकर्ण इति । सिंहो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । मयास्मै अभयवाग् दत्ता । तत् कथमेवं सम्भवति ॥ ८८ ॥ तथाहि न भूप्रदानं न सुवर्णदानं न गोप्रदानं न तथान्नदानम् ।

त्यजेदिति । महिला स्त्रीजनः क्षुधार्त्ता क्षुधया बुभुक्षया आर्त्ता पीड़िता सती पुत्रम् अपत्यमपि त्यजेत् भक्षयेत् । क्षुधार्त्ता भुजगी सर्पी स्वम् निजम् अण्डम् डिम्बमपि खादेदिति पूर्व्वेणान्वयः । बुभुक्षितः क्षुधितः किं पापम् दुष्कर्म न करोति, अपितु सर्व्वमेवेत्यर्थः । क्षीणाः भग्नबलाः नराः जनाः निष्करुणाः निष्कृपाः भवन्ति जायन्ते ॥ ८६ ॥

मत्त इति । मत्तः मद्यादिना विधुरः । प्रमत्तः अनवधानः । उन्मत्तः वातग्रस्तः । आर्त्तः व्याधिपीड़ितः । क्रोधी अमर्षणः । लुब्धः लोभवान् । भीरुः भयशीलः । त्वरायुक्तः हठकारी । कामुकः लम्पटश्च धर्म्मवित् धर्म्मज्ञातारः न भवन्तीति शेषः ॥ ८७ ॥

इतीति । निश्चित्य स्थिरीकृत्य । सिंहान्तिकम् सिंहस्य अन्तिकम् समीपम् । यत्नादपि आयासं कृत्वापि । स्वाधीनाहारपरित्यागात् स्वानां अस्माकं निजानां अधीनस्य आयत्तस्य आहारस्य भक्ष्यस्य परित्यागात् सर्व्वनाशः । चित्रकर्ण इति, चित्रकर्णोऽस्माकं स्वाधीनाहार इत्यर्थः । स्पृशति स्पृशते ॥ ८८ ॥

मतिर्दोलायते नूनं सतामपि खलोक्तिभिः । तैर्विश्वासितो यो मौ म्रियते चित्रकर्णवत् ॥ ८३ ॥

राजा पृच्छति कथमेतत् । स कथयति, अस्ति कस्मिंश्चिद्

वनोद्देशे मदोत्कटो नाम सिंहः । तस्यानुचरास्त्र

काको व्याघ्रः शृगालश्च । अथ तैर्भ्रमद्भिः सार्थाद्भ्रष्ट

उष्ट्रो दृष्टः । स चागत्य पृष्टः कुतो भवानागतः । तेन चात्मवृत्तान्तः कथितः ।

ततस्तैः सिंहाय समर्पितः । तेन चाभयवाचं दत्त्वा चित्रकर्ण इति नाम कृत्वा स्थापितः । एवं काले गच्छति, ...

... सिंहस्य शरीरवैकल्यात् भूरिवृष्टिकारणाच्चाहारमलभमानास्ते व्यग्रा बभूवुः । ततः काकव्याघ्रशृगालैरुक्तम् ...

... यथा स्वामी व्यापादयति तथानुष्ठीयताम् ... चित्रकर्णमेव ... किमनेन कण्टकभुजा ... व्याघ्रो ब्रूते, स्वामिना ...

... अभयवाचं दत्त्वा स्थापितोऽयम् । कथमेवं सम्भवति । ... ईदृश समये परिक्षीणः स्वामी पापमपि करिष्यति । ८४ ॥

मतिः बुद्धिः ... संशयेन अस्थिरा भवति ...

आत्ममतिः दोलायमाना संशयेन अस्थिरा । मतिः बुद्धिः ...

अस्थिरेति शेषः ॥ ८३ ॥

मतिरिति । सताम् साधूनामपि मतिः बुद्धिः खलोक्तिभिः खलानां भवति ...

धूर्तानां उक्तिभिः वचनैः हेतुभिः दोलायते संशयदोलामारूढा भवति ... चित्रकर्णवत् ...

तामिः खलोक्तिभिः यः विश्वासितः प्रत्ययमापादितः स चित्रकर्णवत् ...

इव म्रियते नाशमाप्नोति ॥ ८३ ॥

राजेति । वनोद्देशे वनप्रदेशे । अनुचराः अनुजीविनः । सार्थ...

सार्थात् यूथात् भ्रष्टः परिच्युतः । अकथयत् निवेदितवान् । स्थापितः ...

रक्षितः । शरीरवैकल्यात् अस्वस्थतया अशक्तदेहत्वात् । भूरिवृष्टिकार...

बहुवर्षणनिबन्धात् । ते सिंहादयः सर्वे व्यग्राः व्याकुलाः । यथा यत् ...

कण्टकभुजा कण्टकावलतृणभोजिना, अस्मद्विजातीयेनेति यावत् । ...

क उपकारो भविष्यतीत्यर्थः । स्थापितः सकाशे स्थापितः ...

सामर्थ्यहीनः ॥ ८५ ॥

अपि च,

> त्यजेत् क्षुधार्त्ता महिलापि पुत्रं
> खादेत् क्षुधार्त्ता भुजगी स्वमण्डम् ।
> बुभुक्षितः किं न करोति पापं
> क्षीणा नरा निष्करुणा भवन्ति ॥ ८६ ॥

अन्यच्च,

> मत्तः प्रमत्तश्चोन्मत्त आर्त्तः क्रोधी बुभुक्षितः ।
> लुब्धो भीरुस्त्वरायुक्तः कामुकश्च न धर्मवित् ॥ ८७ ॥

इति निश्चित्य सर्व्वे सिंहान्तिकं जग्मुः । सिंहेनोक्तम् आहारार्थं प्राप्तं किञ्चित् । काको ब्रूते देव यत्नादपि न प्राप्तं किञ्चित् । सिंहोऽवदत् कोऽधुना जीवनोपायः । काको वदति स्वाधीनाहारपरित्यागात् सर्व्वनाशोऽयमुपस्थितः । सिंहेनोक्तम् अत्राहारः कः स्वाधीनः । काकः कर्णे कथयति चित्रकर्ण इति । सिंहो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । मयास्याभयवाग् दत्ता । तत् कथमेवं सम्भवति ॥ ८८ ॥ तथाहि

न भूप्रदानं न सुवर्णदानं न गोप्रदानं न तथान्नदानम् ।

त्यजेदिति । महिला स्त्रीजनः क्षुधार्त्ता क्षुधया बुभुक्षया आर्त्ता पीडिता सती पुत्रम् अपत्यमपि खादेत् भक्षयेत् । क्षुधार्त्ता भुजगी सर्पी स्वम् निजम् अण्डम् डिम्बमपि खादेदिति पूर्व्वेणान्वयः । बुभुक्षितः क्षुधितः किं पापम् निन्द्यं न करोति, अपि तु सर्व्वमेवेत्यर्थः । क्षीणाः नष्टाः नराः जनाः निष्करुणाः निष्कृपाः भवन्ति जायन्ते ॥ ८६ ॥

मत्त इति । मत्तः मद्यादिना विधुरः । प्रमत्तः अनवधानः । उन्मत्तः वातग्रस्तः । आर्त्तः व्याधिपीडितः । क्रोधी क्रुद्धः । लुब्धः [illegible] । भीरुः भयशीलः । त्वरायुक्तः क्षिप्रकारी । कामुकः [illegible] धर्मविद् न भवतीति शेषः ॥ ८७ ॥

इतीति । निश्चित्य स्थिरीकृत्य । सिंहान्तिकम् सिंहस्य [illegible] । यत्नादपि आयासं कृत्वापि । स्वाधीनाहारपरित्यागात् [illegible] स्वाधीनस्य आयत्तस्य आहारस्य भक्ष्यस्य परित्यागात् [illegible] चित्रकर्णं प्राप्य स्वाधीनाहार इत्यर्थः ।

नेति । इह संसारे सर्व्वप्रदानेषु निखिलदानकार्य्येषु मध्ये ... प्राहुः ... मन्वादयः इति

भीतिवाग्दानं यथा महाप्रदानम् श्रेष्ठदानं वदन्ति प्राहुः ... गोप्रदानम् गवा-

दः । भूप्रदानम् भूमिदानं । सुवर्णदानम् काञ्चनप्रदानं । गोप्रदानम् गवा-

त्सर्गः । तथा अन्नदानम् अन्नप्रदानञ्च तथा महाप्रदानम् न वदन्तीति पूर्व्व-

याम्बयः ॥ ८६ ॥

सर्व्वेति । सर्व्वकामसमृद्धस्य सर्व्वैः निखिलैः कामैः अभीष्टैः समृद्धस्य ध-

म्पन्नस्य, निखिलाभिलषितप्रदस्येति यावत् । अश्वमेधस्य वाजिमेधस्य यत्

यत् फलम् विद्भिः शरणागते शरणम् रक्षणम्, आश्रयमिति यावत् । "शर

रक्षणं स्मृते" इति यादवः । आगते प्राप्ते जने रक्षिते त्राते सति तत् फल

सम्यक् साकल्येन लभते, शरणागतरक्षक इति शेषः ॥ ९० ॥

काक इति । स्वामिना भवता । स्वयम् अङ्गीकरोति स्वयं स्वीकरोमि

...ात्रकामः लब्धः सिंहस्य तूष्णीम्भावेन तस्यायं बुद्धा प्राप्तः अवकाशः

ो येन स तथाभूतः । मूढम् मूर्खं । सर्व्वान् उष्ट्रमृगादव्याघ्रान् ।

उपवासक्लिष्टः अनेकैः बहुभिः उपवासैः अनाहारैः क्लिष्टः कर्षितः ॥९

स्वामीति । यतः पृथिवीशाः सर्व्वाः प्रजाः खलु निश्चये स्वा

स्वामी राजा मूलम् प्रधानान्वयः यासां तास्तथाभूता भवन्ति

सिंहेनोक्तम् भद्र वरं प्राणपरित्यागो न पुनरीदृशे कर्म्मणि
त्तिः। जम्बुकेनापि तथोक्तम्। ततः सिंहेनोक्तं मैवम्। व्याघ्र
मद्देहेन जीवतु स्वामी। सिंहेनोक्तम् न कदाचिदेवमु-
म्। अथ चित्रकर्णोऽपि जातप्रत्ययः तथैवात्मदेहदानमाह।
नैवासौ द्वीपिना कुक्षिं विदार्य्य व्यापादितः सर्व्वैर्भक्षितश्च।
हं ब्रवीमि मतिर्दोलायते नूनमित्यादि। तदनन्तरं तृती-
र्त्तवचनं श्रुत्वा स विप्रो भ्रमं निश्चित्य छागं त्यक्त्वा स्नात्वा
ययौ। छागश्च नीत्वा धूर्त्तैः खादितः। अतोऽहं ब्रवीमि
ौपम्येन यो वेत्तीत्यादि। राजाह मेघवर्ण कथं त्वया
मध्ये सुचिरमुषितम्। कथं वा तेषामनुनयः कृतः। मेघवर्ण
देव स्वामिकार्य्यार्थिना स्वप्रयोजनवशाद्वा किं किं न
ते। ९३। पश्य

लोको वहति किं राजन् न मूर्द्ध्ना दग्धुमिन्धनम्।
क्षालयन्नपि वृक्षाङ्घ्रिं नदीवेगो निकृन्तति ॥ ९४ ॥

चोक्तम्,

स्कन्धेनापि वहेच्छत्रून् कार्य्यमासाद्य बुद्धिमान्।

अनात्मं [illegible] विश्वासादिना [illegible] [illegible] मूर्खा [illegible] तव्यं कथमपि [illegible] भवतीति भावः ॥ ९२ ॥

सिंहेनेति। भद्र साधो। वरं श्रेष्ठः। प्रवृत्तिः इच्छा। जम्बुकेन शृगा-
लेन [illegible] [illegible]। [illegible] [illegible]। कुक्षिम् उदरम्।
[illegible] ॥ ९३ ॥

लोक इति। राजन् [illegible] लोकः [illegible] दग्धुम् [illegible] इन्धनम्
[illegible] मूर्द्ध्ना [illegible] [illegible] न वहति किम्। [illegible]।
[illegible] नद्याः [illegible] [illegible] [illegible] [illegible]। "[illegible]
[illegible]" इति [illegible]। [illegible] [illegible]। [illegible]।
[illegible] [illegible] [illegible] [illegible] [illegible] ॥ ९४ ॥

यथा वृद्धेन सर्पेण मण्डूका विनिपातिताः ॥ ८५ ॥

राजाह, कथमेतत् । मेघवर्णः कथयति, अस्ति जी
द्याने मन्दविसर्पो नाम सर्पः। सोऽतिजीर्णतया स्वाहा
मन्वेष्टुमक्षमः सरस्तीरे पतित्वा स्थितः। ततो दूरात्
चिन्मण्डूकेन दृष्टः पृष्टश्च, किमिति भवानाहारं नान्विष्य
सर्पो ब्रूते, भद्र गच्छ किं ते मम मन्दभाग्यस्य पृच्छ
प्रश्नेन। ततः सञ्जातकौतुकः स भेकः सर्वथा कथ्यतामि
सर्पमाह। सर्पो ब्रूते, भद्र अत्र ब्रह्मपुरे कौण्डिन्यस्
श्रोत्रियस्य पुत्रो विंशतिवर्षदेशीयः सर्वगुणसम्पन्नो दु
र्भाग्यान्नृशंसेन दष्टः। ततः सुशीलनामानं पुत्रं मृत
लोक्य कौण्डिन्यः शोकेन मूर्च्छितः पृथिवीतले लुलोठ।
न्तरं ब्रह्मपुरवासिनः सर्वे बान्धवास्तस्य तत्रागत्योपविष्टाः

तथा चोक्तम्,

आहवे व्यसने चैव दुर्भिक्षे शत्रुविग्रहे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ ८७

स्कन्धेनेति। बुद्धिमान् प्राज्ञः कार्यम् कर्त्तव्यं च्चासाद्य प्राप्य
निवद्धो भवेदिति यावत्। रिपुम् स्कन्धेनापि स्कन्धे कृत्वापि वहेत्।
येन वृद्धेन जरापन्नेन सर्पेण मण्डूकाः भेकाः निपातिताः नाशिताः
राजेति। अतिजीर्णतया समधिकवार्द्धक्येन। अन्वेष्टुम् अनुसन्
सञ्जातकौतुकः प्रवृत्तकौतूहलः। श्रोत्रियस्य वेदाध्यायिनो ब्राह्मणस्य।
वर्षदेशीयः विंशतिवर्षकल्पः। उक्तञ्च दण्डिना "ईषदसमाप्तौ
देशीयदेश्यादिर्मध्यप्रतिनिधौ अपि" इति। दुर्दैवात् मम तस्य
। बान्धवाः मित्राणि ॥ ८६ ॥
आहव इति। आहवे युद्धसमये। व्यसने विपदि। दुर्भिक्षे भिक्षाभा
शत्रुणाक्रमणकाले। राजद्वारे राजसभायाम्, अभि
यावत्। श्मशाने प्रेतभूमौ, अन्त्येष्टिक्रियाकाल इति यावत्।
अनुगच्छति स बान्धवः मित्रमित्याख्यायाः समुचितः ॥

ततः कपिलो नाम स्नातकोऽवदत् अरे कौण्डिन्य मूढोऽसि
येन विलपसि ॥ ९८ ॥ शृणु,

क्रोडीकरोति प्रथमं यदा जातमनित्यता ।
धात्रीव जननी पश्चात् तदा शोकस्य कः क्रमः ॥९९॥

तथा च, क्व गताः पृथिवीपालाः ससैन्यबलवाहनाः ।
वियोगसाक्षिणी येषां भूमिरद्यापि तिष्ठति ॥ १०० ॥

अपि च, प्रतिक्षणमयं कायः क्षीयमाणो न लक्ष्यते ।
आमकुम्भ इवाम्भःस्थो विशीर्णः सन् विभाव्यते ॥१०१॥

आसन्नतरतामेति मृत्युर्जन्तोर्दिने दिने ।
आघातं नीयमानस्य वध्यस्येव पदे पदे ॥ १०२ ॥

मूढ इति । मूढः अज्ञानवान् । विलपसि शोचसि ॥ ९८ ॥
क्रोडीकरोतीति । धात्रीव उपमाता यथा अनित्यता नश्वरता जातम्
नरम् प्रथमम् आदितः एव क्रोडीकरोति विषयीकरोति । पक्षे अङ्के
[illegible] । पश्चात् तदनन्तरं जननी प्रसूतिः । क्रोडीकरोतीति पाठः । इति
तदा शोकस्य विलापस्य कः क्रमः नियमः । कश्चिदपि नास्तीत्यर्थः ॥९९॥
क्वेति । पृथिवीं धरां पालयन्ति रक्षन्ति ये ते पृथिवीपालाः राजानः ते
[illegible]पालाः । ससैन्यबलवाहनाः । सैन्यं कटकम् । बलं हस्त्यश्वादि । वाहनम्
[illegible]दि । तैः सहिताः । क्व कुत्र अधुना ते [illegible] गताः प्रस्थिताः । भूमिः धरित्री
गतानां महीपालानां वियोगसाक्षिणी वियोगस्य सम्भूतेः साक्षिणी द्रष्टृ-
[illegible] तिष्ठति । पृथिव्यां स्थैर्यमेव नश्वरमिति भावः ॥ १०० ॥
प्रतिक्षणमिति । अयम् कायः शरीरं प्रतिक्षणम् अनुपदं क्षीयमाणः
नश्यन् न लक्ष्यते, कायस्य ह्रासभावं न कश्चित् पश्यतीत्यर्थः । अम्भःस्थः
जलस्थः आमकुम्भः अपक्वकलश इव विशीर्णः विनष्टः सन् विभाव्यते
[illegible]ज्ञायते, न तु विनाशात् पूर्वम् ॥ १०१ ॥
आसन्नेति । [illegible] आघातम् वधभूमिं नीयमानस्य प्राप्यमाणस्य
[illegible] पदे पदे प्रतिपदमिव जन्तोः प्राणिनः दिने दिने प्रतिदिनमपि च [illegible]
[illegible] एति गच्छति ॥ १०२ ॥

यतः, अनित्यं यौवनं रूपं जीवितं द्रव्यसञ्चयः।

ऐश्वर्य्यं प्रियसंवासो मुह्येत् तत्र न पण्डितः ॥ १०

यथा काष्ठं च काष्ठं च समेयातां महोदधौ।

समेत्य च व्यपेयातां तद्वद्भूतसमागमः ॥ १०४ ॥

यथा हि पथिकः कश्चिच्छायामाश्रित्य तिष्ठति।

विश्रम्य च पुनर्गच्छेत् तद्वद्भूतसमागमः ॥ १०५ ॥

अन्यच्च, पञ्चभिर्निर्म्मिते देहे पञ्चत्वं च पुनर्गते।

स्वां स्वां योनिमनुप्राप्ते तत्र का परिदेवना ॥ १०६

यावन्तः कुरुते जन्तुः सम्बन्धान् मनसः प्रियान्।

तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः ॥ १०७

अनित्यमिति। यौवनम् वयः। रूपम् सौन्दर्य्यम्। जीवितम् प्र
द्रव्यसञ्चयः द्रव्याणाम् धनधान्यादीनां सञ्चयः आहरणम्। ऐश्वर्य्यम् वि
प्रियसंवासः प्रियैः पुत्रादिभिरिष्टैः संवासः एकत्रावस्थितिः। एत
अनित्यम् नश्वरं। अतः पण्डितः प्राज्ञः तत्र तस्मिन् विषये न मुह्येत्
आसक्तिं न कुर्य्यात् ॥ १०२ ॥

यथेति। यथा महोदधौ महार्णवे काष्ठञ्च काष्ठञ्च द्वौ काष्ठखण्डौ
याताम् यदृच्छया वाह्यमानौ परस्परं सङ्गच्छेतां। समेत्य मिलित्वा च
व्यपेयाताम् यदृच्छयैव वियुक्तौ भवेतां। भूतसमागमः भूतानां प्राणिनां
गमः मेलनं तद्वत् तथैव ॥ १०४ ॥

यथेति। यथा हि यद्वत् कश्चित् पथिकः पान्थः छायाम् अनातपं "
सूर्य्यप्रिया कान्तिः प्रतिबिम्बमनातपः" इत्यमरः। आश्रित्य अवलम्ब्य
सते। विश्रम्य च श्रमापनोदनं कृत्वा च पुनः गच्छेत् अभीष्टं देशं प्र
भूतसमागमः तद्वत् तथैव ॥ १०५ ॥

पञ्चभिरिति। पञ्चभिः क्षित्यप्तेजोमरुद्व्योमरूपैः भूतपञ्चकैः नि
रचिते देहे काये पञ्चत्वम् पञ्चीभावं गते प्राप्ते एवं दत्तञ्च स्वां स्वां निजां
निम् निदानं अनुप्राप्ते पुनः लब्धे सति तत्र विषये परिदेवना विलापः
॥ १०६ ॥

यावन्त इति। जन्तुः जीवः मनसः चेतसः प्रियान् अभिमतान् या

नायमत्यन्तसंवासो लभ्यते येन केनचित् ।
अपि स्वेन शरीरेण किमुतान्येन केनचित् ॥ १०८ ॥

यः, संयोगो हि वियोगस्य संसूचयति सम्भवम् ।
अनतिक्रमणीयस्य जन्म मृत्योरिवागमम् ॥ १०९ ॥

आपातरमणीयानां संयोगानां प्रियैः सह ।
अपथ्यानामिवान्नानां परिणामो हि दारुणः ॥ ११० ॥

यः, व्रजन्ति न निवर्त्तन्ते स्रोतांसि सरितां यथा ।
आदायादाय मर्त्यानां सदा रात्र्यहनी तथा ॥ १११ ॥

सुखास्वादपरो यस्तु संसारे सत्समागमः ।

स्थानान् सम्बन्धान् सम्पर्कान् कुरुते बध्नाति यस्य जन्तोः हृदये मनसि ... शोकशङ्कवः शोकरूपाणि शल्यानि निखन्यन्ते प्रोथि- ... भवन्ति ॥ १०७ ॥

नेति । अयम् अभीष्टः अत्यन्तसंवासः नित्यैः सह चिरावस्थितिः येन ... केनापि सह न लभ्यते न प्राप्यते । स्वेन निजेन शरीरेणापि न ... इति पूर्वेणान्वयः । अन्येन अपरेण केनचित् किमुत कथं पुनः लभ्यते ... ॥ १०८ ॥

संयोग इति । ... अनतिक्रमणीयस्य दुर्लङ्घस्य मृत्योः ... आगमम् आगमनमिव संयोगः मिलनं हि वियोगस्य विच्छेदस्य सम्भवम् ... संसूचयति विज्ञापयति ॥ १०९ ॥

आपातेति । अपथ्यानाम् अहितानाम् अन्नानाम् ... आपातरमणीयानाम् ... प्रियैः ... सह संयोगानाम् ... परिणामः ... दारुणः अति कठोरः ॥ ११० ॥

व्रजन्तीति । यथा सरिताम् नदीनां स्रोतांसि ... सदा नित्यं व्रजन्ति न निवर्त्तन्ते न प्रत्यावर्त्तन्ते तथा रात्र्यहनी दिवारात्रौ मर्त्यानाम् ... आयुः ... आदाय आदाय ... व्रजतः न निवर्त्तेते ॥ १११ ॥

[illegible]
[illegible]

स वियोगावसानत्वात् दुःखानां धुरि युज्यते ॥ ११
अतएव हि नेच्छन्ति साधवः सत्समागमम् ।
यद्वियोगासिलूनस्य मनसो नास्ति भेषजम् ॥११३॥
सुकृतान्यपि कर्म्माणि राजभिः सगरादिभिः ।
अथ तान्येव कर्म्माणि ते चापि प्रलयं गताः ॥११४
सञ्चिन्त्य सञ्चिन्त्य तमुग्रदण्डं मृत्युं मनुष्यस्य विचक्षणस्य ।
वर्षाम्बुसिक्ता इव चर्म्मबन्धाः सर्व्वे प्रयत्नाः शिथिलीभवन्ति॥
यामेव रात्रिं प्रथमामुपैति गर्भे निवासं नरवीरलोकः ।
ततः प्रभृत्यस्खलितप्रयाणः स प्रत्यहं मृत्युसमीपमेति ॥११६॥

सत्समागमः । सत्समागमः वियोगावसानत्वात् वियोगे विच्छेदे अ: समाप्तिः यस्य तस्य तद्भावात् दुःखानाम् शोकानां धुरि अग्रे युज्यते । स एव महद्दुःखरूपेण गण्यो भवतीत्यर्थः ॥ ११२ ॥

अत इति । अतएव हि अस्मादेव कारणात् साधवः ज्ञानवन्तः सत्समागमम् प्रियसङ्गतिं न इच्छन्ति न कामयन्ते । यद्वियोगासिलूनस्य यस्य समागमस्य वियोगः विच्छेदः स एव असिः कृपाणः तेन लूनस्य छि मनसः चेतसः भेषजम् औषधम् नास्ति न विद्यते ॥ ११३ ॥

सुकृतानीति । सगरादिभिः सगरः सूर्य्यवंशीयनरपतिविशेषः स आ येषां ते तैः राजभिः नृपैः कर्म्माणि सुकृतानि धर्म्मबुद्ध्या आचरितानि अथ तान्येव सुकृतान्येव कर्म्माणि ते चापि राजानः प्रलयम् नाशं ग प्राप्ताः ॥ ११४ ॥

सञ्चिन्त्येति । उग्रदण्डम् उग्रं तीव्रं दण्डम् शासनं यस्य स तं, अ निर्द्दयमिति यावत् । तम् सुपरिचितं मृत्युम् कालं सञ्चिन्त्य पुनः मनसि निधाय विचक्षणस्य अतिनिपुणस्यापि मनुष्यस्य सर्व्वे शिथिलाः प्रय वर्षाम्भसा अम्बुना वारिणा सिक्ताः सिञ्चिताः चर्म्मबन्धाः चर्म्मरज्जवः शिथिलीभवन्ति विशीर्य्यन्ते ॥ ११५ ॥

यामिति । नरवीरलोकः नरेषु वीरः शूरः लोकः पुरुषः यामेव प्रथम रात्रिं गर्भे मातुः कुक्षौ निवासम् वसतिं उपैति प्राप्नोति, ततः प्रभृति

...थ संसारं विचारय । शोकोऽयमज्ञानस्य प्रपञ्चः ।११७। पश्य

अज्ञानं कारणं न स्याद्वियोगो यदि कारणम् ।
शोको दिनेषु गच्छत्सु वर्द्धतामपयाति किम् ॥११८॥

तदात्मानमनुसन्धेहि, शोकचर्चां च परिहर ।११९। यतः

अकाण्डपातजातानामस्त्राणां मर्मभेदिनाम् ।
गाढशोकप्रहाराणामचिन्तैव महौषधम् ॥१२०॥

ततस्तद्वचनं निशम्य प्रबुद्ध इव कौण्डिन्य उत्थायाब्रवीत्

...मारभ्य व स लोकः अस्खलितप्रयाणः अस्खलितं ध्रुवं प्रयाणम् प्रसारो ...स्य स तथाभूतः सन् प्रत्यहम् प्रतिदिनम् अन्तकसमीपं मृत्योः कालस्य समीपं ...विध्य एति आगच्छति ॥ ११६ ॥

अथेति । विचारय यथायथं परिचिन्तय । अज्ञानस्य अविद्यायाः । ...ञ्चः माया ॥ ११७ ॥

अज्ञानमिति । अज्ञानम् अविद्या, मोह इति यावत् । यदि चेत् कारणम् ...दानम्, शोकस्येति यावत् । न स्यात् न भवेत् । वियोगः इष्टजनविरहः ...दि कारणम् स्यादिति शेषः । तदा दिनेषु दिवसेषु गच्छत्सु अतीतेषु शोकः ...र्द्धताम् वृद्धिं गच्छतु, कथं अपयाति, नश्यति । शोकस्य वियोगमूलत्वे ...वियोगकालस्य तस्याप्युत्तरोत्तरं वृद्धिरेव सम्भाविता; किन्तु शोकाप... ...मेव तस्यापगतत्वात् तद्विपरीततया मोह एव तस्य कारणं, वियोगोऽति ...वितार्थः ॥ ११८ ॥

तदिति । आत्मानम् आत्मतत्त्वं । अनुसन्धेहि परिचिन्तय । शोकचर्चाम् पुनः पुनः शोकचिन्तां । परिहर त्यजेति ॥११९॥

अकाण्डेति । अकाण्डपातजातानाम् अकाण्डे अकाले, अतर्कितभावेन ...र्थः । पातः पतनं तेन जातानां उत्पन्नानां ... मर्माणि अस्थि... शोकः स एव प्रहारः आघातः ... ...॥ १२० ॥

इत्यभिप्रायो गृहस्थाश्रमबाधेन । वनं गच्छामि । १२१ । पु

पितरौ मूते

वनेऽपि दोषाः प्रभवन्ति रागिणां
गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ।
अकुत्सिते कर्मणि यः प्रवर्त्तते
निवृत्तरागस्य गृहं तपोवनम् ॥ १२२ ॥

यतः, दुःखितोऽपि चरेद्धर्मं यत्र कुत्राश्रमे रतः ।
समः सर्वेषु भूतेषु न लिङ्गं धर्म्मकारणम् ॥ १२३ ॥

उक्तञ्च, वृत्त्यर्थं भोजनं येषां सन्तानार्थञ्च मैथुनम् ।
वाक् सत्यवचनार्थञ्च दुर्गाण्यपि तरन्ति ते ॥ १२४ ॥

यथा धनम् न किञ्चित् प्रयोजनम् "एवं गृहस्थधर्माश्रमक्रियार्थगात
इत्यपरः । वनं गच्छामि, वानप्रस्थो भूत्वा तत्रैव तपश्चरामीति भावः ॥१
वन इति । रागिणाम् विषयेषु अनुरागवतां जनानां वने तपो
दोषाः पापानि प्रभवन्ति समुत्पद्यन्ते । गृहे संसारेऽपि पञ्चेन्द्रियनि
पञ्चेन्द्रियाणां चक्षुरादीनां पञ्चानां ज्ञानसाधनानां निग्रहः विषयेभ्यः
अन्तर्निरोधनं तपः तपस्या, स एव तपःफलम् ददातीत्यर्थः । अ
अकुत्सिते साधुभिरनिन्दिते पुण्ये कर्मणि प्रवर्त्तते व्याप्रियते निवृ
निवृत्तः शान्तिं प्राप्तः रागः विषयासक्तिर्यस्य स तथाभूतः तस्य गृहम्
एव तपोवनम् तपश्चर्यास्थानम् ॥ १२२ ॥

दुःखित इति । यत्र कुत्रापि, ब्रह्मचर्यादौ यस्मिन् कस्मिन्नपि ।
अवस्थायां । रतः अवस्थितः । दुःखितः विपदुपगतोऽपि सन् सर्वेषु
निखिलेषु जीवेषु समः समदर्शी भूत्वा धर्मम् पुण्यकर्म चरेत् । लिङ्गम्
चिह्नं धर्मकारणम् धर्मस्य कारणं मूलं न भवतीति शेषः ॥१२३॥

वृत्त्यर्थमिति । वृत्त्यर्थम् जीवितरक्षणाय, न तु रसनासुखाय ।
जनानां भोजनम् आहारग्रहणम् । सन्तानार्थम् पुत्रोत्पादनाय, न तु
येषां मैथुनम् स्त्रीसङ्गः । सत्यवचनार्थम् सत्यभाषणाय, न तु
येषां वाक् वचनशक्तिः । ते दुर्गाणि सङ्कटान्यपि तरन्ति
सुखेन यान्ति ॥ १२४ ॥

यथाहि,
आत्मा नदी संयमपुण्यतीर्था
सत्योदका शीलतटा दयोर्मिः ।
तत्राभिषेकं कुरु पाण्डुपुत्र
न वारिणा शुध्यति चान्तरात्मा ॥ १२५ ॥

विशेषतश्च,
जन्ममृत्युजराव्याधिवेदनाभिरभिद्रुतम् ।
संसारमिदमत्यन्तमसारं त्यजतः सुखम् ॥ १२६ ॥
दुःखमेवास्ति न सुखं यस्मात् तदुपलक्ष्यते ।
दुःखार्त्तस्य प्रतीकारे सुखसंज्ञा विधीयते ॥ १२७ ॥

कौण्डिन्यो ब्रूते, एवमेव । ततोऽहं तेन शोकाकुलेन ब्राह्मणेन शप्तः यदद्यारभ्य मण्डूकानां वाहनं भविष्यसीति ।

आत्मेति । आत्मा अन्तःकरणं । संयमः इन्द्रियनिग्रहः एव तीर्थं पुण्यं तीर्थं यस्याः सा संयमपुण्यतीर्था । सत्योदका सत्यं सत्यमेव उदकं जलं यस्याः सा सत्योदका । शीलं सच्चरित्रमेव तटं तीरं यस्याः सा शीलतटा । दया एव ऊर्म्मिः स्रोतो यस्याः सा दयोर्म्मिः । एवम्भूता नदी परिवृत्तप्रदेशः । पाण्डुपुत्र हे युधिष्ठिर तत्र तस्यां आत्मनद्यां अभिषेकम् स्नानं कुरु । अन्तरात्मा चित्तं वारिणा सामान्यजलेन न शुध्यति पवित्रतां न गच्छति ॥ १२५ ॥

जन्मेति । जन्म उद्भवः । मृत्युः मरणं । जरा वार्द्धक्यं । व्याधिः गदः । वेदना दुःखानुभूतिः । ताभिः जन्ममृत्युजराव्याधिवेदनाभिः परिद्रुतम् पीडितम् अत्यन्तम् नितान्तम् असारम् स्थिरांशहीनं "सारो बले स्थिरांशे च न्याय्ये क्लीवं वरे त्रिषु" इत्यमरः । इदम् संसारम् जगत् त्यजतः परित्यजतः सुखम् निर्वृतिः भवतीति शेषः ॥ १२६ ॥

दुःखमिति । दुःखम् एव केवलं अस्ति, संसार इति शेषः । सुखम् न अस्तीति शेषः । यस्मात् दुःखात् सुखम् उपलक्ष्यते अवगम्यते । उपलक्षणाद् । दुःखार्त्तस्य दुःखेन आर्त्तस्य पीडितस्य प्रतीकारे प्रतिविधाने सतीति शेषः । सुखसंज्ञा सुखस्य संज्ञा नाम विधीयते कुरुते । दुःखाभाव एव सुखम्, अतो दुःखमेव वर्त्तते इति भावः ॥ १२७ ॥

कौण्डिन्य इति । एवमेव यथा किम् । तादृशम् तादृशम् । अपरं वर्षेण्डुः अपरेद्युः [illegible] न योद्धुं शीलयतीति तथाविधः । [illegible]

कपिलो ब्रूते, समस्त्युपदेशाग्रहिष्णुर्भवान्, शोकाविष्टं ते हृदयम् । तथापि कार्य्यं शृणु ।१२८।

सङ्गः सर्व्वात्मना त्याज्यः स चेत् त्यक्तुं न शक्यते ।
स सद्भिः सह कर्त्तव्यः सतां सङ्गो हि भेषजम् ॥ १२९

अन्यञ्च, कामः सर्व्वात्मना हेयः स चेद्धातुं न शक्यते ।
स्वभार्य्यां प्रति कर्त्तव्यः सैव तस्य हि भेषजम् ॥ १३०

एतच्छ्रुत्वा स कौण्डिन्यः कपिलोपदेशाद्यतप्रशान्तशोकानलो यथाविधि दण्डग्रहणं कृतवान् । ततो ब्राह्मणशापेन मण्डूकान् वोढुमत्र तिष्ठामि । अनन्तरं तेन मण्डूकेन गत्वा मण्डूकनाथस्य जालपादस्य तत् कथितम् । ततोऽसावागत्य स मण्डूकनाथः सर्पमधिष्ठितवान् । स सर्पस्तं कृत्वा चित्रपदक्रमं बभ्राम । परेद्युश्चलितुमसमर्थं तं मण्डूकनाथोऽवदत् किमिति भवानद्य मन्दगतिः । सर्पो ब्रूते, आहारविरहाद्दुर्बलोऽस्मि । मण्डूकनाथोऽवदत्, अस्मदाज्ञया मण्डूकान् भक्षय । ततः गृहीतोऽयं महाप्रसाद इत्युक्त्वा क्रम

इष्टवियोगजनितदुःखेन आविष्टं सम्यक् अधिष्ठितम् । हृदयम् अन्तरात्मा ।१२८।

सङ्ग इति । सङ्गः संसर्गः सर्व्वात्मना कायमनोवाक्येन त्याज्यः हातव्यः चेत् यदि स सङ्गः त्यक्तुं न शक्यते तदा सद्भिः साधुपुरुषैः सह कर्त्तव्यः हि यतः सतां सङ्गः भेषजम् शोकप्रशमनौषधम् ॥ १२९ ॥

काम इति । कामः वासना सर्व्वात्मना हेयः त्याज्यः । चेत् यदि कामः हातुम् त्यक्तुं न शक्यते तदा स्वभार्य्याम् धर्मपत्नीं प्रति कर्त्तव्यः । यतः सा पत्न्येव तस्य कामस्य भेषजम् प्रशमनौषधम् ॥ १३० ॥

एतदिति । कपिलोपदेशाद्यतप्रशान्तशोकानलः कपिलस्य उपदेशः हितवचनम् स एव अमृतं जलं तेन प्रशान्तः निर्व्वाणं प्राप्तः शोकः दुःखमेव अनलः अग्निः यस्य स तथाभूतः । यथाविधि यथान्यायेन दण्डग्रहणम् कृतवान् गृहीतवान् वानप्रस्थोऽभूदित्यर्थः । जालपादस्य जालपादनाम्नः मण्डूकनाथस्य । अधिष्ठितवान् आरूरोह । चित्रपदक्रमं विशेष वि

मण्डूकान् खादति । अथ निर्मण्डूकं सरो विलोक्य मण्डूकनाथोऽपि तेन खादितः । अतोऽहं ब्रवीमि स्कन्धेनापि वहेच्छत्रुमित्यादि । देव यात्विदानीं पुरावृत्ताख्यानकथनं । सर्वथा सन्धेयोऽयं हिरण्यगर्भो राजा सन्धीयतामिति मे मतिः । राजोवाच, कोऽयं भवतो विचारः यतो जितस्तावदयमस्माभिः । ततो यद्यस्मदाश्रया सेवायां वसति तदास्तां, नो चेद्विगृह्यताम् । अत्रान्तरे जम्बुद्वीपादागत्य शुकेनोक्तं, देव सिंहलद्वीपस्य सारसो राजा सम्प्रति जम्बुद्वीपमाक्रम्याधितिष्ठति । राजा ससम्भ्रममाह, किं किम् । शुकः पूर्वोक्तं कथयति । गृध्रः स्वगतमुवाच, साधु रे चक्रवाक मन्त्रिन् साधु । राजा सकोपमाह, आस्तां तावदयम् । तमेव गत्वा समूलमुन्मूलयामि ।१३१।

दूरदर्शी विहस्याह,

न शरन्मेघवत् कार्य्यं वृथैव घनगर्जितम् ।
परस्यार्थमनर्थं वा प्रकाशयति नो महान् ॥ १३२ ॥

अपरञ्च, एकदा न विगृह्णीयात् बहून् राजा विवादिनः ।

न गमनभङ्गया क्रमः गतिः यस्य तद् यथाविधं । बभ्राम इतस्ततः पर्य्यटत् । अस्मदाश्रया अस्माकम् मम । गौरवे बहुवचनम् । आश्रया वसुधा । "प्रज्ञादिभ्य उपसंख्यानम्" इति तत्वीया । महाप्रसादः महानुग्रहः । स्तोकः स्वल्पः । याद्य विरमत्र । कः किमकृत्यमायः । निवसति भुनक्ति । आस्ताम् स्वाधिकारे तिष्ठतु । विगृह्यताम् बलेन दूरीक्रियताम् । आक्रम्य अवरुध्य । ससम्भ्रमम् कौतुकसहम् । स्वगतम् मनसि । अन्यः । आस्ताम् अजयताम् । समूलम् मूलसहितम् ॥ १३१ ॥

नेति । शरन्मेघवत् शरदि रिक्तघन इव वृथा एव घनगर्जितम् अतिशयं उच्चैराक्रोशमन्दनिस्वनः । न कार्य्यम् न विधेयम् । महान् उदारचेताः परस्य अर्थम् मनोज्ञम् अनर्थम् अशुभं अनिष्टं वा न प्रकाशयति न बहीकरोति ॥ १३२ ॥

एकदेति । राजा एकदा समकालमेव बहून् अनेकान् विवादिनः शत्रून्

सदर्पोऽप्युरगः कीटैर्बहुभिर्नाशितो ध्रुवम् ॥ १२३ ॥

देव किम् इतो विना सन्धानं गमनमस्ति । यतः अस्माकं पश्चात् प्रकोपः कर्त्तव्यः ॥ १२४ ॥ अपरञ्च,

योऽर्थतत्त्वमविज्ञाय क्रोधस्यैव वशं गतः ।
स तथा तप्यते मूढो ब्राह्मणो नकुलादिव ॥ १२५ ॥

राजा पृच्छति, कथमेतत् । दूरदर्शी कथयति, अस्त्युज्जयिन्यां माधवो नाम ब्राह्मणः । तस्य ब्राह्मणी प्रसूता । सा बालापत्यरक्षार्थं ब्राह्मणमवस्थाप्य स्नातुं गता । अथ ब्राह्मणस्य कृते राज्ञः पार्व्वणश्राद्धं दातुमागतो जनः । तं दृष्ट्वा ब्राह्मणः सहजदारिद्र्यादचिन्तयत् यदि सत्वरं न गच्छामि तदाऽन्यः कश्चिच्छ्राद्धं ग्रहीष्यति । १२६ । उक्तञ्च,

आदेयस्य प्रदेयस्य कर्त्तव्यस्य च कर्म्मणः ।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् ॥ १२७ ॥

न विग्रह्णीयात् न योधयेत् । सदर्पः बलगर्व्वितोऽपि उरगः भुजङ्गः अनेकशः संहतैः कीटैः । ध्रुवम् निश्चितं विनाशितः निहतः ॥ १२३ ॥

देवेति । सन्धानम् सन्धिं विना ऋते, तदकृत्वेत्यर्थः । अस्ति अस्माकं पश्चात् पृष्ठभागे । प्रकोपः आक्रमणम् ॥ १२४ ॥

य इति । यः जनः अर्थतत्त्वम् अर्थस्य अवस्थायाः तत्त्वं याथार्थ्यं यथायथं न ज्ञात्वा क्रोधस्यैव केवलं कोपस्यैव वशम् आयत्तताम् गतः । मूढः अज्ञानवान् नकुलात् ब्राह्मण इव यथा तथा तप्यते दुःखमाप्नोति ॥

राजेति । ब्राह्मणी सहधर्म्मिणी । प्रसूता सुतं सूतवती । निमित्ते । पार्व्वणश्राद्धम् पार्व्वणं पर्व्वकृत्यं । श्राद्धम् श्राद्धीयान्नम् । दारिद्र्यात् स्वभावतोऽकिञ्चनत्वात् ॥ १२६ ॥

आदेयस्येति । आदेयस्य आदानस्य । प्रदेयस्य प्रदानस्य । कर्त्तव्यस्य कर्म्मणः क्षिप्रं सत्वरं अक्रियमाणस्य असम्पादितस्य यतः तद्रसं भोग्यम् कालः पिबति आचामति । कालक्रमेण अभिमतं नश्यति भावः ॥ १२७ ॥

विशेषात्र रक्षकः कोऽपि नास्ति । तत् किं करोमि । यातु चिरकालपालितं नकुलं बालकरक्षार्थं व्यवस्थाप्य गच्छामि । तथा कृत्वा गतः । ततस्तत्र नकुलेन बालकसमीपमागच्छन् दृष्टो कृष्णसर्पो व्यापादितः खण्डितश्च । अथासौ नकुलो ब्राह्मणमायान्तमवलोक्य रक्तविलिप्तमुखपादः सत्वरमुपागम्य ब्राह्मणस्य चरणयोर्लुलोठ । ततोऽसौ ब्राह्मणस्तं तथाविधं दृष्ट्वा मम पुत्रोऽनेन भक्षित इत्यविचार्य तं व्यापादितवान् । अनन्तरं यावदुपसृत्य पश्यति, ब्राह्मणस्तावद्बालकः सुस्थः स्वपिति, सर्पस्तु व्यापादितस्तिष्ठति । ततोऽसौ ब्राह्मणो विषादमुपगतः । अतोऽहं ब्रवीमि योऽर्थतत्त्वमविज्ञाय इत्यादि ।१३८।

अपरञ्च,

कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा ।
षड्वर्गमुत्सृजेदेनमस्मिंस्त्यक्ते सुखी भवेत् ॥ १३९ ॥

राजाह, मन्त्रिन् एष ते निश्चयः । मन्त्री ब्रूते, एवमेव । १४० । यतः,

स्मृतिश्च परमार्थेषु वितर्को ज्ञाननिश्चयः ।

विशेषेति । यातु, अस्तु तावत् । चिरकालपालितम् चिरकालम् बहोर्व पालितम् बहुदिना परिपोषितं । ... व्यवस्थाप्य ... । तूष्णीम् ... । ... रक्तविलिप्तमुखपादः रक्तेन रुधिरेण विलिप्ताः ... मुखं पादाश्च ... । ... सुस्थः कुशली । ... विषादम् खेदं । १३८ ।

काम इति । एतम् कामादिकं षड्वर्गम् ... परित्यजेत् । ... सुखी भवेत् ... । ... । १३९ ।

राजेति । एषः ... । निश्चयः ... । १४० ।

दृढता मन्त्रगुप्तिश्च मन्त्रिणः परमो गुणः ॥ १४१ ॥

तथा च, सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥ १४२ ॥

तद्देव यदीदानीमस्मद्वचनं क्रियते तदा सन्धाय गम्यताम् । यतः,

यद्यप्युपायाश्चत्वारो निर्दिष्टाः साध्यसाधने ।
संख्यामात्रं फलं तेषां सिद्धिः साम्नि व्यवस्थिता ॥ १४३ ॥

राजाह, कथमेवं सत्वरं सम्भाव्यते । मन्त्री ब्रूते देव सत्वरं भविष्यति । यतः,

मृद्घटवत् सुखभेद्यो दुःसन्धानश्च दुर्जनो भवति ।
सुजनस्तु कनकघटवत् दुर्भेद्यश्चाशु सन्धेयः ॥ १४४ ॥

धृतिरिति । परमार्थेषु धर्मार्थेषु मतिः मनोयोगः । विक्रमः शत्रुनि- बर्हणम् । ज्ञानविषयः ध्याने, विज्ञविषये निश्चयः, बुद्धिस्थैर्यम् । दृढता स्थिर- प्रतिज्ञता । मन्त्रगुप्तिः मन्त्रस्य मन्त्रणायाः गुप्तिः गोपनम् । मन्त्रिणः अमात्यस्य इत्येकः । परमः श्रेष्ठः गुणः धर्मः ॥ १४१ ॥

सहसेति । सहसा हठात्, अविमृश्येति यावत् । क्रियाम् कार्यं न विदधीत नाचरेत् । अविवेकः असावधानम् आपदानाम् सङ्कटानां परम् श्रेष्ठ पदम् आस्पदम् । सम्पदः विभूतयः गुणलुब्धाः नयगुणैर्लुब्धाः सत्यः विमृश्यकारिणम् जनम् स्वयम् स्वतः एव वृणुते वाञ्छन्ति ॥ १४२ ॥

यद्यपीति । यद्यपि साध्यसाधने कार्यसम्पादने विषये चत्वारः सामदान- भेददण्डरूपाः उपायाः साधनानि निर्दिष्टाः निरूपिताः नयविद्भिरिति यावत् । तथापि तेषां उपायानां संख्यामात्रं केवलम् गणनैव फलम् उत्कर्षः । सिद्धिः साफल्यम् साम्नि मन्त्री व्यवस्थिता प्रतिष्ठितम् ॥ १४३ ॥

मृदिति । दुर्जनः खलः मृद्घटवत् मृन्मयकलश इव सुखभेद्यः सुखं अना- यासेन भेद्यः विदार्यः । पक्षे सुविघात्यः । दुःसन्धानः दुःदुःखेन सन्धानम् पुनर्मेलनं यस्य न स तथाविधः । पक्षे दुर्घटः भवति । सुजनः साधुः कनकघटवत् इव दुर्भेद्यः कष्टविभाज्यः । पक्षे दुर्विघात्यः । आशु शीघ्रं सन्धेयः । पक्षे संघटनसमर्थः । भवतीति शेषः ॥ १४४ ॥

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ॥१४५॥

विशेषतश्च असौ धर्मज्ञो राजा सर्वज्ञो मन्त्री च। ज्ञातमेतन्मया पूर्वं मेघवर्णवचनात् तत्कृतकार्यसन्दर्शनाच्च ॥१४६॥ यतः,

कर्मानुमेयाः सर्वत्र परोक्षे गुणवृत्तयः।
तस्मात् परोक्षवृत्तीनां फलैः कर्म विभावयेत् ॥१४७॥

राजाह — अलमुत्तरोत्तरेण। यथाभिप्रेतमनुष्ठीयताम्। एतन्मन्त्रयित्वा गृध्रो महामन्त्री तत्र यथार्हं कर्त्तव्यमित्युक्त्वा दुर्गाभ्यन्तरं प्रचलितः। ततः प्रणिधिबकेनागत्य राज्ञो हिरण्यगर्भस्य निवेदितं देव सन्धिं कर्त्तुं महामन्त्री गृध्रोऽस्मत्समीपमागच्छति। राजहंसो ब्रूते मन्त्रिन् पुनः सम्बन्धिना केनचित् अत्रागन्तव्यम्। सर्वज्ञो विहस्याह देव न शङ्कास्पदमेतत्। यतो महाशयोऽसौ दूरदर्शी। अथवा स्थितिरियं

अज्ञ इति। अज्ञः मूर्खः सुखम् अनायासेन आराध्यः सेव्यः, तोष्य इति यावत्। भवतीति शेषः। विशेषज्ञः प्राज्ञः सुखतरम् अत्यन्तसुखेन आराध्यते सेव्यते। ज्ञानलवदुर्विदग्धम् ज्ञानस्य बोधस्य लवः कणा तेन दुर्विदग्धः वृथा गर्वितः तं नरम् ब्रह्मापि स्वयं कमलयोनिरपि न रञ्जयति तोषयितुं न शक्नोति ॥ १४५ ॥

विशेषत इति। तत्कृतकार्य्यसन्दर्शनात् ताभ्यां राजमन्त्रिभ्यां कृतस्य आचरितस्य कार्य्यस्य अनुष्ठानस्य दर्शनात् प्रत्यक्षीकरणात् ॥ १४६ ॥

कर्म्मेति। परोक्षे अप्रत्यक्षे सर्व्वत्र सर्व्वस्मिन् विषये गुणवृत्तयः गुणाः सत्त्वादयः तेषां वृत्तयः कर्म्मानुमेयाः कर्म्मणा अनुष्ठितेन कार्य्येण अनुमेयाः अनुमानेन ज्ञेयाः भवन्तीति शेषः। तस्मात् अतः परोक्षवृत्तीनाम् परोक्षे अप्रत्यक्षे वृत्तिः चेष्टा येषां तेषां जनानामाचारादीनां कर्म्म अनुष्ठितं फलैः सिद्धिभिः विभावयेत् विजानीयात् ॥ १४७ ॥

राजेति। उत्तरोत्तरेण परस्परं उक्तिप्रत्युक्तिरूपेण वाक्यप्रपञ्चेन। अत्र हिरण्यगर्भसमीपे। सम्बन्धिना प्रियवर्गस्य कुटुम्बेन। कदाचित् महत्

मन्दमतीनां कदाचित् शङ्कैव न क्रियते । कदाचित् सर्वशङ्का । १४८ । तथाहि,

सरसि बहुशस्ताराच्छाये क्षणात् परिवञ्चितः
कुमुदविटपान्वेषी हंसो निशासु विचक्षणः ।
न दशति पुनस्ताराशङ्की दिवापि सितोत्पलं
कुहकचकितो लोकः सत्येऽप्यपायमपेक्षते ॥ १४९ ॥

दुर्जनदूषितमनसः सुजनेष्वपि नास्ति विश्वासः ।
बालः पायसदग्धो दध्यपि ननु फूत्कृतं भुङ्क्ते ॥ १५० ॥

तद्देव यथाशक्ति तत्पूजार्थं रत्नोपहारादिसामग्री सज्जीक्रियताम् । तथानुष्ठिते सति चक्रवाको मन्त्री दुर्गद्वारात् बककेन सत्कृत्यानीय राजदर्शनं कारितो दत्तासनो चोपवेशितः ।

कस्मिंश्चिदपि विषये सन्देहमात्रमपि न क्रियते । कदाचित् सर्वशङ्का यावदीये-ष्वेव विषयेषु सन्देहः क्रियते इति, एवम्विधा मन्दमतीनाम् स्वल्पबुद्धीनां स्थितिः स्थिरता ॥ १४८ ॥

सरसीति । कुमुदं सितोत्पलम् अन्विष्यति विचिनोति यः स कुमुदान्वेषी विचक्षणः चतुरः हंसः निशासु रात्रौ बहुशः अनेकशः ताराच्छाये ताराणां नक्षत्राणां छाया प्रतिबिम्बं "छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः" इत्यमरः । यत्र तत्र सरसि जलाशये क्षणात् आशु परिवञ्चितः कुमुदबुद्ध्या प्रतारितः सन्निति शेषः । दिवा दिवसेऽपि ताराशङ्की नक्षत्रभ्रमवान् सितोत्पलम् कुमुदं न दशति चञ्च्वा न स्पृशति । तथा कुहकचकितः कुहकेन इन्द्रजालेन चकितः सन्त्रासितः लोकः जनः सत्ये प्रकृतेऽपि वस्तुनि अपायम् विपत्तिं अपेक्षते आशङ्कते ॥ १४९ ॥

दुर्जनेति । दुर्जनदूषितमनसः दुर्जनेन खलेन दूषितं विपर्यासमापादितं मनः चित्तं यस्य तस्य तथाविधस्य सुजनेषु साधुष्वपि विश्वासः प्रत्ययः नास्ति न भवति । पायसदग्धः पायसेन परमान्नेन दग्धः तापितमुखः बालः शिशुः ननु निश्चितं फूत्कृतं फुत्कारेण सह भुङ्क्ते ॥ १५० ॥

तदिति । तत्पूजार्थम् तस्य रेधसः पूजार्थम् अर्हणाय "पूजा नमस्याप-चितिः सपर्याऽर्चार्हणाः समाः" इत्यमरः । उपवेशितः उपवेशनं कारितः ।

...वाक उवाच मन्त्रिन् युष्मदायत्तं सर्वं स्वेच्छयोपभुज्यतामिदं
...ज्यम्। राजहंसो ब्रूते एवमेव। दूरदर्शी ब्रूते यथाप्रपञ्चनं
...प्रयोजनम्।१५१। यतः

लुब्धमर्थेन गृह्णीयात् स्तब्धमञ्जलिकर्मणा।
मूर्खं छन्दानुवृत्तेन याथातथ्येन पण्डितम्॥१५२॥

अन्यच्च, सद्भावेन हरेन्मित्रं सम्भ्रमेण तु बान्धवान्।
स्त्रीभृत्यान् दानमानैश्च दाक्षिण्येनेतरं जनम्॥१५३॥

तदिदानीं सन्धाय गम्यताम्। महाप्रतापश्चित्रवर्णो राजा। ...वाको ब्रूते यथा सन्धानं कार्यं तदुच्यताम्। राजहंसो ब्रूते ...ति प्रकाराः सन्धीनां सम्भवन्ति। गृध्रो वदति कथयामि ...यताम्।१५४।

बलीयसाभियुक्तस्तु नृपोऽनन्यप्रतिक्रियः।

...दायत्तम् युष्माकं भवतां आयत्तम् अधीनम्। यथाप्रपञ्चनम् अनेकप्रा-
...कारः॥१५१॥

लुब्धमिति। अर्थेन धनदानेन लुब्धम्। अञ्जलिकर्मणा अञ्जलिरचनया ...[illegible]... । छन्दानुवर्तनेन ...[illegible]... मूर्खम् ...[illegible]... । याथातथ्येन ...[illegible]... च पण्डितम् ...[illegible]... गृह्णीयात् वशीकुर्यात्॥१५२॥

सद्भावेनेति। सद्भावेन ...[illegible]... मित्रम् बन्धुम्। सम्भ्रमेण सादरेण बान्ध-
...[illegible]... । दानमानैः दानैः ...[illegible]... स्त्रीभृत्यान्।
...[illegible]... इतरम् ...[illegible]... ।
...[illegible]...॥१५३॥

तदिति। ...[illegible]... सन्धानम् सन्धिः। प्रकाराः भेदाः॥१५४॥

बलीयसेति। ...[illegible]... अभियुक्तः ...[illegible]...
...[illegible]... अनन्यप्रतिक्रियः ...[illegible]... सन्धि ...[illegible]...
...[illegible]...

...[illegible]...

आपन्नः सन्धिमन्विच्छेत् कुर्व्वाणः कालयापनम् ॥१५५॥

कपाल उपहारश्च सन्तानः सङ्गतस्तथा ।
उपन्यासः प्रतीकारः संयोगः पुरुषान्तरः ॥ १५६ ॥
अदृष्टनर आदिष्ट आत्मादिष्ट उपग्रहः ।
परिक्रयस्तथोच्छिन्नस्तथा च परभूषणः ॥ १५७ ॥
स्कन्धोपनेयः सन्धिश्च षोड़शैते प्रकीर्त्तिताः ।
इति षोड़शकं प्राहुः सन्धिं सन्धिविचक्षणाः ॥१५८॥
कपालसन्धिर्व्विज्ञेयः केवलं समसन्धितः ।
सम्प्रदानाद्भवति च उपहारः स उच्यते ॥ १५९ ॥
सन्तानसन्धिर्व्विज्ञेयो दारिकादानपूर्व्वकः ।
सद्भिस्तु सङ्गतः सन्धि मैत्रीपूर्व्व उदाहृतः ॥ १६० ॥
यावदायुःप्रमाणस्तु समानार्थप्रयोजनः ।
सम्पत्तौ वा विपत्तौ वा कारणैर्यो न भिद्यते ॥१६१॥

सम्प्रति कपाल इत्यादिभिः त्रिभिः सन्धिप्रकारानाह । सन्धिविचक्षणाः सन्धौ सन्धानविषये विचक्षणाः पण्डिताः । षोड़शकम् षोड़शप्रकारं ॥१५६॥ ॥ १५७ ॥ १५८ ॥

कपालेति । केवलम् कारणान्तरानपेक्षया । समसन्धितः समयोः तुल्यबलयोः सन्धितः सन्धानात् । पञ्चम्यास्तसिल् । कपालसन्धिः कपाल नामा सन्धिः विज्ञेयः । सम्प्रदानात् द्रविणादिकं दत्त्वा यः सन्धिः भवति वर्त्तते स उपहार उच्यते ॥ १५९ ॥

सन्तानेति । दारिकादानपूर्व्वकः दारिका कन्यका तस्या दानं भार्य्यार्थं सम्प्रदानं तत् पूर्व्वम् आरम्भकं यस्य स तथाभूतः । सन्धिः सन्तानसन्धिः विज्ञेयः । सद्भिः परस्परं साधुजनैः मैत्रीपूर्व्वः मैत्री बन्धुभावः पूर्व्वः आरम्भकः यस्य स तथाविधः सन्धिः सन्धितः उदाहृतः कथितः ॥ १६० ॥

सङ्गतसन्धिं विशिनष्टि यावदिति द्वाभ्यां । यः सन्धिः यावदायुः प्रमाणः आयुः यावत्कालजीवनं प्रमाणं परिमाणं यस्य स तथाविधः । जीवितावधि जीवितपर्य्यन्तस्थायीत्यर्थः । समानानि साधारणानि अर्थस्य कार्य्यस्य प्रयो-

संहतः सन्धिरेवायं प्रकृष्टत्वात् सुवर्णवत् ।
तथान्यैः सन्धिकुशलैः काञ्चनः स उदाहृतः ॥ १६२ ॥
द्रव्यात्मकार्य्यसिद्धिं तु समुद्दिश्य क्रियेत यः ।
स उपन्यासकुशलैरुपन्यास उदाहृतः ॥ १६३ ॥
मयास्योपकृतं पूर्व्वं ममाप्येषः करिष्यति ।
इति यः क्रियते सन्धिः प्रतीकारः स उच्यते ॥ १६४ ॥
उपकारं करोम्यस्य ममाप्येषः करिष्यति ।
अयं चापि प्रतीकारो रामसुग्रीवयोरिव ॥ १६५ ॥
एकार्थां सम्यगुद्दिश्य क्रियां यत्र हि गच्छति ।

...पि उद्देशाः यस्मिन् स समानार्थप्रयोजनः । सम्पत्तौ अभ्युदये विपत्तौ ...दिव कारणैः अभिसन्धिभिः वा यः न भिद्यते विश्लिष्टो न भवति । अयम् ...एव सन्धिः संहतः संहतनामा सन्धिः । प्रकृष्टत्वात् सर्व्वश्रेष्ठत्वात् अयम् ...मिः सुवर्णवत् काञ्चनतुल्यः । तथा अतः स अन्यैः अपरैः सन्धिकुशलैः ...विद्भिः काञ्चनः काञ्चननामा सन्धिः उदाहृतः । द्वाभ्यां युग्मम् ॥ १६१ ॥ ॥ १६२ ॥

द्रव्येति । द्रव्यात्मकार्य्यसिद्धिम् द्रव्यम् धनरत्नादिकं । आत्मा निजदेहः । ...कम् प्रयोजनं । एतेषां सिद्धिं साफल्यं समुद्दिश्य [illegible] विधाय यः सन्धिः ...ते । उपन्यासकुशलैः प्रस्तावनिपुणैः पण्डितैरिति शेषः । स सन्धिः उप...न्यास उदाहृतः ॥ १६३ ॥

मयेति । मया अस्य अपकृतम् उपकारः कृतः । एषः अयम् [illegible] करिष्यति उपकारमिति शेषः । इति कृत्वा [illegible] सन्धि क्रियते स प्रती...कार उच्यते ॥ १६४ ॥

उपकारमिति । अस्य [illegible] करोमि [illegible] करिष्यति, उपकारमिति शेषः । [illegible] रामसुग्रीवयोः रामः दाशरथिः सुग्रीवः [illegible] ॥ १६५ ॥ [illegible] अयम् सन्धिरपि प्रतीकार [illegible]

एकार्थामिति । एकार्थाम् एक [illegible]
[illegible]

उपहारादृते तस्मात् सन्धिरन्यो न विद्यते ॥ १७६ ॥

राजाह भवन्तो महापण्डिताः तदत्रास्माकं यथाकार्य्य

दिश्यताम् । दूरदर्शी ब्रूते आः किमुच्यते

आधिव्याधिपरीतापैरद्य श्वो वा विनाशिने ।

को हि नाम शरीराय धर्म्मापेतं समाचरेत् ॥ १७७

जलान्तश्चन्द्रचपलं जीवितं खलु देहिनाम् ।

तथाविधमिति ज्ञात्वा शश्वत् कल्याणमाचरेत् ॥१७

मृगतृष्णासमं वीक्ष्य संसारं क्षणभङ्गुरम् ।

सज्जनैः सङ्गतं कुर्य्यात् धर्म्माय च सुखाय च ॥१७

तन्मम सम्मतेन तदेव क्रियताम् ।

अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम् ।

अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते ॥ १८० ॥

हारात् द्रविणाद्युपढौकनपूर्व्वकात् उपहार नाम्नः सन्धेः ऋते विना

अपरः सन्धिः न विद्यते न सम्भाव्यते ॥ १७६ ॥

आधीति । आधिः मनस्तापः । व्याधिः गदः । परीतापः शोकः

आधिव्याधिपरीतापैः । अद्य वर्त्तमाने दिवसे श्वः कल्ये वा विनाशिने

शीलाय शरीराय कायस्य कृते । कः पण्डित इति यावत् । धर्म्मा

अधर्म्मं, कर्म्मेति शेषः । समाचरेत् कुर्य्यात् । न कोऽपीत्यर्थः ॥ १७७ ॥

जलेति । देहीनाम् जीवितम् प्राणाः जलान्तश्चन्द्रचपलम् जलान्तः

चन्द्रः शशिबिम्बः तद्वत् चपलम् अस्थिरम् । तत् जीवितं तथाविधम्

इति ज्ञात्वा विज्ञाय शश्वत् सदा "पुनः सदार्थयोः शश्वत्" इत्य

पुण्यकर्म्म आचरेत् कुर्य्यात् ॥ १७८ ॥

मृगेति । क्षणभङ्गुरम् क्षणात् निमेषात् भङ्गुरम् नश्वरं संसारम्

मृगतृष्णया मरीचिकया समं तुल्यं वीक्ष्य दृष्ट्वा धर्म्माय

मङ्गललाभाय च सज्जनैः साधुभिः सह सङ्ग

अश्वमेधानां वाजिमेधानां यज्ञानां

सत्याभिधानदिव्यपुरःसरं द्वयोरप्येतयोर्भूपालयोः काञ्च-
नाभिधानसन्धिर्विधीयताम्। सर्व्वज्ञो वदति एवमस्तु। ततो
...उपहारादिना स मन्त्री दूरदर्शी पूजितः प्रहृष्टमनाश्चक्रवाकं
गृहीत्वा मयूरस्य राज्ञः समीपं गतः। तत्र चित्रवर्णेन राज्ञा
सर्व्वज्ञो गृध्रवचनात् बहुमानदानपुरःसरं सम्भाषितः। तथा-
विधं सन्धिं स्वीकृत्य राजहंससमीपं प्रस्थापितः। दूरदर्शी
ब्रूते देव सिद्धं नः समीहितम्। इदानीं स्वस्थानमेव विन्ध्या-
चलं प्रतिगम्यताम्। अथ सर्व्वे स्वस्थानं प्राप्य मनोवाञ्छितफलं
प्राप्नुवन्ति। विष्णुशर्म्मणोक्तम् अपरं किं कथयामि तदुच्य-
ताम्। राजपुत्रा ऊचुः आर्य्य तव प्रसादात् सकलराज्यव्यव-
हाराङ्गं ज्ञातम्। ततः सुखिनो भूता वयम्। विष्णुशर्म्मोवाच
यद्यप्येवं तथापि अपरमपीदमस्तु। १८१।

सन्धिः सर्व्वमहीभुजां विजयिनामस्तु प्रमोदः सदा
सन्तः सन्तु निरापदः सुकृतिनां कीर्त्तिश्चिरं वर्द्धताम्।

[illegible] निश्चितं [illegible]। १८०।
[illegible] सत्याभिधानदिव्यपुरःसरम् [illegible]
[illegible] १८१।
[illegible]

नीतिर्वारविलासिनीव सततं वक्षःस्थले राजतां ...
वक्त्रं चुम्बतु मन्त्रिणामहरहो भूयान्महानुत्सवः ॥ १८२ ॥

इति हितोपदेशे सन्धिर्नाम चतुर्थः कथासंग्रहः
समाप्तः ।

वक्त्रम् मुखञ्च चुम्बतु । अहरहः नित्यं महान् उत्सवः प्रमोदानुष्ठानं भूयात्
भवतु । १८२ ।

इति हितोपदेशटीकायां श्रीपूर्णानन्दकृतायां सन्धिर्नाम
चतुर्थः कथासंग्रहः समाप्तः ।

विषाणोल्लिखितस्कन्धं कश्चिदेव गवाम्पतिम् ॥२१४॥

विष्णुशर्म्मणोक्तम्, स तावत् सत्त्वक्रीतानक्षयलोकान् विद्याधरी-
परिजनोऽनुभवतु महासत्त्वः । २१५ । तथा चोक्तम्

आहवेषु च ये शूराः स्वाम्यर्थे त्यक्तजीविताः ।
भर्त्तृभक्ताः कृतज्ञाश्च ते नराः स्वर्गगामिनः ॥ २१६ ॥

यत्र तत्र हतः शूरः शत्रुभिः परिवेष्टितः ।
अक्षयान् लभते लोकान् यदि क्लैव्यं न गच्छति ॥२१७॥

विग्रहः श्रुतो भवद्भिः । राजपुत्त्रैरुक्तम् श्रुत्वा सुखिनो भूता
वयम् । २१८ । विष्णुशर्म्माब्रवीत् अपरमप्येवमस्तु

विग्रहः करितुरङ्गपत्तिभिर्नो कदापि भवतां महीभृताम् ।

विषाणोल्लिखितः उत्कीर्णः स्कन्धः अंसो यस्य स तथाविधः तं, दोर्दण्डशोभित-
मित्यर्थः । गवाम्पतिम् वृषं कश्चिदेव धन्यमेव जनयतीति शेषः । शौर्य्यं लोके
सर्व्वथा विरलमिति तात्पर्य्यार्थः ॥ २१४ ॥

विष्णुशर्म्मणेति । सत्त्वक्रीतान् बलेन साहसिकतया जीवितेन वा क्रीतान्
उपार्ज्जितान् । अक्षयलोकान् शाश्वतपदानि । विद्याधरीपरिजनः विद्याधर्य्यः
स्वर्गस्थाः परिजनाः परिचारिकाः यस्य स तथाविधः । अनुभवतु आस्वादयतु ।
आशंसावचनमेतत् ॥ २१५ ॥

आहवेष्विति । ये शूराः वीराः नराः, स्वाम्यर्थम् नियोक्तुः कार्य्यसाध-
नाय आहवेषु रणेषु त्यक्तजीविताः दत्तप्राणाः । भर्त्तृभक्ताः प्रभावनुरक्ताः ।
कृतज्ञाः उपकारस्वीकर्त्तारः प्रत्युपकारकाः । ते स्वर्गगामिनः स्वर्गं देवलोकं
गामिनः गन्तारः । कथितलक्षणभिर्वेषां स्वर्गलाभो भवतीत्यर्थः ॥ २१६ ॥

यत्रेति । शूरः वीरः यत्र तत्र, पवित्रे अपवित्रे वा देशे इत्यर्थः ।
शत्रुभिः अरातिभिः परिवेष्टितः आक्रान्तः सन् हतः चेत्, अन्यथा शत्रुभि-
र्यदि चेत् क्लैव्यम् भीरुतां न गच्छति न प्राप्नोति तदा अक्षयान् शाश्वतानि
लोकान् पदानि लभते प्राप्नोति ॥ २१७ ॥

विग्रह इति । सुखिनः निरुद्वेगाः ॥ २१८ ॥

विग्रह इति । करितुरगपत्तिभिः गजाश्वपदातिभिः करणैः करीन्द्र
महीभृताम् राज्ञां विग्रहः कलिः नो भवताम् न भवतु । हितः इत्यर्थः । नीति

[illegible]च्यते । तन्मन्ये तस्य विचेष्टितमिदम् । राजा क्षणं विचि-
न्त्याह, अस्ति तावदेवं मम दुर्भाग्यमेतत् । ३ । तथाचोक्तम्

अपराधः स दैवस्य न पुनर्मन्त्रिणामयम् ।
कार्य्यं सुघटितं यत्नात् दैवयोगाद्विनश्यति ॥ ४ ॥

मन्त्री ब्रूते, उक्तमेवैतत्

विषमां हि दशां प्राप्य दैवं गर्हयते नरः ।
आत्मनः कर्मदोषांस्तु नैव जानात्यपण्डितः ॥ ५ ॥

अपरञ्च, सुहृदां हितकामानां यो वाक्यं नाभिनन्दति ।
स कूर्म्म इव दुर्बुद्धिः काष्ठाद्भ्रष्टो विनश्यति ॥६॥

राजाह, कथमेतत् । मन्त्री कथयति अस्ति मगधदेशे
फुल्लोत्पलाभिधानं सरः । तत्र चिरात् सङ्कटविकटनामानौ
हंसौ निवसतः । तयोर्मित्रं कम्बुग्रीवनामा कूर्म्मः प्रतिवसति ।

[illegible] ; [illegible] इति भावः । मन्त्री [illegible] । [illegible]
[illegible] । दुर्भाग्यम् दुर्दैवम् । अस्ति, [illegible] ॥ ३ ॥

कार्य्यमिति । यत्नात् [illegible] सुघटितम् [illegible] कार्य्यम्
[illegible] दैवयोगात् दैवं [illegible] । [illegible] । [illegible]
[illegible], दुर्भाग्य[illegible] । [illegible] । [illegible]
अपराधः दोषः स दैवस्य दुर्भाग्यस्य, न पुनः [illegible] ।
[illegible] इति तात्पर्य्यार्थः ॥ ४ ॥

विषमामिति । नरः [illegible] दशाम् अवस्थां । "[illegible]
[illegible]" इति [illegible] । प्राप्य [illegible], दैवं [illegible]
[illegible] । [illegible] । [illegible]
[illegible] आत्मनः [illegible] नैव जानाति [illegible] ॥ ५ ॥

सुहृदामिति । यः [illegible] हितकामानाम् [illegible] सुहृदाम् [illegible]
[illegible] वाक्यं न [illegible] न [illegible] । [illegible] ।
[illegible] दुर्बुद्धिः [illegible] कूर्म्म इव विनश्यति [illegible] ॥ ६ ॥

[illegible] । [illegible] । [illegible] ।
[illegible] । [illegible] । [illegible]

ादयो व्यापादयितव्याः। तद…
अतोऽयं धीवरालापः ८ अधुना…
हतुः, ज्ञायतां तावत् यथायदुचितं…
त्रम् यतो दृष्टव्यतिकरोऽहमत्र। ७…

अनागतविधाता च प्रत्युत्पन्नमति…
द्वावेतौ सुखमेधेते यद्भविष्यो विन…

ाहतुः, कथमेतत्। कूर्मः कथय…
सि एवंविधेष्वेव धीवरेषूपस्थितेषु…
ानागतविधाता नामैको मत्स्यस्तेनो…
यान्तरं गच्छामि, इत्युक्त्वा स ह्र…
त्युत्पन्नमतिनाम्ना मत्स्येनाभिहितम्…
ावात् कुत्र मया गन्तव्यम्। तदु…
ठेयम्। ८। तथा चोक्तम्

उत्पन्नामापदं यस्तु समाध…

जालकानां आलापः संवादः। अधुना…
नाम्। अत्र सरसि। दृष्टव्यतिकरः, दृष्ट…
येन स तथाविधः॥ ७॥

अनागतेति। अनागतम् भविष्यं वि…
विधाता। तथा प्रत्युत्पन्ना सद्द्वे आ…
प्रत्युत्पन्नमतिः। एतौ उक्तस्वभावौ द्वौ…
यद्भविष्यः भाग्यापेक्षी विनश्यति नायम…

ताविति। आलोचितम् परस्पर…
शेषः। अन्योऽजलाशयः तं जलाश…
…न. त् विनिगमनविरहात्, …
ते। यथाकार्यम् यथायोग्यम्। …
उत्पन्नामिति। यः जनः उ…

वणिजो भार्य्यया जारः प्रत्यक्षे निह्नुतो यथा ॥ १० ॥

यद्भविष्यः पृच्छति, कथमेतत्। प्रत्युत्पन्नमतिः कथयति अस्ति विक्रमपुरे समुद्रदत्तो नाम वणिक्। तस्य रत्नप्रभा नाम वधूः केनापि स्वसेवकेन समं सर्व्वदा रमते। ११। यतः

न स्त्रीणामप्रियः कश्चित् प्रियो वापि न विद्यते।
गावस्तृणमिवारण्ये प्रार्थयन्ते नवं नवम् ॥ १२ ॥

अथैकदा सा रत्नप्रभा तस्य सेवकस्य मुखे चुम्बनं ददती समुद्रदत्तेनालोकिता। ततः सा बन्धकी सत्वरं भर्त्तुः समीपमुपगत्याह, नाथ एतस्य सेवकस्य महती निर्वृतिः। यतो युष्मदर्थं चौर्य्यमानं कर्पूरमश्नाति। कर्पूरगन्धः प्रत्यक्षोऽस्य मुखे मया घ्रातः। १३। तथा चोक्तम्

आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥ १४ ॥

[illegible] प्रतिकरोति स बुद्धिमान्, तस्यैव बुद्धिः प्रशस्तेत्यर्थः। यथा वणिजः [illegible]नः भार्य्यया बन्धा जारः विटः प्रत्यक्षे वणिजोदृष्टिविषये एव निह्नुतः गोपितः ॥ १० ॥

यद्भविष्य इति। स्वसेवकेन निजपरिवारनियुक्तभृत्येन। समं सह। [illegible] रत्या क्रीडति ॥ ११ ॥

नेति। स्त्रीणाम् कामिनीनां, कश्चित् कश्चित् जनः प्रियः गुणवत्वात् [illegible]प्रियतः। अप्रिय गुणहीनत्वात् अनभिमतो वा नास्ति न वर्त्तते। अरण्ये [illegible] तृणमिव नवं नवं सततं नूतनमेव प्रार्थयन्ति काङ्क्षन्ति ॥ १२ ॥

अथेति। चुम्बनं ददती, चुम्बनकर्म्मणि प्रवृत्ता सती। अवलोकिता प्रत्यक्षं [illegible]। बन्धकी स्वैरिणी। निर्वृतिः सुखेच्छा। युष्मदर्थम् भवतः सेवनाय। अश्नाति भुङ्क्ते। प्रत्यक्षः सुव्यक्तः ॥ १३ ॥

आहार इति। स्त्रीणाम् कामिनीनां आहारः भोजनं द्विगुणः पुरुषाणामाहारस्य द्विगुणः परिमितः। स्मृत इति सर्वत्रान्वयः। तासां उक्तानां स्त्रीणां बुद्धिः प्रतिभा चतुर्गुणा। व्यवसायः [illegible] षड्गुणः। कामः [illegible] अष्टगुणः स्मृतः ज्ञातः ॥ १४ ॥

...त्र सेवकेन कथं स्था...
मुखं बिभर्ति। ततोऽसावुत्थाय चलित...
यत्नात् सम्बोध्य धृतः। अतोऽहं ब्रवीमि उत्पन्ना...

१५। ततो यद्भविष्येणोक्तम्
यदभावि न तद् भावि भावि चेन्न तदन्यथा...
इति चिन्ताविषघ्नोऽयमगदः किं न पीयते...

...तः प्रातर्जालेन बद्धः प्रत्युत्पन्नमतिर्मृतवद...
...तः। ततो जालादपसारितः स्थलादुत्प्लु...
...ष्टः। यद्भविष्यश्च धीवरैः प्राप्तो व्यापादि...
...ब्रवीमि अनागतविधातेत्यादि। तद्यथाऽहम...
...दद्य विधीयताम्।' हंसावाहतुः, जलाश...
कुशलं, स्थले गच्छतस्ते को विधिः। कूर्मो ब्रू...
सहाकाशवर्त्मना यामि स उपायो विधीय...
कथमुपायः सम्भवति। कच्छपो वदति...
काष्ठमेकं मया सुखेनावलम्बितव्यम्।...

तदिति। अपकृत्य कोपं प्रकटयित्वा। ...
उत्थाय चलितः, वणिक् गृहं त्यक्त्वा यातं प्रवृत्त...
क्षोभयित्वा। धृतः गमनान्निवारितः ॥ १५ ॥
यदिति। यत् अभावि अवश्यं न भवि...
भविष्यति। चेत् यदि भावि अवश्यं भवि...
इति इत्थम्भूतः चिन्ताविषघ्नः विषवद्यायसा...
किं कथं न पीयते न सेव्यते भवतीति शेषः।...
तत इति। अन्दर्शं कल्पयित्वा। धीरम...
...। गम्भीरं अतलस्पर्शम्। स्थले भूम्यां...
प्रविष्टे सतीति शेषः। यामि गन्त...
आकाशवर्त्मना वियन्मार्गेण। यामि गन्त...

ण सुखेन गन्तव्यम्। हंसौ ब्रूतः सम्भवत्येष उपायः।
म्।१७। किन्तु

उपायं चिन्तयन् प्राज्ञस्त्वपायमपि चिन्तयेत्।
पश्यतो बकमूर्खस्य नकुलैर्भक्षिताः सुताः॥१८॥

कूर्मः पृच्छति, कथमेतत्। हंसौ कथयतः अस्त्युत्तरापथे
कूटो नाम पर्व्वतः। तत्रैव रेवातीरे न्यग्रोधपादपे बका
न्ति। तस्य वटस्याधस्ताद्विवरे सर्पस्तिष्ठति। स च बकानां
पत्यानि खादति। ततः शोकार्त्तानां बकानां प्रलापं श्रुत्वा
चद्वृद्धबकेनोक्तम् भो एवं कुरुथ यूयम्। मत्स्यानानीय
विवराद्दारभ्य सर्पविवरं यावत् पङ्क्तिक्रमेण एकैकशो
न् विकीर्य्य धरिष्यथ। ततस्तदाहारलुब्धैर्नकुलैरा-
द्रष्टव्यः स्वभावद्वेषाद्व्यापादयितव्यश्च सर्पः। तथानुष्ठिते
तद्वृत्तम्। अथ नकुलैर्वृक्षोपरि पक्षिशावकानां रावः
ः। पश्चात् तेन नकुलेन बकशावकाः खादिताः। अत

म् स्वीक्रियताम्। [illegible] उच्यते। [illegible] [illegible]
तम्। [illegible] [illegible]। [illegible] [illegible]॥१७॥

उपायमिति। प्राज्ञः पण्डितः जनः उपायम् [illegible] चिन्तयन् [illegible]
[illegible] अपायम् अपि चिन्तयेत् [illegible]। तथाहि [illegible]
[illegible] [illegible] [illegible]। [illegible] सुता [illegible]
[illegible] भक्षिताः॥१८॥

कूर्म इति। उत्तरापथे उत्तरमार्गे [illegible]। न्यग्रोधपादपे वटवृक्षे।
[illegible] मूले। विवरे [illegible]। [illegible] [illegible]। [illegible]
[illegible]। [illegible] [illegible]। [illegible] [illegible]।
[illegible] यावत् सर्पविवरपर्य्यन्तं। पङ्क्तिक्रमेण [illegible]। [illegible]
[illegible]। [illegible] [illegible] [illegible] [illegible]।
[illegible] [illegible]। [illegible]। [illegible] [illegible] [illegible]।
[illegible] [illegible]। [illegible]। [illegible] [illegible] [illegible]।

आवां ब्रूवः उपायं चिन्तय
त्वां दृष्ट्वा लोकैः किञ्चिद्वक्त
ददासि तदा तव मरणं भ
ताम्। कूर्म्मो वदति, तत् कि
व्यम्। तत एवमनुष्ठिते स
लोकाः सर्व्वे गोरक्षकाः पश्चा
अयं पक्षिभ्यां कूर्म्मः समुह्य
पतति, तदात्रैव पक्त्वा खाद
नेतव्यः। तत् परुषवचनम
युष्माभिर्भस्म भक्षितव्यमिति
व्यापादितः। अतोऽहं ब्रवी
अथ प्रणिधिर्बकस्तत्रागत्यो
दुर्गशोधनं प्रतिक्षणं कर्त्त
अतस्तदनवधानस्य फलमि
नाम्ना वायसेन गृध्रप्रयुक्तेन

प्रणयादुपकाराद्वा
स सुप्त इव वृक्षाग्र

तदहं किंवदन्तिः कहं किं न जाने
भूतम्। पक्त्वा संस्कृत्य। निगद
द्रव्यवाक्यम्। विस्तृतसंस्कारः
णकैः। भस्म अङ्गारः। दुर्गशोध
परिणामः। गृध्रप्रयुक्तेन
प्रणयादिति। प्रणयात्
उभः प्रभुषु अरातिषु वि
१५०. पादयशिरसः पतित

अथ प्रणिधिर्बकाच, इतो दुर्गदाहं विधाय यदागतो मेघवर्णस्तदा चित्रवर्णेन प्रसादितेनोक्तम्, अयं मेघवर्णोऽत्र कर्पूरद्वीपराज्येऽभिषिच्यताम् । २१ । तथा चोक्तम्

कृतकृत्यस्य भृत्यस्य कृतं नैव प्रणाशयेत् ।
फलेन मनसा वाचा दृष्ट्या चैनं प्रहर्षयेत् ॥ २२ ॥

चक्रवाको ब्रूते, देव श्रुतं यत् प्रणिधिः कथयति । राजाह ततः । प्रणिधिर्बकाच, ततः प्रधानमन्त्रिणा गृध्रेणोक्तम् देव नेदमुचितम् । प्रसादान्तरं किमपि क्रियताम् ।२३। यतः

अधिकारेण यो युक्तः कथं तस्यास्ति खण्डनम् ।
नीचेषूपकृतं राजन् बालुकास्विव मुद्रितम् ॥ २४ ॥

महतामास्पदे नीचः कदापि न कर्त्तव्यः । २५ । तथा चोक्तम्

नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुमिच्छति ।
मूषिको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा ॥२६॥

अथेति । आगतः चित्रवर्णसमीपमुपस्थितः । प्रसादितेन तत्कर्मणा तोषितेन । अभिषिच्यताम् राजा क्रियताम् ॥ २१ ॥

कृतेति । कृतकृत्यस्य साधितनियोगस्य भृत्यस्य कृतं कर्म न विनाशयेत्, अपुरस्कारेण विफलं न कुर्यात् । फलेन समुचितपुरस्कारेण । मनसा स्नेहेन । वाचा मधुरभाषितेन । दृष्ट्या प्रसन्नावलोकितेन । एनम् इमम् भृत्यं प्रहर्षयेत् सन्तोषयेत् ॥ २२ ॥

चक्रवाक इति । प्रसादान्तरम् कर्पूरद्वीपराज्येऽभिषेकभिन्नम् ॥ २३ ॥

अधिकारेणेति । यः अधिकारे यावत्कर्मणि युक्तः नियुक्तः तस्य खण्डनम् तिरस्कृतिः कथं अस्ति सम्भाव्यते । राजन् अथ नीचेषु क्षुद्रेषु उपकृतम् उपकारः बालुकासु सिकतासु मुद्रितम् मुद्राचिह्नमिव क्षणं न तिष्ठतीति भावः ॥ २४ ॥

महतामिति । महताम् उदारचित्तानां आस्पदे अधिकारे । न कर्त्तव्यः न स्थापयितुमुचितः । ॥ २५ ॥

नीच इति । नीचः क्षुद्रः श्लाघ्यपदम् उच्चास्पदम् प्राप्य स्वामिनम् अभियोक्तारं लोप्तुम् नाशयितुं इच्छति यतते । यथा मूषिकः व्याघ्रतां

गौतमारण्ये महातपा नाम मुनि
कश्चाबकः काकमुखात् भ्रष्टो दृष्टः। तत
मुनिना गोधारकणैः संवर्द्धितः। तं च
भावन् बिडालो मुनिना दृष्टः। पश्चात
मुनिना मूषिको बलिष्ठो बिडालः कृतः।
बिभेति। ततोऽसौ कुक्कुरः कृतः। कुक्कुर
तदनन्तरं स व्याघ्रः कृतः। अथ व्याघ्र
येषं पश्यति मुनिः। अतः सर्वे तत्रस्था
वदन्ति अनेन मुनिना मूषिकोऽयं व्याघ्र
स व्याघ्रः सव्यथोऽचिन्तयत् यावदने
तावदिदं मम स्वरूपाख्यानमकीर्त्तिकर
समालोच्य मुनिं हन्तुं समुद्यतः। मु
पुनर्मूषिको भव इत्युक्त्वा मूषिक एव
नीचः श्लाघ्यपदं प्राप्येत्यादि। अपरं
मन्तव्यम्। २७। शृणु

द्वीपिभावं प्राप्य लब्धा मुनिम् तपस्विनं
युक्तः ॥ २६ ॥

चित्रवर्ण इति। दयायुक्तेन अप
चूर्णदानेन। संवर्द्धितः वृद्धिं गमितः।
प्रभावात् योगबलेन। बिभेति व्याघ्र
रूपेण परिणतमपि। मूषिकनिर्विशेषम्
प्रापितः। सव्यथः पश्चाद्'अ
कीर्त्तिकरम् अख्यातिसाधनं। न
। ज्ञात्वा मनसि बुद्ध्वा
मन्तव्यम् न बोद्धव्यम् ॥ २७ ॥

भक्षयित्वा बहून् मत्स्यानुत्तमाधममध्यमान्।

अतिलौल्याद्बको मूर्खः मृतः कर्कटसंग्रहात् ॥ २८ ॥

चित्रवर्णः पृच्छति, कथमेतत्। मन्त्री कथयति अस्ति मालवविषये पद्मगर्भाभिधानं सरः। तत्रैको वृद्धबकः सामर्थ्यहीनस्तथोद्विग्नमिवात्मानं दर्शयित्वा स्थितः। स च केनचित् कुलीरेण दूरादेव दृष्टः किमिति भवानत्राहारपरित्यागेन तिष्ठति। बकेनोक्तम् मत्स्या मम जीवनहेतवः। मत्स्याश्चावश्यमेव कैवर्त्तैर्व्यापादयितव्या इति नगरोपान्ते कैवर्त्तालापः मयाकर्णितः। तदितो वर्त्तनाभावादस्मन्मरणमुपस्थितमिति ज्ञात्वा आहारस्यापि निरादरः कृतः। ततः सर्व्वैर्मत्स्यैरालोचितम् इह समये तावदुपकारक एवायमुपलक्ष्यतेऽस्माकम्। तदयमेव यथाकर्त्तव्यं पृच्छ्यताम्। २९। तथा चोक्तम्

उपकर्त्राऽरिणा सन्धिर्न मित्रेणापकारिणा।

उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥ ३० ॥

भक्षयित्वेति। [illegible] उत्तमाः [illegible] रोहिताद्याः। [illegible] मध्यमाः [illegible]। तान् उत्तमाधममध्यमान्। बहून् अनेकान् मत्स्यान् भक्षयित्वा। अतिलौल्यात् [illegible] कर्कटसंग्रहात् कुलीरं गृहीत्वा। [illegible] ॥ २८ ॥

चित्रवर्ण इति। मालवविषये मालवदेशे। सामर्थ्यहीनः [illegible]। [illegible]। उद्विग्नम् [illegible]। दूरादेव [illegible]। [illegible]। कैवर्त्ताः [illegible]। वर्त्तनाभावात् [illegible] [illegible] निरादरः [illegible]। यथाकर्त्तव्यम् [illegible] ॥ २९ ॥

उपकर्त्रेति। [illegible] अरिणा। [illegible]। [illegible] [illegible]। [illegible] उपकारापकारौ [illegible] [illegible] ॥ ३० ॥

मत्स्या ऊचुः. भो वक श्र

ब्रूते, अस्ति रक्षणहेतुर्जलाश

युष्मान् नयामि। मत्स्यैरपि भ

वकस्तान् मत्स्यानेकैकान् नीत्वा

गत्य वदति ते मया जलाशय

कुलीरस्तमुवाच भो वक मामपि

र्कुलीरमांसार्थी सादरं तं नी

मत्स्यकण्टकाकीर्णां भूमिं दृष्ट्वा

भाग्यः। भवतु इदानीं समयोचि

तावद्भयात् तु भेतव्यं या

आगतन्तु भयं दृष्ट्वा प्रहर

अपरञ्च, अभियुक्तो यदा पश्ये

युध्यमानस्तदा प्राज्ञो

मत्स्या इति। जलाशयान्तरम् अन्य

पायः अस्ति वर्त्तते, जलाशयान्तरं प्रा

जलाशयान्तरे। नयामि प्रापयामि।

वकः क्रौञ्चः। देशे स्थले। स्थापिताः

दभुक्तपूर्व्वकर्कटमांसलोलुपः सन्। सा

यामास। मत्स्यकण्टकाकीर्णाम् मत्स्या

परिव्याप्तां। व्यवहरामि करोमि॥ २१

तावदिति। तावत् तस्यागमपर्य्यन्तं

यावत् भयम् अनागतम् अनुपस्थितम्

वीक्ष्य अभीतवत् निःशङ्क इव प्रहर्त्तव्यम्

अभियुक्त इति। प्राज्ञः पण्डित

यदा आत्मनः किञ्चित् हितम् मङ्गलं

शत्रुणा सह युध्यमानः युद्धं कुर्व्वाणः

अपराङ्मुखाविति शौर्य्यमवलम्ब्य स्वयं वि

आलोच्य स कुलीरस्तस्य बकस्य ग्रीवां चिच्छेद। स बकः
पञ्चत्वं गतः। अतोऽहं ब्रवीमि भक्षयित्वा बहून् मत्स्या-
दीत्यादि। ततः पुनरपि राजा स चित्रवर्णोऽब्रवीत्, शृणु
भो अमात्य मन्त्रिन्। मयैतदालोचितं यदत्रावस्थितेनानेन मेघ-
वर्णेन राज्ञा यावन्ति कर्पूरद्वीपस्योत्तमवस्तूनि तावन्त्यस्माक-
मानेतव्यानि। तेन महता विलासेनास्माभिर्विन्ध्याचले स्था-
तव्यम्। २४। दूरदर्शी विहस्याह, देव

अनागतवतीं चिन्तां कृत्वा यस्तु प्रहृष्यति।
स तिरस्कारमाप्नोति भग्नभाण्डो द्विजो यथा ॥२५॥

राजाह, कथमेतत्। दूरदर्शी कथयति अस्ति देवकोट्ट-
नगरे देवशर्मा नाम ब्राह्मणः। तेन विषुवसंक्रान्तौ सक्तु-
पूर्णशरावः प्राप्तः। ततस्तमादायासौ भाण्डपूर्णकुम्भकार-
मण्डपिकायां रौद्रेणाकुलितः सुप्तः। ततः सक्तुरक्षार्थं हस्ते
दण्डमादायाचिन्तयत् यद्यहमिदं सक्तुशरावं विक्रीय दश
कपर्दकान् प्राप्नोमि, तदा तैरिह समये कपर्दकैर्घटशरावादि
उपक्रीय अनेकधा वृद्धैस्तैर्धनैः पुनः पुनः पूगवस्त्रादिकमुप-

इतीति। ग्रीवाम् कण्ठं चिच्छेद चकर्त। पञ्चत्वम् पञ्चीभावं, मरणमिति
यावत्। गतः प्राप्तः। आलोचितम् मनसि कल्पितम्। राज्ञा भूपतिना
मेघवर्णेन। उत्तमवस्तूनि प्रकृष्टधनानि "वस्तु रत्ने धने मतम्" इत्यमरः।
आनेतव्यानि उपहर्तव्यानि। तेन धनकदम्बकेन। विलासेन सुखभोगेन।
स्थातव्यम् जीवितव्यम् ॥ २४ ॥

अनागतेति। यस्तु जनः अनागतवतीम् भविष्यां चिन्ताम् कल्पना
कृत्वा प्रहृष्यति हृष्यति स तिरस्कारमाप्नोति च भग्नभाण्डः भग्नं त्रुटितं भाण्डं धनकदम्बः
यस्य स तथाविधः द्विजः ब्राह्मण इव यथा तिरस्कारम् निन्दां आप्नोति अधि-
गच्छति ॥ २५ ॥

राजेति। विषुवसंक्रान्तौ चैत्रसंक्रान्त्यां। सक्तुपूर्णशरावः भर्जितयवचूर्ण-
पूर्णमृत्पात्रं। प्राप्तः प्रतिग्रहेण लब्धः। आदाय गृहीत्वा। भाण्डपूर्ण-

क्रीय विक्रीय वाणिज्यं कृत्वा ल

चतुष्टयं करोमि। ततस्तासु पत्नी

कानुरागं करोमि। तदनन्तरं

ऽन्यं यदा द्वन्द्वं करिष्यन्ति तद

लगुडेन ताडयिष्यामि। इत्यभि

मरायचूर्णितो भाण्डानि च भग

दागत्य कुम्भकारेण गले धृतो

अतोऽहं ब्रवीमि, अनागतव

राजा रहसि उष्ट्रं मन्त्रिणं प

दिश। २६। उष्ट्रो वदति

मदोद्धतस्य नृपतेः प्रक

यान्त्युन्मार्गतया तस्य

शृणु तावद्देव, किमस्माभिर्वि

कुम्भकारमण्डपिकायाम् भाण्डैः स्व

मण्डपिकायां विश्रामस्थाने। रौद्रेण

शेते स्म। उपक्रीय पुनः क्रीत्वा।

पूगवस्त्रादिकम् पूगाः गुवाकाः वस्त्रा

ज्यम् पण्यद्रव्यं। विवाहचतुष्टयम् व

करोमि बध्नामि। सञ्जातेर्षाः सपत्नी

परस्परं। द्वन्द्वम् कलहं। क्रोधाकुल

भाण्डानि कुम्भकारगृहे सम्भृतानि

मानभाण्डानां शब्दं श्रुत्वा। रहसि

मदेति। प्रकोपस्य मदोत्कट

भिस्य राज्ञः नृपतेश्च नेतारः

नश्च भद्र स्थानां। उन्मार्ग

यान्ति प्राप्नुवन्ति॥ २७॥

शृण्विति। अस्माभिः कर्त्तुं

प्रतापाधिष्ठितेनोपायेन। राजाह, भवतामुपायेन। गृध्रो ब्रूते यद्यस्मद्वचनं क्रियते तदा स्वदेशे गम्यताम्। अन्यथासन्ने वर्षाकाले तुल्यबलेन सह पुनर्विग्रहे सत्यस्माकं परभूमिष्ठानां स्वदेशगमनमपि दुर्लभं भविष्यति। सुखशोभार्थं सन्धाय गम्यताम्। दुर्गं भग्नं कीर्त्तिश्च लब्धैव। मम सम्मतं तावदेतत्।३८।

यतः, यो हि धर्मं पुरस्कृत्य हित्वा भर्त्तुः प्रियाप्रियम्।
अप्रियाण्याह पथ्यानि तेन राजा सहायवान्॥३९॥

अपरञ्च, सन्धिमिच्छेत् समेनापि सन्दिग्धो विजयो युधि।
न हि संशयितं कुर्य्यात् इत्युवाच बृहस्पतिः॥४०॥

नान्। नो वा उत भवतः तव प्रतापाधिष्ठितेन पौरुषान्वितेन उपायेन साधनेन। यद्यस्मद्वचनं क्रियते, यदि अस्मदुपदेशानुसारेण कार्य्यमुचितं भवति। स्वदेशे अस्माकं निजे देशे कर्पूरद्वीपे। अन्यथा न गते। आसन्ने प्रत्यासन्ने। तुल्यबलेन प्रतिद्वन्द्विना विपक्षे समरे प्रवृत्ते सति। परभूमिष्ठानां परस्य शत्रोः भूमौ राष्ट्रमध्ये स्थानाम् वसतां। दुर्लभम् दुष्करं। सुखशोभार्थं सुखं निरुद्वेगः शोभा गौरवं तयोरर्थं सन्धाय हिरण्यगर्भेण सह सन्धिं कृत्वा गम्यतां, सन्धिं संस्थाप्य स्वदेशं गत्वा वीतोत्कण्ठः सन् सुखी भव, स्वभूतं रिपुस्वाम्यं दत्वा निजचित्तौदार्य्यं च प्रदर्शयेति भावः। दुर्गं भग्नम् नाशितं। कीर्त्तिः यशश्च लब्धा उपार्ज्जितं, अतोऽस्माकं अत्र प्रयोजनाऽभिष्टं नास्तीति तात्पर्य्यार्थः॥ ३८॥

य इति। यः नियुक्तानां यो जनः भर्त्तुः स्वामिनः प्रियाप्रियम् इष्टानिष्टं हित्वा परित्यज्य, अनादृत्येति यावत्। धर्मम् कर्त्तव्यरूपं पुरस्कृत्य अग्रे कृत्वा, तस्मिन्नेव मतिं बद्ध्वेत्यर्थः। अप्रियाणि भर्त्तुरनभिमतान्यपि पथ्यानि हितानि आह उपदिशति राजा प्रभुः तेन तथाविधेन नियुक्तेन सहायवान् सहयोगिसम्पन्नः। अन्यथा ससहायोऽपि च सर्व्वथा निःसहाय एवेत्यर्थः॥ ३९॥

सन्धिमिति। समेन तुल्यबलेनापि रिपुणेति शेषः। बल अदमन्याऽस्मात्कः अपीति भावः। सन्धिं इच्छेत् सन्धानं कुर्वीत। तत्र हेतुं निर्दिशति; युधि युद्धे विजयः जयलाभः सन्दिग्धः अनिश्चितः। संशयितम् अनिश्चितं न कुर्य्यात् नाचरेत् बृहस्पतिः नीतिशास्त्रवेत्ता सुरगुरुः। इति इत्थं उवाच उपदिदेश॥ ४०॥

अन्यच्च, सुहृद्बलं तथा राज्यं

युधि सन्देहदोलस्थं

परन्तु, युद्धे विनाशो भवति

सुन्दोपसुन्दावन्योऽन्

राजोवाच, कथमेतत्

महोदरौ सुन्दोपसुन्दनाम

राज्यकामनया चिरामन्द्र

भगवान् परितुष्टः सन् वरं

समधिष्ठितया सरस्वत्या ता

तयोर्भगवान् परितुष्टश्चे

ददातु । अथ भगवता क्रुद्धे

पार्वती प्रदत्ता । ततस्त

ोत्सुकाभ्यां पापतिमिराभ्यां ममेत्यन्योऽन्यकलहाभ्यां प्रमा-
ापः कश्चित् पृच्छ्यतामिति मतौ कृतायां स एव भट्टारको
द्विजरूपो समागत्य तत्रोपस्थितः। अनन्तम् आवाभ्यामियं
लभ्या कस्येयमावयोर्भवति, ब्राह्मणमपृच्छताम्। ४३।
णो ब्रूते

ज्ञानश्रेष्ठो द्विजः पूज्यः क्षत्रियो बलवानपि।

धनधान्याधिको वैश्यः शूद्रस्तु द्विजसेवया ॥ ४४ ॥

। क्षत्रियधर्म्माणौ युवां एव युवयोर्नियमः। इत्यभिहिते
साधूक्तमनेनेति कृत्वा अन्योऽन्यतुल्यवीर्य्यौ समकालेऽन्योन्य-
विनाशमुपगतौ। अतोऽहं ब्रवीमि सन्धिमिच्छेत् समे-
त्यादि। राजाह तत् किं प्रागेव नेदमुपदिष्टम्। मन्त्री
तदा किं मम वचनमवसानपर्य्यन्तं श्रुतं भवद्भिः। तदापि

[illegible]स्थापद्धतया घोरतस्य परस्य [illegible]। मूढतया कोपविदर्थस-
[illegible]। जगद्धानिभ्याम् [illegible]। [illegible]
[illegible]। पापतिमिराभ्याम् पाप एव तिमिर नेत्ररोगो ययोः
, पापस्वभावात् [illegible]। अन्योन्य[illegible]
परस्परं कलहः [illegible] ययोः ताभ्यां। [illegible]
[illegible] कृतायाम् [illegible]। स [illegible]
[illegible]। [illegible]
[illegible] ॥ ४३ ॥

[illegible]

[illegible]

सम सम्मत्या नायं विग्रहारम्भः । यतः सन्धेयगुणयुक्तोऽयं हिर[illegible]
ण्यगर्भो न विग्राह्यः ॥ ४५ ॥ तथाचोक्तम् ।

सत्यार्य्यौ धार्म्मिकोऽनार्य्यो भ्रातृसङ्घातवान् बली ।
अनेकयुद्धविजयी सन्धेयाः सप्त कीर्त्तिताः ॥ ४६ ॥
सत्योऽनुपालयन् सत्यं सन्धितो नैति विक्रियाम् ।
प्राणबाधेऽपि सुव्यक्तमार्य्यो नायात्यनार्य्यताम् ॥ ४७ ॥
धार्मिकस्याभियुक्तस्य सर्व्व एव हि युध्यते ।
प्रजानुरागाद्धर्म्माच्च दुःखच्छेद्यो हि धार्म्मिकः ॥ ४८ ॥

घातेन परस्परं निहत्य । प्रागेव युद्धप्रवृत्तेः पूर्व्वमेव । अवसानपर्य्यन्तं [illegible] प्राप्ति । श्रुतम् तत्र किं कर्त्तौ दक्षः । सन्धेयगुणयुक्तः सन्धिसंस्थापनयो[illegible] गुणयाली । न विग्राह्यः विग्रहेण नाभियोक्तव्यः ॥ ४५ ॥

सत्येति । सत्यः सत्यनिष्ठः । आर्य्यः सज्जनः । धार्म्मिकः धर्म्मादनपेत[illegible] अनार्य्यः दुर्जनः । भ्रातृसंघातवान् भ्रातृणां सोदराणां संघातः [illegible] सोऽस्यास्तीति तथाविधः । बली [illegible] अनेकयुद्धविजयी बहुयुद्धेषु लब्धजयः । एते सप्त सन्धेयाः सन्धियो[illegible] कीर्त्तिताः उक्ताः नीतिज्ञैरिति शेषः ॥ ४६ ॥

[illegible] सत्य इत्यादिना । सत्यम् अनुपालयन् [illegible] [illegible] इति यावत् । सत्यः सत्यनिरतो जनः । [illegible] सन्धितः [illegible] । [illegible] इति शेषः । विक्रियाम् [illegible] सन्धिना सह [illegible] । [illegible] न एति नाधिगच्छति । प्राणबाधेऽपि [illegible] [illegible] । आर्य्यः सज्जनः [illegible] अनार्य्यताम् [illegible] [illegible] ॥ ४७ ॥

धार्म्मिकेति । अभियुक्तस्य [illegible] धार्म्मिकस्य [illegible] [illegible] इति यावत् । [illegible] [illegible] प्रजानां प्रकृतीनां अनुरागः [illegible] [illegible] धर्म्मात् पुण्यादीप्रसादात् धार्म्मिकः [illegible] दुःखच्छेद्यः [illegible] ॥ ४८ ॥

सन्धिः कार्य्योऽप्यनार्य्येण विनाशे समुपस्थिते ।
विना तस्याश्रयेणार्य्यः कुर्य्यान्न कालयापनम् ॥ ४९ ॥
संहतत्वाद्यथा वेणुर्निविडः कण्टकैर्वृतः ।
नशक्यते समुच्छेत्तुं भ्रातृसङ्घातवांस्तथा ॥ ५० ॥
बलिना सह योद्धव्यमिति नास्ति निदर्शनम् ।
प्रतिवातं न हि घनः कदाचिदुपसर्पति ॥ ५१ ॥
जमदग्नेः सुतस्येव सर्व्वः सर्व्वत्र सर्व्वदा ।
अनेकयुद्धजयिनः प्रतापादेव भुज्यते ॥ ५२ ॥
अनेकयुद्धविजयी सन्धानं यस्य गच्छति ।

सन्धिरिति । विनाशे सर्व्वनाशे समुपस्थिते आपतिते सति अनार्य्येण नीचेनापि सह सन्धिः कार्य्यः विधेयः । तत्र हेतुः, तस्य अनार्य्यस्य आश्रयसम्बन्धेन विना, तस्यानुकूल्यमप्राप्येति यावत् । आर्य्यः कालयापनम् कालातिपातं न कुर्य्यात् चिरं न जीवेत् ॥ ४९ ॥

संहतेति । यथा वेणुः वंशः संहतत्वात् परस्पर सन्निबद्धत्वात् निविडः घनीभूतः तथा कण्टकैः वृतः बहुकण्टकाकीर्णश्च सन् समुच्छेत्तुं कर्त्तितुं न शक्यते । भ्रातृसंघातवान् भ्रातृषु अन्योन्यं योधान्वित तथैकभावः समुच्छेत्तुं न शक्यत इति भावः ॥ ५० ॥

बलिनेति । बलिना बलवत्तरेण सह योद्धव्यम् युद्धं कर्त्तव्यं इति अस्य निदर्शनम् दृष्टान्तः नास्ति । तथाहि घनः मेघः कदाचित् प्रतिवातम् वायोरभिमुखं न उपसर्पति न चलति ॥ ५१ ॥

जमदग्नेरिति । जमदग्नेः सुतस्य त्रिःसप्तवारं कृतनिःक्षत्रियस्य भगवतः परशुरामस्येव अनेकयुद्धजयिनः बहुयुद्धेषूपार्ज्जितविजयस्य प्रतापात् पौरुषात् सर्व्वः सकलमपि सर्व्वत्र सर्व्वस्मिन् देशे सर्व्वदा सर्व्वस्मिन् काले च भुज्यते भोग्यविषयाणि सम्पद्यन्ते ॥ ५२ ॥

अनेकेति । अनेकयुद्धविजयी बहुयुद्धजेता यस्य सन्धानं सन्धिमिच्छति तेन सह भेदः शत्रुर्भवति । तस्य प्रभावेण विजिताः शत्रवः तस्य अनेकयुद्धविजयिनः प्रतापेन शीघ्रमेव वशं गच्छन्ति ॥ ५३ ॥

तत्प्रतापेन तस्याशु वशमायान्ति शत्रवः ॥ ५३ ॥

तद्देव षड्भिर्गुणैरुपेतः सन्धेयोऽयं राजहंसः। चक्रवाको-ऽवदत् प्रणिधे सर्वमवगतम्। व्रज पुनरागमिष्यसि। अथ हि-रण्यगर्भश्चक्रवाकं पृष्टवान्, मन्त्रिन् असन्धेयाः कति। तानहं ज्ञातुमिच्छामि। ५४। मन्त्री ब्रूते देव कथयामि शृणु

बालो वृद्धो दीर्घरोगी तथा ज्ञातिबहिष्कृतः।
भीरुको भीरुकजनो लुब्धो लुब्धजनस्तथा ॥ ५५ ॥
विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिमान्।
अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः ॥ ५६ ॥
दैवोपहतकश्चैव दैवचिन्तक एव च।
दुर्भिक्षव्यसनोपेतो बलव्यसनसङ्कुलः ॥ ५७ ॥

तदिति। तत् अतः षड्भिः अशेषैः गुणैः सन्धेयैः गुणैः उपेतः समन्वितः। अवगतम् विदितं। व्रज साम्प्रतं गच्छ। असन्धेयाः सन्धेयोग्याः कति कियत्संख्यकाः ॥ ५४ ॥

असन्धेयान् समुद्दिशति बाल इत्यादिना चतुर्भिः। बालः शिशुः वृद्धः स्थविरः। दीर्घरोगी चिरातुरः। ज्ञातिबहिष्कृतः ज्ञातिभिः कुटुम्बैः बहिष्कृतः परित्यक्तः। भीरुकः स्वयं भीरुस्वभावः। भीरुकजनः भीरुः भीतः जनः साधनजनो यस्य स तथाविधः। लुब्धः धनतृष्णः। लुब्धजनः लुब्धः धनेषु लोलुपः जनः साधनजनो यस्य स तथाविधः। विरक्तप्रकृतिः विरक्ता अभक्ता प्रकृतिः प्रजा यस्य स तथाभूतः। विषयेषु स्रक्चन्दनादिभोग्यवस्तुषु अत्यासक्तिमान् अतिनिरतः। अनेकचित्तमन्त्रः अनेकचित्तेषु बहुजनमनःसु मन्त्रः मन्त्रणा यस्य स तथाविधः, बहुजनश्रावितमन्त्र इत्यर्थः। देवब्राह्मणनिन्दकः देवानां ब्राह्मणानाञ्च निन्दकः कुत्साकारी। दैवोपहतकः दैवदुर्विपाकः। तत आगत इत्यर्थः। तेन उपहतः विघ्नितः। दैवचिन्तकः दैवं भाग्यं चिन्तयति परामृशति तदपेक्षयैव प्रवर्त्तत इत्यर्थः सः स तथाविधः। दुर्भिक्षव्यसनोपेतः दुर्भिक्षं भक्ष्याभावः तदेव व्यसनं दुःखं उपेतः समन्वितः। बलव्यसनसंकुलः बलानां सैन्यानां व्यसनं भयः तेन संकुलः विदूरीकृतः। अदेशस्थः भिन्नराष्ट्रकृतावासः। बहुरिपुः बहवः अनेके

…देशस्थो बहुरिपुर्युक्तः कालेन यश्च न ।
…त्यधर्मव्यपेतश्च विंशतिः पुरुषा अमी ॥ ५८ ॥
…तैः सन्धिं न कुर्वीत विगृह्णीयात् तु केवलम् ।
…ते विगृह्यमाणा हि क्षिप्रं यान्ति रिपोर्वशम् ॥ ५९ ॥
…लस्याल्पप्रभावत्वान्न लोको योद्धुमिच्छति ।
…द्धाद्युद्धफलं यस्मात् ज्ञातुं शक्तो न बालिशः ॥ ६० ॥
…त्साहशक्तिहीनत्वाद् वृद्धो दीर्घामयस्तथा ।
…वैव परिभूयेते ह्यावप्येतावसंशयम् ॥ ६१ ॥
…खोच्छेद्यश्च भवति सर्व्वज्ञातिबहिष्कृतः ।

…यश्च तथाविधः । कालः युद्धोचितः समयः शरदादिः तेन तदनुसारेण …ः युद्धे न प्रवृत्तः । कर्त्तरि क्तः । सत्यधर्मव्यपेतः सत्यः सत्यरूपो धर्मः …व्यपेतः परिच्युतः । अमी इमे विंशतिः द्विदशसंख्यकाः पुरुषाः अस- …इति पूर्व्वं राजकृतमन्त्रेणान्वयः ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥
एतैरिति । एतैः कथितैः पुरुषैः सह सन्धिम् मैत्रीं न कुर्वीत न …येत् । तु किन्तु केवलम् विगृह्णीयात् युध्येत् । हि यतः एते विगृह्य- …ः युध्यमानाः सन्तः क्षिप्रम् आशु रिपोः विद्विषः वशम् आयत्ततां यान्ति …न्ति ॥ ५९ ॥
तेष्वेकैकशः हेतुं निर्दिशति बालेति । बालस्य शिशोः अल्पप्रभावत्वात् …तापबलत्वात् "स प्रभावः प्रतापश्च यत् तेजः कोषदण्डजम्" इत्यमरः । …ः जनः योद्धुम् तमभियोक्तुं न इच्छति न चेष्टते । यस्मात् यतः बालिशः …त्वात् अपरिपक्वबुद्धिः युद्धायुद्धफलम् युद्धस्य करणे अकरणे वा यत् फलम् …ामः तं ज्ञातुं बोद्धुं न शक्तः समर्थो न भवति ॥ ६० ॥
…त्साहेति । उत्साहशक्तिः उद्योगजातरूपा राज्ञां शक्तिः । तथाह्यमरः …यस्त्रिशक्तयः प्रभावोत्साहमन्त्रजाः" इति । तया हीनत्वात् अभावतः …हतत्वात् । वृद्धः स्थविरः । तथा दीर्घामयः चिररोगी च एतौ द्वौ उभा- …वौ निजैः परिवारैरेव असंशयम् निश्चितं परिभूयेते तिरस्क्रियेते ॥ ६१ ॥
…सुखोच्छेद्य इति । सर्व्वज्ञातिबहिष्कृतः सर्व्वैः ज्ञातिभिः सगोत्रैः बहिष्कृतः …त्यक्तः सुखोच्छेद्यः सुखेन अनायासेन उच्छेद्यः विनाश्यः भवति । ज्ञात-

त एवेनं विनिघ्नन्ति घातयन्त्यात्मसात्कृताः ॥ ६२ ॥

भीरुर्युद्धपरित्यागात् स्वयमेव प्रणश्यति ।
तथैव भीरुकजनः संग्रामे तैर्विमुच्यते ॥ ६३ ॥

लुब्धस्यासंविभागित्वान्न युध्यन्तेऽनुजीविनः ।
लुब्धानुजीविकैरेष दानहीनैर्निहन्यते ॥ ६४ ॥

सन्त्यज्यते प्रकृतिभिर्विरक्तप्रकृतिर्युधि ।
सुखाभियोज्यो भवति विषयेष्वतिसक्तिमान् ॥ ६५ ॥

अनेकचित्तमन्त्रस्तु द्वेष्यो भवति मन्त्रिणाम् ।
अनवस्थितचित्तत्वात् कार्य्ये तैः स उपेक्ष्यते ॥ ६६ ॥

सात्कृताः यत्नोः स्वपक्षमानीताः ते घातय एव एनम् वहिष्कृतं विनिघ्नन्ति [illegible] नाशयन्ति ॥ ६२ ॥

भीरुरिति । भीरुः भयशीलः । युद्धपरित्यागात्, रणभूमेः पलायिते- त्वर्थः । स्वयम् स्वतः एव प्रणश्यति ध्वंसो भवति । तथैव एवं भीरुजनकः [illegible] भीरुजनसहायः संग्रामे रणस्थले तैः सहायजनैः कर्तृभिः विमुच्यते त्यज्यते ॥ ६३ ॥

लुब्धस्येति । असंविभागित्वात् विभज्य अदातृतया । अनुजीविनः नियुक्ता [illegible] लुब्धस्य धनलुब्धस्य सम्बन्धे, तत्पक्षे भूत्वेति यावत् । न युध्यन्ते रणं न कुर्वन्ति [illegible] दानहीनैः दानं पुरस्कारः तेन हीनैः वर्जितैः लुब्धानुजीविकैः लुब्धैः [illegible] लोलुपैः अनुजीविकैः नियुक्तैः एषः लुब्धः निहन्यते निपात्यते ॥ ६४ ॥

सन्त्यज्यत इति । विरक्तप्रकृतिः विरक्ता अभक्ता प्रकृतिः प्रजा यस्य [illegible] स तथाभूतः । युधि समरे प्रकृतिभिः प्रजाभिः सन्त्यज्यते विमुच्यते । विषयेषु [illegible] भोग्यवस्तुषु अतिसक्तिमान् अत्यासक्तः सुखाभियोज्यः सुखं अनायासं [illegible] अभियोज्य योद्धव्यः भवति ॥ ६५ ॥

अनेकेति । अनेकचित्तमन्त्रः अनेकानां चित्तेषु स्थापितमन्त्रः [illegible] अमात्यानां द्वेष्यः द्वेषविषयः भवति सञ्जायते । अनवस्थितचित्त[illegible] कर्त्तव्येषु अस्थिरं चित्तं मनो यस्य स तथाविधः तस्य भावः [illegible] कार्य्याणि तैः मन्त्रिभिः एषः अनेकचित्तमन्त्रः उपेक्ष्यते अनादरेण [illegible] ॥ ६६ ॥

सदा धर्म्मबलीयस्त्वाद्देवब्राह्मणनिन्दकः ।
विशीर्य्यते स्वयं ह्येव दैवोपहतकस्तथा ॥ ६७ ॥

सम्पत्तेश्च विपत्तेश्च दैवमेव हि कारणम् ।
इति दैवपरो ध्यायन् नात्मानमपि चेष्टयेत् ॥ ६८ ॥

दुर्भिक्षव्यसनी चैव स्वयमेवावसीदति ।
बलव्यसनयुक्तस्य योद्धुं शक्तिर्न जायते ॥ ६९ ॥

अदेशस्थो हि रिपुणा स्वल्पकेनापि हन्यते ।
ग्राहोऽल्पीयानपि जले गजेन्द्रमपि कर्षति ॥ ७० ॥

बह्वमित्रस्तु सन्त्रस्तः श्येनमध्ये कपोतवत् ।
येनैव गच्छति पथा तेनैवासौ विपद्यते ॥ ७१ ॥

सदेति । सदा सर्व्वदैव धर्म्मबलीयस्त्वात् धर्म्मस्य पुण्यानुष्ठानस्य बलीयस्त्वात् प्रबलिष्ठत्वात् देवब्राह्मणनिन्दकः धर्म्माश्रयीभूतानां देवानां ब्राह्मणानां निन्दकः कुत्साकारी । दैवोपहतकः दैवेन दैवदुर्विपाकेन हतकः विजितः निजदोषेणैव विशीर्य्यते नष्टो भवति ॥ ६७ ॥

सम्पत्तेरिति । दैवपरः केवलं भाग्यान्वेषी जनः । सम्पत्तेः अभ्युदयस्य [illegible]तेः विपदश्च दैवम् भाग्यमेव कारणम् हेतुः इति ध्यायन् चिन्तयन् आत्मानम् अपि न चेष्टयेत्, स्वयं कार्य्यसिद्धेः न यतेत ॥ ६८ ॥

दुर्भिक्षेति । दुर्भिक्षव्यसनी दुर्भिक्षम् अन्नाभावः तदेव व्यसनं दुःखं यस्य [illegible]थाभूतः स्वयमेव विनाशस्यैव अवसीदति पराभवते । बलव्यसनयुक्तस्य विपर्य्यादिदुःखसंयुक्तस्य योद्धुम् शक्तिः बलम् "बलम् शक्तिर्बलं सैन्यम्" [illegible]मरः । न जायते न सम्भवते ॥ ६९ ॥

अदेशस्थ इति । अदेशस्थः परराष्ट्रगतावासः स्वल्पकेन क्षुद्रेणापि रिपुणा हन्यते विनाश्यते । तथाहि जलस्थोऽपि अल्पीयानपि ग्राहः नक्रः गजेन्द्रम् बलदर्पितं करिराजमपि कर्षति आकृष्य नयति ॥ ७० ॥

बह्विति । बह्वमित्रः बहवः अमित्राः शत्रवो यस्य सः [illegible] । श्येनमध्ये [illegible] कपोत इव [illegible] येन पथा मार्गेण गच्छति याति असौ बह्वमित्रः तेनैव [illegible] विपद्यते ॥ ७१ ॥

अकालसैन्ययुक्तस्तु हन्यते कालयोधिना ।
कौशिकेन हतज्योतिर्निशीथ इव वायसः ॥ ७२ ॥
सत्यधर्म्मव्यपेतेन न सन्दध्यात् कदाचन ।
ससंहितोऽप्यसाधुत्वादचिराद्याति विक्रियाम् ॥७३॥

अपरमपि कथयामि । सन्धिविग्रहासनयानसंश्रयद्वैधीभावाः षाड्गुण्यम् । कर्म्मणामारम्भोपायः पुरुषद्रव्यसम्पद्देशकालविभागो निपातप्रतीकारः कार्य्यसिद्धिः पञ्चाङ्गो मन्त्रः । सामदानभेददण्डाश्चत्वार उपायाः । उत्साहशक्तिर्मन्त्रशक्तिः प्रभुशक्तिरिति शक्तित्रयम् । एतत्सर्वमालोच्य नित्यं विजिगीषवो भवन्ति महान्तः ॥ ७४ ॥ यतः.

अकालेति । अकालसैन्ययुक्तः अकाले युद्धानुचितकाले वर्षादौ सैन्येन युक्तः सहायवान्, अकालचालितसैन्य इत्यर्थः । कालयोधिना काले शरदादौ युध्यति यः स तथाविधः तेन । निशीथे अर्द्धरात्रे "अर्द्धरात्रनिशीथौ द्वौ" इत्यमरः । गभीरायां रात्राविति यावत् । हतज्योतिः हतं नष्टं ज्योतिः दृष्टिः यस्य स तथाविधः वायसः काकः कौशिकेन पेचकेनेव हन्यते बध्यते ॥ ७२ ॥

सत्येति । सत्यधर्म्मव्यपेतेन सत्यः सत्यरूपो धर्म्मः पुण्याचारः तेन व्यपेतः हीनः तेन कदाचन कदापि न सन्दध्यात् सन्धिं न कुर्य्यात् । सः सत्यधर्म्मव्यपेतः संहितः सन्धिना बद्धोऽपि असाधुत्वात् पापशीलत्वात् अचिरात् शीघ्रमेव विक्रियाम् याति विपरीतमाचरति ॥ ७३ ॥

अपरमिति । षाड्गुण्यम् नृपाणां षट् गुणाः । तत्र सन्धिः मैत्री । विग्रहः समरः । आसनम् परस्परं कालप्रतीक्षया अवस्थानम् । यानम् युद्धयात्रा । संश्रयः प्रबलस्य आश्रयग्रहणम् । द्वैधीभावः मौखिकवश्यतास्वीकारः [illegible] । मन्त्रः मन्त्रणा । पञ्चाङ्गः कर्म्मणामारम्भोपायादिरूपैः पञ्चभिरङ्गैः समन्वितः । तत्र आरम्भोपायः आरब्धस्य कार्य्यप्रवृत्तेः उपायः सम्यक् साधनम् । [illegible] पुरुषाणां सहायजनानां द्रव्याणां धनधान्यादिकानाञ्च सम्पत् [illegible] । देशकालविभागः यथायथं देशकालानुसारेण प्रवृत्तिः । निपात- निपातस्य अधःपतनस्य प्रतीकारः प्रतिविधानम् । उपायाः [illegible]

यो हि प्राणपरित्यागमूल्येनापि न लभ्यते ।
सा श्रीर्नीतिविदां पश्य चञ्चलापि प्रधावति ॥ ७५ ॥

उक्तम्, वित्तं यदा यस्य समं विभक्तं
गूढश्च चारो निभृतश्च मन्त्रः ।
न चाप्रियं प्राणिषु यो ब्रवीति
स सागरान्तां पृथिवीं प्रशास्ति ॥ ७६ ॥

किन्तु देव यद्यपि महामन्त्रिणा गृध्रेण सन्धानमुपन्यस्तं
पि तेन राज्ञा सम्प्रति भूतजयदर्पान्न मन्तव्यम् । तद्देव
ताम्, अस्मन्मित्रं सिंहलद्वीपस्य महाबलो नाम सारसो
जम्बुद्वीपे कोपं जनयतु ॥ ७७ ॥ यतः,

गुप्तिमाधाय सुसंहतेन बलेन वीरो विचरन्नरातिम् ।

सत्र साम सन्धिः । दानम् अर्थप्रयोगः । भेदः अन्तःकलहोत्पादनम् । बाहुबलम् । उत्साहशक्तिः कार्ये उद्योगरूपा । मन्त्रशक्तिः सुमन्त्रण- प्रभुशक्तिः पौरुषरूपा । आलोच्य एतेषु मतिं बद्ध्वा ॥ ७४ ॥

ति । या श्रीः लक्ष्मीः प्राणपरित्यागमूल्येनापि जीवितविसर्जनरूप- पि, अस्तु दत्त्वापीति यावत् । न लभ्यते, सा श्रीः चपला प्रकृत्या पि नीतिविदां नयकुशलानां वेश्म गृहं प्रधावति, सम्मुखा भूत्वा तत्र ष्ठते ॥ ७५ ॥

वित्तमिति । यदा यस्य वित्तम् धनं समं विभक्तम् अनुजीविषु यथायथं वेष विभज्य दत्तं । चारः चरपुरुषः "अपसर्पश्चरः स्पशः" इत्यमरः । निभृतचारो । मन्त्रः मन्त्रणा च निभृतः गुप्तः । यश्च प्राणिषु अप्रियम् न ब्रवीति स पुंसि च सागरान्ताम् समुद्रवेष्टितां पृथिवीम् प्रशास्ति त, राजचक्रवर्ती भवतीत्यर्थः ॥ ७६ ॥

किन्त्विति । सन्धानम् सन्धिः उपन्यस्तम् प्रस्तावितः । भूतजयदर्पात् भूतानां प्राणिनां जयः विजयः तस्मात् दर्पः गर्वः तस्मात् हेतोः । मन्तव्यम् चेदम् । जनयतु करोतु, जम्बुद्वीपस्थोपरि क्रुद्धो भवत्वित्यर्थः ॥ ७७ ॥

गुप्तिमिति । वीरः शूरः गुप्तिम् रक्षाम् दुर्गम् कोषं चाधाय व्य्य सुसंहतेन एकमतेन बलेन सैन्येन सह विचरन् अरिदेशम् आक्रामन्

न समं सुतप्तस्तप्तेन सन्धानमुपैति तप्तः ॥ ७८ ॥

एवमस्तु। इत्युक्त्वा विचित्रो नाम बकः सुगु-
सिंहलद्वीपं प्रस्थापितः। अथ प्रणिधिः पुनरा-
न्, देव श्रूयतां तावत् तत्रत्यप्रस्तावः। एवं तत्र
, देव मेघवर्णस्तत्र चिरमुषितः। स वेत्ति किं
युक्तो हिरण्यगर्भो राजा न वेति। ततोऽसौ मेघवर्ण-
राज्ञा समाहूय पृष्टः वायस कीदृशोऽसौ हिरण्यगर्भो
चक्रवाको मन्त्री वा कीदृशः। मेघवर्णो ब्रूते देव स
गर्भो राजा युधिष्ठिरसमो महाशयः सत्यवाक्। चक्र
शो मन्त्री न क्वाप्यवलोक्यते। राजाह यद्येवं तदा क
त्वया वञ्चितः ॥ ७९ ॥ मेघवर्णो विहस्य ब्रूते देव

विश्वासप्रतिपन्नानां वञ्चने का विदग्धता।
अङ्कमारुह्य सुप्तं हि हत्वा किं नाम पौरुषम् ॥ ८० ॥

सन्तापयेत् पीडयेत्। येन सन्तापनेन। अरातिरित्यध्याहार्यम्। समम् का
सुतप्तः भवतीति शेषः। तथाकरणे हेतुः, तप्तः पीडितः तप्तेन पीडि
धानम् मैत्रीं उपैति प्राप्नोति। तुल्यावस्थामापन्नस्तुल्येन सुसन्धितो भ
र्थः ॥ ७८ ॥

राजाहेति। एवम् अस्तु भवतु, यथा महाबलः जम्बुद्वीपे कोपं जनयति
। सगुप्तलेखम् सगुप्तं सुनिभृतं लेखम् लिपिं। तत्रत्यः
श्रूयतामित्यर्थः। उषितः स्थितवान्। वेत्ति जानाति। किम्
वर्णसभामध्यवर्तीय। युधिष्ठिरसमः युधिष्ठिरेण धर्मपुत्रेण ज्येष्ठपाण्ड
पृष्टः जिज्ञासितः। युधिष्ठिरसमः युधिष्ठिरेण धर्मपुत्रेण ज्येष्ठपाण्ड
तुल्यः। महाशयः महान् उन्नतं आशयः सत्वं यस्य स तथाविधः
सत्यभाषी। वञ्चितः प्रतारितः ॥ ७९ ॥

। विश्वासं प्रत्ययं प्रतिपन्नानां प्राप्तानां वञ्चने प्र
विकत्थना। न कार्येत्यर्थः। तथाहि अङ्कम् उत्सङ्ग अधिरुह्य
उत्सङ्गे चिह्ने स्थानापराधयोः" इति विश्वः। आरुह्य

तु दृष्टं तेन सन्निधानं प्रथमदर्शन एव विज्ञातः । किन्तु
महाशयोऽसौ राजा । तेन मया विप्रलब्धः ॥८१॥ तथा चोक्तम्

आत्मौपम्येन यो वेत्ति दुर्जनं सत्यवादिनम् ।
स एव वञ्चितस्तेन ब्राह्मणश्छागतो यथा ॥ ८२ ॥

राजाह, कथमेतत् मेघवर्णः कथयति, अस्ति गौतमारण्ये
प्रस्तुतयज्ञः कश्चिद्ब्राह्मणो ग्रामान्तरं गत्वा छागमुपक्रीय
स्कन्धे धृत्वा गच्छन् धूर्त्तत्रयेणावलोकितः । ततस्ते धूर्त्ता यद्येष
छागः केनाप्युपायेन लभ्यते तदा मतिप्रकर्षो भवति इत्यालोच्य
वृक्षत्रयतले तस्य ब्राह्मणस्य वर्त्मन्युपविश्य स्थिताः ।
तत्रैकेन धूर्त्तेन स ब्राह्मणोऽभिहितः । भो ब्राह्मण किमिति
त्वया कुक्कुरः स्कन्धेनोह्यते । विप्रेणोक्तम् नायं श्वा, यज्ञच्छागो-
ऽयम् । अनन्तरं पुनर्द्वितीयेन क्रोशमात्रस्थितेन तदेवोक्तम् ।
तदाकर्ण्य ब्राह्मणश्छागं भूमौ निधाय मुहुर्निरीक्ष्य पुनः स्कन्धे
कृत्वा दोलायमानमतिश्चलितः । ८३ । यतः

मृ. निद्रागतं जनमिति शेषः । किं नाम पौरुषम् पुरुषकारः । न
... गौरवं ॥ ८० ॥

दृष्ट इति । विज्ञातः विपक्षदूतत्वेन परिचितः । तेन महाशयत्वात् ॥८१॥
आत्मौपम्येनेति । आत्मौपम्येन आत्मनः स्वस्य औपम्येन निदर्शनया
जनः दुर्जनम् खलम् सत्यवादिनम् सत्यभाषिणं वेत्ति जानाति, आत्मवत्
मन्यत इत्यर्थः । स एव निश्चये छागतः छागविषयात् । पञ्चम्यास्तसिल् ।
ब्राह्मणः विप्रः यथा इव तेन दुर्जनेन वञ्चितः प्रतारितः भवतीति शेषः ॥८२॥
राजाहेति । प्रस्तुतयज्ञः प्रस्तुतः उपस्थापितः, आरब्ध इति यावत् ।
यज्ञः अध्वरो, येन स तथाविधः । धृत्वा स्थापयित्वा । मतिप्रकर्षः मतेः
बुद्धेः प्रकर्षः उत्कृष्टप्रभावम् । मार्गान्तरे पार्श्वोपान्ते जाता वृक्षाः ते
तेषां त्रयं तस्य तले मूलेषु । वर्त्मनि गमनमार्गे । उह्यते नीयते ।
कुक्कुरः । यज्ञच्छागः यज्ञपशुभूतश्छागः अजा । क्रोशमात्रस्थितेन क्रोशैक-
व्यवधाने उपविष्टेन । मुहुर्मुहुः वारम्वारं निरीक्ष्य परीक्ष्य । दोलाय-

मतिर्दोलायते नूनं सतामपि खलोक्तिभिः ।
ताभिर्विश्वासितो योऽसौ म्रियते चित्रकर्णवत् ॥ ८४ ॥

राजा पृच्छति कथमेतत् । स कथयति, अस्ति कस्मिंश्चि
द्वनोद्देशे मदोत्कटो नाम सिंहः । तस्यानुचरास्त्रयः
काको व्याघ्रः शृगालश्च । अथ तैर्भ्रमद्भिः सार्थाद्भ्रष्ट उष्ट्रो
दृष्टः पृष्टश्च कुतो भवानागतः । स चात्मवृत्तान्तमकथयत् ।
ततस्तैर्नीत्वासौ सिंहाय समर्पितः । तेन चाभयवाचं दत्त्वा
चित्रकर्ण इति नाम कृत्वा स्थापितः । एवं काले गच्छति, अथ
कदाचित् सिंहस्य शरीरवैकल्यात् भूरिवृष्टिकारणाच्चाहार-
मलभमानास्ते व्यग्रा बभूवुः । ततः काकव्याघ्रगोमायुभिरालो-
चितम् चित्रकर्णमेव यथा स्वामी व्यापादयति तथानुष्ठीय-
ताम् । किमनेन कण्टकभुजास्माकम् । व्याघ्रो ब्रूते, स्वामिना-
भयवाचं दत्त्वा गृहीतोऽयम् । कथमेवं सम्भवति । वायस
वदति इह समये परिक्षीणः स्वामी पापमपि करिष्यति ।८५

आनमतिः दोलायमाना संशयेन अस्थिरा । मतिः बुद्धिः यस्य स ...
... इति शेषः ॥ ८२ ॥

मतिरिति । सताम् साधूनामपि मतिः बुद्धिः खलोक्तिभिः खला-
धूर्त्तानां उक्तिभिः वचनैः हेतुभिः दोलायते संशयदोलामारुह्य चञ्चला भवति ।
ताभिः खलोक्तिभिः यः विश्वासितः प्रत्ययमापादितः स चित्रकर्णवत् चित्र-
...इव म्रियते नाशमाप्नोति ॥ ८४ ॥

राजेति । वनोद्देशे वनप्रदेशे । अनुचराः अनुजीविनः । सार्थ...
... भ्रष्टः परिच्युतः । अकथयत् निवेदितवान् । स्थापितः ...
... अत्यस्मया अयमादेशस्तात् । भूरिवृष्टिकारण...
...न्यात् । ते सिंहादयः सर्वे व्यग्राः व्याकुलाः । यथा यत्...
... कण्टकादतत्तथाभोजिना, अधमजातीयेनेति यावत् । ...
... महिमैवोव्यर्थः । गृहीतः सकाशे स्थापितः । ...
... ॥ ८५ ॥

यतः, त्यजेत् क्षुधार्त्ता महिलापि पुत्रं
खादेत् क्षुधार्त्ता भुजगी स्वमण्डम्।
बुभुक्षितः किं न करोति पापं
क्षीणा नरा निष्करुणा भवन्ति ॥ ८६ ॥

अन्यच्च, मत्तः प्रमत्तश्चोन्मत्तः श्रान्तः क्रोधी बुभुक्षितः।
लुब्धो भीरुस्त्वरायुक्तः कामुकश्च न धर्मवित् ॥ ८७ ॥

इति निश्चित्य सर्व्वे सिंहान्तिकं जग्मुः। सिंहेनोक्तम् आहारार्थं प्राप्तं किञ्चित्। काको ब्रूते देव यत्नादपि न प्राप्तं किञ्चित्। सिंहोऽवदत् कोऽधुना जीवनोपायः। काको वदति स्वाधीनाहारपरित्यागात् सर्व्वनाशोऽयमुपस्थितः। सिंहेनोक्तम् अत्राहारः कः स्वाधीनः। काकः कर्णे कथयति चित्रकर्ण इति। सिंहो भूमिं स्पृष्ट्वा कर्णौ स्पृशति। मयास्मै अभयवाग् दत्ता। तत् कथमेवं सम्भवति ॥ ८८ ॥ तथाहि
न भूप्रदानं न सुवर्णदानं न गोप्रदानं न तथान्नदानम्।

त्यजेदिति। महिला स्त्रीजनः क्षुधार्त्ता क्षुधया बुभुक्षया आर्त्ता पीडिता सती पुत्रम् अपत्यमपि त्यजेत् भक्षयेत्। क्षुधार्त्ता भुजगी सर्पी स्वम् निजम् अण्डम् डिम्बमपि खादेदिति पूर्व्वेणान्वयः। बुभुक्षितः क्षुधितः किं पापम् दुष्कर्म न करोति, अपितु सर्व्वमेवेत्यर्थः। क्षीणाः भ्रष्टश्रीकाः नराः जनाः निष्करुणाः निष्कृपाः भवन्ति जायन्ते ॥ ८६ ॥

मत्त इति। मत्तः मद्यादिना विधुरः। प्रमत्तः अनवधानः। उन्मत्तः वातग्रस्तः। आर्त्तः व्याधिपीड़ितः। क्रोधी अमर्षणः। लुब्धः लोभवान्। भीरुः भयशीलः। त्वरायुक्तः हठकारी। कामुकः लम्पटश्च धर्म्मवित् धर्म्मज्ञाता न भवतीति शेषः ॥ ८७ ॥

इतीति। निश्चित्य स्थिरीकृत्य। सिंहान्तिकम् सिंहस्य अन्तिकम् समीपम्। यत्नादपि आयासं कृत्वापि। स्वाधीनाहारपरित्यागात् स्वानां अस्माकं निजानां अधीनस्य आयत्तस्य आहारस्य भक्ष्यस्य परित्यागात् वर्ज्जनात्। चित्रकर्ण इति, चित्रकर्णोऽस्माकं स्वाधीनाहार इत्यर्थः। स्पृशति छिनत्ति ॥ ८८ ॥

योऽभौ क्रियतां । ...
मितान्। स कथयति, यदि कश्चित्
भाम किंचः । तस्यानुचरास्तः
व । अथ दीर्घं मद्गुः सार्दमट च
यानागतः । स चागतस्तान्तमकथय
वाय समर्पितः । तेन चाभयवाचं
म सत्वा स्थापितः । एवं काले गच्छति
थु शरीरवैकल्यात् भूरिटिकारणाभावात्
वा मद्गुः । ततः काकव्याघ्रगोमायुभिरालो
मेव यथा स्वामी व्यापादयति तथानुष्ठीय
न कण्टकभुजाधमम् । व्याघ्रो ब्रूते, स्वामिना
स्पृहीतोऽयम् । कथमेवं सम्भवति । वाय
मये परिक्षीणः स्वामी पापमपि करिष्यति । ए

नायकाना संशयेन धस्थिरा । मतिः शुद्धः - वध च संवादित

। ८२ ॥

ति । खलाम् साधुनामपि मतिः शुद्धः खलोक्तिभिः खलान्
क्तिभिः वचनैः हेतुभिः दोलायते संशयदोलामारुह्य चञ्चला भवति
ोक्तिभिः यः विश्वासितः प्रत्ययमापादितः स विमर्शकवत् विक
ते नाशमाप्नोति ॥ ८४ ॥
जति । वनोद्देशे वनप्रदेशे । अनुचराः अनुजीविनः । स्थापितः
यूथात् भ्रष्टः परिच्युतः । अकथयत् निवेदितवान् । भूरिटिका
: । शरीरवैकल्यात् अस्वस्थतया अपाटवत्वात् । व्याकुलाः । यथा
संपनिवन्धात् । ते सिंहादयः सर्वे व्यस्ताः व्याकुलाः । यावद्
टकभुजा कण्टकावृततृणभोजिना, उष्ट्रद्विजातीयेनेति । यावद्
उपकारो भविष्यतीत्यर्थः । गृहीतः सकाशे स्थापितः ।
सामर्थ्यहीनः ॥ ८५ ॥

त्यजेत् क्षुधार्त्ता महिलापि पुत्रं
खादेत् क्षुधार्त्ता भुजगी स्वमण्डम् ।
बुभुक्षितः किं न करोति पापं
क्षीणा नरा निष्करुणा भवन्ति ॥ ८६ ॥

मत्तः प्रमत्तश्चोन्मत्त आर्त्तः क्रोधी बुभुक्षितः ।
लुब्धो भीरुस्त्वरायुक्तः कामुकश्च न धर्म्मवित् ॥ ८७ ॥

इति निश्चित्य सर्व्वे सिंहान्तिकं जग्मुः । सिंहेनोक्तम् आहारार्थं प्राप्तं किञ्चित् । काको ब्रूते देव यत्नादपि न प्राप्तं किञ्चित् । सिंहोऽवदत् कोऽधुना जीवनोपायः । काको वदति स्वाधीनाहारपरित्यागात् सर्व्वनाशोऽयमुपस्थितः । सिंहेनोक्तम् अत्राहारः कः स्वाधीनः । काकः कर्णे कथयति चित्रकर्ण इति । सिंहो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । मयाऽस्मै अभयवाग् दत्ता । तत् कथमेवं सम्भवति ॥ ८८ ॥ तथाहि
भूप्रदानं न सुवर्णदानं न गोप्रदानं न तथान्नदानम् ।

त्यजेदिति । महिला स्त्रीजनः क्षुधार्त्ता क्षुधया बुभुक्षया आर्त्ता पीड़िता [illegible] पुत्रम् अपत्यमपि त्यजेत् भक्षयेत् । क्षुधार्त्ता भुजगी सर्पी स्वम् निजम् [illegible] डिम्बमपि खादेदिति पूर्व्ववदन्वयः । बुभुक्षितः क्षुधितः किं पापम् [illegible] न करोति, अपितु सर्व्वमेवेत्यर्थः । क्षीणाः [illegible] नराः [illegible] [illegible] निष्कृपाः भवन्ति जायन्ते ॥ ८६ ॥

मत्त इति । मत्तः मद्यादिना विधुरः । प्रमत्तः अनवधानः । [illegible] [illegible] । आर्त्तः व्याधिपीड़ितः । क्रोधी [illegible] । [illegible] [illegible] भयशीलः । त्वरायुक्तः [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] इति शेषः ॥ ८७ ॥

इतीति । निश्चित्य स्थिरीकृत्य । [illegible] [illegible] [illegible] इति आहारं कमपि । स्वाधीनाहारपरित्यागात् [illegible] [illegible] [illegible] [illegible] आयत्तस्य आहारस्य भक्ष्यस्य परित्यागात् [illegible] [illegible] [illegible] कर्णं प्रायं स्वाधीनाहार इत्यर्थः ।

त्तो च महाप्रदानं सर्व्वप्रदानेष्वभयप्रदानम् ॥८९॥
सर्व्वकामसमृद्धस्य अश्वमेधस्य यत्फलम् ।
तत् फलं लभते सम्यक् रक्षिते शरणागते ॥ ९० ॥
मृते नासौ स्वामिना व्यापादयितव्यः । किन्त्वस्मा-
था कर्त्तव्यं यथासौ स्वदेहदानमङ्गीकरोति । तच्छ्रुत्वा
णो स्थितः । ततोऽसौ लब्धावकाशः कूटं कृत्वा सर्व्वा-
सिंहसमीपमागतः । अथ काकेनोक्तम् देव यत्नादपा-
न प्राप्तः । अनेकोपवासक्लिष्टश्च स्वामी । तदिदानीं
यमांसमुपभुज्यताम् ॥ ९१ ॥ यतः,
स्वामिमूला भवन्त्येताः सर्व्वाः प्रकृतयः खलु ।
समूलेषु हि वृक्षेषु प्रयत्नः सफलो नृणाम् ॥ ९२ ॥

नेति । इह संसारे सर्व्वप्रदानेषु निखिलदानकार्य्येषु मध्ये अभयप्र-
भीतिवारणं यथा महाप्रदानम् श्रेष्ठदानं वदन्ति आहुः । मात्स्यर्यात्
बः । भूदानम् भूमिदानं । सुवर्णदानम् काञ्चनदानं । गोप्रदानम्
सत्वर्गः । तथा अन्नदानम् अभयप्रदानञ्च तथा महाप्रदानम् न वदन्ति
पान्वयः ॥ ८९ ॥

सर्व्वेति । सर्व्वकामसमृद्धस्य सर्व्वैः निखिलैः कामैः अभीष्टैः समृद्धस्य स-
सम्पन्नस्य, निखिलाभिलषितप्रदस्येति यावत् । अश्वमेधस्य वाजिमेधस्य यज्ञ-
यत् फलम् विज्ञैः शरणागते शरणम् रक्षणम्, आश्रयमिति यावत् । "शरणं
रक्षणं गृहे" इति यादवः । आगते प्राप्ते जने रक्षिते त्राते सति तत् फलम्
सम्यक् साकल्येन लभते, शरणागतरक्षक इति शेषः ॥ ९० ॥

काक इति । स्वामिना भवता । स्वयम् अङ्गीकरोति स्वयं स्वीकरिष्यति
लब्धावकाशः लब्धः सिंहस्य तूष्णीम्भावेन तस्याशयं बुद्धा प्राप्तः अवकाशः
परो येन स तथाभूतः । कूटम् छलं । सर्व्वान् उष्ट्रव्यतिरिक्तान् । क
कोपवासक्लिष्टः अनेकैः बहुभिः उपवासैः अनाहारैः क्लिष्टः कर्षितः ॥९१॥

स्वामीति । एताः पृथिवीस्थाः सर्व्वाः प्रजाः खलु निश्चये स्वामि
स्वामी राजा मूलम् प्रधानाश्रयः यासां तास्तथाभूता भवन्ति । व

सिंहेनोक्तम् भद्र वरं प्राणपरित्यागो न पुनरीदृशे कर्मणि
वृत्तिः। जम्बुकेनापि तथोक्तम्। ततः सिंहेनोक्तं मैवम्। व्याघ्र
उवाच मद्देहेन जीवतु स्वामी। सिंहेनोक्तम् न कदाचिदेवमु-
चितम्। अथ चित्रकर्णोऽपि जातप्रत्ययः तथैवात्मदेहदानमाह।
तद्वचनादेवासौ द्वीपिना कुक्षिं विदार्य्य व्यापादितः सर्वैर्भक्षितश्च।
अतोऽहं ब्रवीमि मतिर्दोलायते नूनमित्यादि। तदनन्तरं तृती-
यधूर्त्तवचनं श्रुत्वा स विप्रो भ्रमं निश्चित्य छागं त्यक्त्वा स्नात्वा
गृहं ययौ। छागश्च नीत्वा धूर्त्तैः खादितः। अतोऽहं ब्रवीमि
आत्मौपम्येन यो वेत्तीत्यादि। राजाह मेघवर्ण कथं त्वया
शत्रुमध्ये सुचिरमुषितम्। कथं वा तेषामनुनयः कृतः। मेघवर्ण
उवाच देव स्वामिकार्य्यार्थिना स्वप्रयोजनवशाद्वा किं किं न
क्रियते। ८३। पश्य

लोके वहति किं राजन् न मूर्द्ध्ना दग्धुमिन्धनम्।
क्षालयन्नपि वृक्षाङ्घ्रिं नदीवेगो निकृन्तति॥ ८४॥

तथा चोक्तम्,

स्कन्धेनापि वहेच्छत्रून् कार्य्यमासाद्य बुद्धिमान्।

[illegible] भावयः [illegible] ॥ ८२ ॥

सिंहेनेति। भद्र साधो। वरं श्रेष्ठः। [illegible] जातप्रत्ययः [illegible]। कुक्षिम् उदरम्। [illegible] ॥ ८३ ॥

लोके इति। राजन् [illegible] मूर्द्ध्ना [illegible] किम्। [illegible] ॥ ८४ ॥

यथा वृद्धेन सर्पेण मण्डूका विनिपातिताः ॥ ९५ ॥

राजाह, कथमेतत् । मेघवर्णः कथयति, अस्ति जीर्णो...
...ाने मन्दविसर्पो नाम सर्पः । सोऽतिजीर्णतया स्वाहारम...
...न्वेष्टुमक्षमः सरस्तीरे पतित्वा स्थितः । ततो दूरात् केन...
...चिन्मण्डूकेन दृष्टः पृष्टश्च, किमिति भवानाहारं नान्विष्यति ।
सर्पो ब्रूते, भद्र गच्छ किं ते मम मन्दभाग्यस्य वृत्तान्त...
प्रश्नेन । ततः सञ्जातकौतुकः स भेकः सर्वथा कथ्यतामिति त...
सर्पमाह । सर्पो ब्रूते, भद्र अत्र ब्रह्मपुरे कौण्डिन्यनाम्न...
श्रोत्रियस्य पुत्रो विंशतिवर्षदेशीयः सर्वगुणसम्पन्नो दुर्दैवा...
न्मया नृशंसेन दष्टः । ततः सुशीलनामानं पुत्रं मृतमव...
लोक्य कौण्डिन्यः शोकेन मूर्च्छितः पृथिवीतले लुलोठ । अन...
न्तरं ब्रह्मपुरवासिनः सर्वे बान्धवास्तस्य तत्रागत्योपविष्टाः ।९६।

तथा चोक्तम्,

आहवे व्यसने चैव दुर्भिक्षे शत्रुविग्रहे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ ९७ ॥

स्कन्धेनेति । बुद्धिमान् प्राज्ञः कार्यम् कर्त्तव्यं आसाद्य प्राप्य कर्मणा... निबद्धो भूत्वेति यावत् । रिपुम् स्कन्धेनापि स्कन्धे कृत्वापि वहेत् । येनोपा... येन वृद्धेन जरायस्तेन सर्पेण मण्डूकाः भेकाः निपातिताः नाशिताः ॥९५॥

राजेति । अतिजीर्णतया समधिकवार्द्धक्येन । अन्विष्टुम् अनुसन्धातुम्... सञ्जातकौतुकः प्रवृत्तकौतूहलः । श्रोत्रियस्य वेदाध्यायिनो ब्राह्मणस्य । विंश... वर्षदेशीयः विंशतिवर्षकल्पः । उक्तञ्च दण्डिना साहश्यवाचकप्रस्तावे "कल्प... देशीयदेश्यादिरेषप्रतिनिधी अपि" इति । दुर्दैवात् मम तस्य वा मन्द... । बान्धवाः मित्राणि ॥ ९६ ॥

आहव इति । आहवे युद्धसमये । व्यसने विपदि । दुर्भिक्षे भिक्षाभावकाले... शत्रुणापाक्रमणकाले । राजद्वारे राजसभायाम्, अभियोगकाले... यावत् । श्मशाने प्रेतभूमौ, अन्त्येष्टिक्रियाकाल इति यावत् । य तिष्ठति... अनुगच्छति स बान्धवः मित्रमित्याख्यायाः सहचितः ॥ ९७ ॥

ततः कपिलो नाम स्नातकोऽवदत् अरे कौण्डिन्य मूढोऽसि येनैवं विलपसि । ९८ ॥ शृणु,

क्रोडीकरोति प्रथमं यदा जातमनित्यता ।
धात्रीव जननी पश्चात् तदा शोकस्य कः क्रमः ॥९९॥

अपि च, क्व गताः पृथिवीपालाः ससैन्यबलवाहनाः ।
वियोगसाक्षिणी येषां भूमिरद्यापि तिष्ठति ॥ १०० ॥

अपरञ्च, प्रतिक्षणमयं कायः क्षीयमाणो न लक्ष्यते ।
आमकुम्भ इवाम्भःस्थो विशीर्णः सन् विभाव्यते ॥१०१॥

आसन्नतरतामेति मृत्युर्जन्तोर्दिने दिने ।
आघातं नीयमानस्य वध्यस्येव पदे पदे ॥ १०२ ॥

तत इति । मूढः अज्ञानवान् । विलपसि शोचसि ॥ ९८ ॥

क्रोडीकरोतीति । धात्रीव उपमाता यथा अनित्यता नश्वरता जातम् उत्पन्नं नरम् प्रथमम् आदितः एव क्रोडीकरोति विषयीकरोति । पक्षे अङ्के करोति । पश्चात् तदनन्तरं जननी प्रसूतिः । क्रोडीकरोतीति शेषः । इति यदा तदा शोकस्य विलापस्य कः क्रमः नियमः । कथितेऽपि नावसरः ॥९९॥

क्वेति । पृथिवीं धरां पालयन्ति रक्षन्ति ये ते पृथिवीपालाः राजानः ते पृथिवीपालाः । ससैन्यबलवाहनाः । सैन्यं कटकम् । बलं हस्त्यश्वादि । वाहनम् रथादि । तैः सहिताः । क्व कुत्र स्थाने देशे गताः प्रस्थिताः । भूमिः धरित्री येषां गतानां महीपालानां वियोगसाक्षिणी वियोगस्य मृत्योः साक्षिणी प्रतिभूता तिष्ठति । पृथिव्यां सर्वमेव नश्वरमिति भावः ॥ १०० ॥

प्रतिक्षणमिति । अयम् कायः शरीरं प्रतिक्षणम् अनुपदं क्षीयमाणः क्षयं गच्छन् न लक्ष्यते, कायस्य क्षयभावं न कश्चित् पश्यतीत्यर्थः । अम्भःस्थः जलस्थः आमकुम्भः अपक्वघट इव विशीर्णः विशिष्टः सन् विभाव्यते ज्ञायते, नतु विशेषात् पूर्वम् ॥ १०१ ॥

आसन्नेति । मृत्युः नाशः आघातम् वधभूमिं नीयमानस्य वध्यस्य पदे पदे प्रतिपदमिव जन्तोः प्राणिनः दिने दिने प्रतिदिवसं च आसन्नतरताम् निकटतरतां एति गच्छति ॥ १०२ ॥

अनित्यं यौवनं रूपं जीवितं द्रव्यसञ्चयः।
ऐश्वर्य्यं प्रियसंवासो मुह्येत् तत्र न पण्डितः॥ १०३

यथा काष्ठं च काष्ठं च समेयातां महोदधौ।
समेत्य च व्यपेयातां तद्वद्भूतसमागमः॥ १०४॥

यथा हि पथिकः कश्चिच्छायामाश्रित्य तिष्ठति।
विश्रम्य च पुनर्गच्छेत् तद्वद्भूतसमागमः॥ १०५॥

पञ्चभिर्निर्म्मिते देहे पञ्चत्वं च पुनर्गते।
स्वां स्वां योनिमनुप्राप्ते तत्र का परिदेवना॥ १०६॥

यावन्तः कुरुते जन्तुः सम्बन्धान् मनसः प्रियान्।
तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः॥ १०७॥

अनित्यमिति। यौवनम् वयः। रूपम् सौन्दर्य्यम्। जीवितम् प्राण
ञ्चयः द्रव्याणाम् धनधान्यादीनां सञ्चयः आहरणम्। ऐश्वर्य्यम् विभूति
वासः प्रियैः पुत्रादिभिरिष्टैः संवासः एकत्रावस्थितिः। एतत्
यम् नश्वरं। अतः पण्डितः प्राज्ञः तत्र तस्मिन् विषये न मुह्येत् मो
न कुर्य्यात्॥ १०३॥

यथेति। यथा महोदधौ महार्णवे काष्ठञ्च काष्ठञ्च द्वौ काष्ठखण्डौ च
त् यदृच्छया वाह्यमानौ परस्परं सङ्गच्छेतां। समेत्य मिलित्वा च पु
यातां यदृच्छयैव वियुक्तौ भवेतां। भूतसमागमः भूतानां प्राणिनां सम
मेलनं तद्वत् तथैव॥ १०४॥

यथेति। यथा हि यद्वत् कश्चित् पथिकः पान्थः छायाम् अनातपं "छा
प्रिया कान्तिः प्रतिबिम्बमनातपः" इत्यमरः। आश्रित्य अवलम्ब्य तिष्ठ
। विश्रम्य च श्रमापनोदनं कृत्वा च पुनः गच्छेत् अभीष्टं देशं प्रयो
गमः तद्वत् तथैव॥ १०५॥

पञ्चभिरिति। पञ्चभिः क्षित्यप्तेजोमरुद्व्योमरूपैः भूतपञ्चकैः निर्मि
देहे काये पञ्चत्वम् पञ्चीभावं गते प्राप्ते एवं सत्यञ्च स्वां स्वां निजां निजां
निदानं अनुप्राप्ते पुनः लब्धे सति तत्र विषये परिदेवना विलापः का।
॥ १०६॥

यावन्त इति। जन्तुः जीवः मनसः चेतसः प्रियान् अभिमतान् याव

नायमत्यन्तसंवासो लभ्यते येन केनचित् ।
अपि स्वेन शरीरेण किमुतान्येन केनचित् ॥ १०८ ॥

न, संयोगो हि वियोगस्य संसूचयति सम्भवम् ।
अनतिक्रमणीयस्य जन्म मृत्योरिवागमम् ॥ १०९ ॥

आपातरमणीयानां संयोगानां प्रियैः सह ।
अपथ्यानामिवान्नानां परिणामो हि दारुणः ॥११०॥

द, व्रजन्ति न निवर्त्तन्ते स्रोतांसि सरितां यथा ।
आदायादाय मर्त्यानां सदा रात्र्यहनी तथा ॥ १११ ॥

सुखास्वादपरो यस्तु संसारे सत्समागमः ।

[illegible] कुरुते [illegible] हृदये [illegible]
[illegible] शोकशङ्कुः [illegible]
[illegible] ॥ १०७ ॥

[illegible] । अयम् [illegible] [illegible] केनापि [illegible] लभ्यते न प्राप्यते । स्वेन निजेन शरीरेणापि न [illegible] इति [illegible] । अन्येन [illegible] केनचित् [illegible] ॥ १०८ ॥

संयोग इति । [illegible] [illegible] संयोगः [illegible] हि [illegible] वियोगस्य [illegible] सूचयति [illegible] ॥ १०९ ॥

आपातेति । अपथ्यानाम् [illegible] अन्नानाम् [illegible] प्रियैः [illegible] सह संयोगानाम् [illegible] परिणामः [illegible] दारुणः [illegible] ॥ ११० ॥

व्रजन्तीति । यथा सरिताम् नदीनां स्रोतांसि [illegible] यदा [illegible] न निवर्त्तन्ते [illegible] यथा रात्र्यहनी [illegible] मर्त्यानाम् [illegible] आयुः [illegible] आदाय आदाय [illegible] न निवर्त्तन्ते ॥ [illegible] ॥

[illegible]
[illegible]

स वियोगावसानत्वात् दुःखानां धुरि युज्यते ॥११२॥

अतएव हि नेच्छन्ति साधवः सत्समागमम् ।
यद्वियोगासिलूनस्य मनसो नास्ति भेषजम् ॥११३॥

सुकृतान्यपि कर्म्माणि राजभिः सगरादिभिः ।
अथ तान्येव कर्म्माणि ते चापि प्रलयं गताः ॥११४॥

संचिन्त्य संचिन्त्य तमुग्रदण्डं मृत्युं मनुष्यस्य विचक्षणस्य ।
वर्षाम्बुसिक्ता इव चर्म्मबन्धाः सर्व्वे प्रयत्नाः शिथिलीभवन्ति ॥११५॥

यामेव रात्रिं प्रथममुपैति गर्भे निवासं नरवीरलोकः ।
ततः प्रभृत्यस्खलितप्रयाणः स प्रत्यहं मृत्युसमीपमेति ॥११६॥

...थाविधः । स सत्समागमः वियोगावसानत्वात् वियोगे विच्छेदे अवसानम् ... प्राप्तिः यस्य तस्य तद्विधत्वात् दुःखानाम् शोकानां धुरि अग्रे युज्यते । स एव महद्दुःखरूपेण गण्यो भवतीत्यर्थः ॥ ११२ ॥

अत इति । अतएव हि अस्मादेव कारणात् साधवः ज्ञानवन्तः सत्समागमम् प्रियसङ्गतिं न इच्छन्ति न कामयन्ते । यद्वियोगासिलूनस्य यस्य स... समागमस्य वियोगः विच्छेदः स एव असिः खड्गः तेन लूनस्य छिन्नस्य मनसः चेतसः भेषजम् औषधम् नास्ति न विद्यते ॥ ११३ ॥

सुकृतानीति । सगरादिभिः सगरः सूर्यवंशीयनरपतिविशेषः स आदिः येषां ते तैः राजभिः नृपैः कर्म्माणि सुकृतानि धर्मबुद्ध्या आचरितान्यपि अथ तान्येव सुकृतान्येव कर्म्माणि ते चापि राजानः प्रलयम् नाशं गताः प्राप्ताः ॥ ११४ ॥

संचिन्त्येति । उग्रदण्डम् उग्रः तीव्रः दण्डः शासनं यस्य स तं, अति... निर्दयमिति यावत् । तम् सुपरिचितं मृत्युम् कालं संचिन्त्य पुनः पुनः मनसि निधाय विचक्षणस्य अतिनिपुणस्यापि मनुष्यस्य सर्व्वे निखिलाः प्रयत्नाः वर्षाम्बुना वारिणा सिक्ताः सिञ्चिताः चर्म्मबन्धाः चर्म्मरज्जव इव शिथिलीभवन्ति विशीर्य्यन्ते ॥ ११५ ॥

यामिति । नरवीरलोकः नरेषु वीरः शूरः लोकः पुरुषः यामेव प्रथमां रात्रिं गर्भे मातुः कुक्षौ निवासम् वसतिं उपैति प्राप्नोति, ततः प्रभृति ...

संसारं विचार्य्य । शोकोऽयमज्ञानस्य प्रपञ्चः ॥११७॥ पश्य

अज्ञानं कारणं न स्याद्वियोगो यदि कारणम् ।

शोको दिनेषु गच्छत्सु वर्द्धतामपयाति किम् ॥११८॥

तदात्मानमनुसन्धेहि, शोकचर्चाञ्च परिहर । ११९ । यतः

अकाण्डपातजातानामस्त्राणां मर्म्मभेदिनाम् ।

गाढशोकप्रहाराणामचिन्तैव महौषधम् ॥ १२० ॥

ततस्तद्वचनं निशम्य प्रबुद्ध इव कौण्डिन्य उत्थायाब्रवीत्

...विचारोऽयं स शोकः अस्खलितप्रयाणः अस्खलितं भुवं प्रयाणम् प्रसारो ... तथाभूतः सन् प्रत्यहम् प्रतिदिनम् मातुरस्मीपं मृत्योः कालस्य समीपं ... एति आगच्छति ॥ ११६ ॥

... अचेति । विचार्य्य यथावत् परिचिन्त्य । अज्ञानस्य अविद्यायाः । ...ञ्चः माया ॥ ११७ ॥

अज्ञानमिति । अज्ञानम् अविद्या, मोह इति यावत् । यदि चेत् कारणम् ...दानम्, शोकस्येति यावत् । न स्यात् न भवेत् । वियोगः इष्टजनविरहः ...दि कारणम् स्यादिति शेषः । तदा दिनेषु दिवसेषु गच्छत्सु अतीतेषु शोकः ...र्द्धताम् वृद्धिं गच्छतु, कथं अपयाति, याति । शोकस्य वियोगजत्वे ...वियोगकालस्या सह तस्याप्युत्तरोत्तरं वृद्धिरेव सम्भाविता; किन्तु शोकाप... ...तस्याप्यपगतत्वात् तद्विपरीततयैव मोह एव तस्य कारणं सिद्ध्यतीति ...तार्थः ॥ ११८ ॥

... तदिति । आत्मानम् आत्मतत्त्वं । अनुसन्धेहि परिचिन्तय । शोकचर्चाम् ...पुनः पुनः शोकचिन्तां । परिहर त्यज ॥ ११९ ॥

अकाण्डेति । अकाण्डपातजातानाम् अकाण्डे अकाले, अतर्कितकाले... ...पातः पतनं तेन जातानां उत्पन्नानां ... ...शोकः स एव प्रहारः आघातः ...

तदकस्मिन्नाश्रमे गत्वा तपश्चरणं करोमि । वनं गच्छामि । [१२१] । पुन कपिञ्जलो ब्रूते

वनेऽपि दोषाः प्रभवन्ति रागिणां
गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ।
अकुत्सिते कर्म्मणि यः प्रवर्त्तते
निवृत्तरागस्य गृहं तपोवनम् ॥ १२२ ॥

यतः, दुःखितोऽपि चरेद्धर्म्मं यत्र कुत्राश्रमे रतः ।
समः सर्व्वेषु भूतेषु न लिङ्गं धर्म्मकारणम् ॥ १२३ ॥

उक्तञ्च, वृत्त्यर्थं भोजनं येषां सन्तानार्थञ्च मैथुनम् ।
वाक् सत्यवचनार्थाय दुर्गाण्यपि तरन्ति ते ॥ १२४ ॥

संसारे धर्म्मं न किञ्चित् प्रयोजनम् "धर्म्मं मूलमधर्म्मस्य ... " इत्यपरः । वनं गच्छामि, वानप्रस्थो भूत्वा सर्व्वं तपश्चरामीति भावः ॥१२१॥

वन इति । रागिणाम् विषयेषु अनुरागवतां जनानां वने तपोवने दोषाः पापानि प्रभवन्ति उत्पद्यन्ते । गृहे संसारेऽपि पञ्चेन्द्रियनि पञ्चेन्द्रियाणां चक्षुरादीनां पञ्चानां ज्ञानसाधनानां निग्रहः विषयेभ्यो व्यावर्त्तनं निरोधनं तपः तपस्या, स एव तपःफलम् ददातीत्यर्थः । यः अकुत्सिते साधुभिरनिन्दिते पुण्ये कर्म्मणि प्रवर्त्तते व्याप्रियते निवृत्तर निवृत्तः शान्तिं प्राप्तः रागः विषयासक्तिर्यस्य स तथाभूतः तस्य गृहम् स एव तपोवनम् तपश्चर्य्यास्थानम् ॥ १२२ ॥

दुःखित इति । यत्र कुत्रापि, ब्रह्मचर्य्यादौ यस्मिन् कस्मिन्नपि । आ आश्रमायां । रतः अवस्थितः । दुःखितः विपद्ग्रस्तोऽपि सन् सर्व्वेषु निखिलेषु जीवेषु समः समदर्शी भूत्वा धर्म्मम् पुण्यकर्म्म चरेत् । लिङ्गम् चा चिह्नं धर्म्मकारणम् धर्म्मस्य कारणं मूलं न भवतीति शेषः ॥१२३॥

वृत्त्यर्थमिति । वृत्त्यर्थम् जीवितरक्षणाय, न तु रसनातृप्तये । जनानां भोजनम् आहारग्रहणम् । सन्तानार्थम् पुत्रोत्पादनाय, न तु येषां मैथुनम् स्त्रीसङ्गः । सत्यवचनार्थम् सत्यभाषणाय, न तु येषां वाक् वचनशक्तिः । ते दुर्गाणि सङ्कटान्यपि तरन्ति सुखेन यान्ति ॥ १२४ ॥

आत्मा नदी संयमपुण्यतीर्था
सत्योदका शीलतटा दयोर्मिः ।
तत्राभिषेकं कुरु पाण्डुपुत्र
न वारिणा शुध्यति चान्तरात्मा ॥ १२५ ॥

जन्ममृत्युजराव्याधिवेदनाभिरुपद्रुतम् ।
संसारमिदमत्यन्तमसारं त्यजतः सुखम् ॥ १२६ ॥

दुःखमेवास्ति न सुखं यस्मात् तदुपलभ्यते ।
दुःखार्त्तस्य प्रतीकारे सुखसंज्ञा विधीयते ॥ १२७ ॥

कौण्डिन्यो ब्रूते, एवमेव । ततोऽहं तेन शोकाकुलेन ब्राह्मणेन शप्तः यदद्यारभ्य मण्डूकानां वाहनं भविष्यसीति ।

आत्मेति । आत्मा आत्मतत्त्वं । संयमः इन्द्रियनिग्रहः स एव तीर्थं पुण्यतीर्थं यस्यां सा संयमपुण्यतीर्था । सत्योदका सत्यं सत्यमेव उदकं जलं यस्याः सा सत्योदका । शीलं सच्चरित्रमेव तटं तीरं यस्याः सा शीलतटा । दया एव ऊर्मिः स्रोतो यस्याः सा दयोर्मिः । एवम्भूता नदी परिकल्प्यते । हे पुत्र हे युधिष्ठिर तत्र तस्यां आत्मनद्यां अभिषेकम् स्नानं कुरु । अन्तरात्मा चित्तं वारिणा सामान्यजलेन न शुध्यति पवित्रतां न गच्छति ॥ १२५ ॥

जन्मेति । जन्म उद्भवः । मृत्युः मरणं । जरा वार्द्धक्यं । व्याधिः गदः । वेदना दुःखानुभूतिः । ताभिः जन्ममृत्युजराव्याधिवेदनाभिः उपद्रुतम् पीडितं अत्यन्तम् नितान्तम् असारम् निःसारम् अस्थिरम् "वारे वारे निस्सारम्" इत्यर्थः । इदम् संसारम् त्यजतः सुखम् निर्वृतिः भवतीति शेषः ॥ १२६ ॥

दुःखमिति । दुःखम् एव केवलं अस्ति, संसार इति शेषः । सुखम् न अस्तीति शेषः । यस्मात् दुःखात् सुखम् उपलभ्यते । दुःखार्त्तस्य दुःखेन आर्त्तस्य पीडितस्य प्रतीकारे प्रतिविधाने सुखसंज्ञा सुखस्य संज्ञा नाम विधीयते क्रियते । दुःखाभावः सुखम्, अतो दुःखमेव वस्तुतः विद्यते इति भावः ॥ १२७ ॥

कौण्डिन्य इति । एवमेव तथैव । ... ।

पिलो ब्रूते, सम्प्रत्युपदेशाश्रद्धिष्णुर्भवान्, शोकाविष्टं ते हृद-
म्। तथापि कार्य्यं शृणु। १२८।

सङ्गः सर्व्वात्मना त्याज्यः स चेत् त्यक्तुं न शक्यते।
स सद्भिः सह कर्त्तव्यः सतां सङ्गो हि भेषजम्॥ १२९॥

अन्यच्च, कामः सर्वात्मना हेयः स चेद्धातुं न शक्यते।
स्वभार्य्यां प्रति कर्त्तव्यः सैव तस्य हि भेषजम्॥ १३०॥

एतच्छ्रुत्वा स कौण्डिन्यः कपिलोपदेशामृतप्रशान्तशोक-
नलो यथाविधि दण्डग्रहणं कृतवान्। ततो ब्राह्मणशाप-
भोक्तुं मण्डूकानुद्वोढुमत्र तिष्ठामि। अनन्तरं तेन मण्डूकेन
गत्वा मण्डूकनाथस्य जालपादस्य तत् कथितम्। ततोऽसा-
वागत्य स मण्डूकनाथः सर्पमधिष्ठितवान्। स सर्पस्तं पृष्ठे
कृत्वा चित्रपदक्रमं बभ्राम। परेद्युश्चलितुमसमर्थं तं मण्डू-
कनाथोऽवदत् किमिति भवानद्य मन्दगतिः। सर्पो ब्रूते, देव
आहारविरहाद्दुर्बलोऽस्मि। मण्डूकनाथोऽवदत्, अस्मदाज्ञया
मण्डूकान् भक्षय। ततः गृहीतोऽयं महाप्रसाद इत्युक्त्वा क्रमशः

इष्टवियोगजनितदुःखेन आविष्टं सम्यक् अधिगतम्। हृदयम् अन्तरात्मा ॥१२८॥

सङ्ग इति। सङ्गः संसर्गः सर्व्वात्मना कायमनोवाक्येन त्याज्यः हातव्यः
चेत् यदि स सङ्गः त्यक्तुं न शक्यते तदा सद्भिः साधुपुरुषैः सह कर्त्तव्यः
हि यतः सतां सङ्गः भेषजम् शोकप्रशमनौषधम् ॥ १२९ ॥

काम इति। कामः वासना सर्व्वात्मना हेयः त्याज्यः। चेत् यदि
कामः हातुम् त्यक्तुं न शक्यते तदा स्वभार्य्याम् धर्मपत्नीं प्रति कर्त्तव्यः। हि
यतः सा पत्नीव तस्य कामस्य भेषजम् प्रशमनौषधम् ॥ १३० ॥

एतदिति। कपिलोपदेशामृतप्रशान्तशोकानलः कपिलस्य उपदेशः शिक्षा
वचनम् स एव अमृतं जलं तेन प्रशान्तः निर्व्वाणं प्राप्तः शोकः दुःखमेव अनल
अग्निः यस्य स तथाभूतः। यथाविधि यथान्यायेन दण्डग्रहणम् कृतवान्
गृहीता वानप्रस्थोऽभूदित्यर्थः। जालपादस्य जालपादनाम्नः।
सापप्रधानं। अधिष्ठितवान् आरुरोह। चित्रपदक्रमं विशेष विविध

मण्डूकान् खादति । अथ निर्मण्डूकं सरो विलोक्य मण्डूकन
ोऽपि तेन खादितः । अतोऽहं ब्रवीमि स्कन्धेनापि वहेच्छत्रु
त्यादि । देव यात्विदानीं पुरावृत्ताख्यानकथनं । सर्व्वथा सं
ोऽयं हिरण्यगर्भो राजा सन्धीयतामिति मे मतिः । राज
ाच, कोऽयं भवतो विचारः यतो जितस्तावदयमस्माभिः । त
दस्मदाज्ञया सेवायां वसति तदास्तां, नो चेद्विगृह्यताम्
त्यान्तरे जम्बुद्वीपादागत्य शुकेनोक्तं, देव सिंहलद्वीप
एसो राजा सम्प्रति जम्बुद्वीपमाक्रम्याधितिष्ठति । राजा
सम्भ्रममाह, किं किम् । शुकः पूर्व्वोक्तं कथयति । गृध
वाच, साधु रे चक्रवाक मन्त्रिन् साधु । राजा सकोप
यास्तां तावदयम् । तमेव गत्वा समूलमुन्मूलयामि ।१३।
दूरदर्शी विहस्याह,

न शरन्मेघवत् कार्य्यं वृथैव घनगर्जितम् ।
परस्यार्थमनर्थं वा प्रकाशयति नो महान् ॥ १३२ ॥

ध, एकदा न विगृह्णीयात् बहून् राजा विवादिनः ।

न गमनभङ्गया क्रमः गतिः यस्य वदु तथाविधं । बभ्राम इतस्ततः पर्य्य
ेत् । अस्मदाज्ञया अस्माकम् मम । गौरवे बहुवचनम् । आज्ञया वतु
या । "प्रकृत्यादिभ्य उपसंख्यानम्" इति तृतीया । अहङ्कारादः अहङ्
उपक्रः । स्कन्धेः कोऽन्तः । यात् विरमतु । कः किमप्यकृत्वाय । निवसति
युनक्ति । आस्ताम् स्वाधिकारे तिष्ठतु । विगृह्यताम् बलेन दूरी
क्रियताम् । आक्रम्य अवरुध्य । सम्भ्रमम् कौतुकपूर्वम् । उन्मतम् मनसि
धन्यः । आस्ताम् त्यज्यताम् । समूलम् मूलघातम् ॥ १३१ ॥

नेति । शरन्मेघवत् यदि रिक्तघन इव तथा वृथैव घनगर्जितम्
मितं उच्चैरात्मीयपरुषमित्यर्थः । न कार्य्यम् न विधेयम् । महान् उदार
त्मा परस्य अर्थम् प्रयोजनम् अनर्थम् अशुभ अनिष्टं वा न प्रकाशयति न
कथयतीति ॥ १३२ ॥

एकदेति । राजा एकदा समकालमेव बहून् अनेकान् विवादिनः शत्रू

सदर्पोऽप्युरगः कीटैर्बहुभिर्नाशितो ध्रुवम् ॥ १३३ ॥

। किम् इतो विना सन्धानं गमनमस्ति। यत अस्माकं प

कोपः कर्त्तव्यः। १३४। अपरञ्च,

> योऽर्थतत्त्वमविज्ञाय क्रोधस्यैव वशं गतः।
> स तथा तप्यते मूढो ब्राह्मणो नकुलादिव ॥ १३५ ॥

राजा पृच्छति, कथमेतत्। दूरदर्शी कथयति, अ

ज्जयिन्यां माधवो नाम ब्राह्मणः। तस्य ब्राह्मणी प्रसू

ता। बालापत्यरक्षार्थं ब्राह्मणमवस्थाप्य स्नातुं गता।

ब्राह्मणस्य कृते राज्ञः पार्वणश्राद्धं दातुमागतो जनः।

श्रुत्वा ब्राह्मणः सहजदारिद्र्यादचिन्तयत् यदि सत्वरं न गच्छ

तदाऽन्यः कश्चिच्छ्राद्धं ग्रहीष्यति। १३६। उक्तञ्च,

> आदेयस्य प्रदेयस्य कर्त्तव्यस्य च कर्मणः।
> क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् ॥ १३७ ॥

न विग्रह्णीयात् न योधयेत्। सदर्पः बलगर्वितोऽपि उरगः भुजङ्गः बहु अनेकशः संहतैः कीटैः। ध्रुवम् निश्चितं विनाशितः निहतः ॥ १३३ ॥

देवेति। सन्धानम् सन्धिं विना ऋते, तदशक्यमित्यर्थः। अस्ति [illegible] पश्चात् पृष्ठभागे। प्रकोपः आक्रमणम् ॥ १३४ ॥

य इति। यः जनः अर्थतत्त्वम् अर्थस्य अवस्थायाः तत्त्वं याथार्थ्यं अवि यथार्थं न ज्ञात्वा क्रोधस्यैव केवलं कोपस्यैव वशम् आयत्ततां गतः प्राप्त मूढः अज्ञानवान् नकुलात् ब्राह्मण इव यथा तथा तप्यते दुःखमाप्नोति ॥ १३५ ॥

राजेति। ब्राह्मणी सहधर्मिणी। प्रसूता सुतं सूतवती। [illegible] निमित्ते। पार्वणश्राद्धम् पार्वणं पर्वसम्बन्धि। श्राद्धम् श्राद्धीयान्नम्। सह दारिद्र्यात् स्वभावतोऽकिञ्चनत्वात् ॥ १३६ ॥

आदेयस्येति। आदेयस्य आदानस्य। प्रदेयस्य प्रदानस्य। कर्त्तव्यस्य कि कर्मणः क्षिप्रं सत्वरं अक्रियमाणस्य असम्पादितस्य यतः तद्रसम् त भोग्यम् कालः पिबति आचामति। कालक्षेपेण अभिमतं कर्म विफलं भावः ॥ १३७ ॥

यशोऽत्र रक्षकः कोऽपि नास्ति। तत् किं करोमि। यातु
रकालपालितं नकुलं बालकरक्षार्थं व्यवस्थाप्य गच्छामि।
था कृत्वागतः। ततस्तत्र नकुलेन बालकसमीपमागच्छन्
णो कृष्णसर्पो व्यापादितः खण्डितश्च। अथासौ नकुलो
ब्राह्मणमायान्तमवलोक्य रक्तविलिप्तमुखपादः सत्वरमुपागम्य
ब्राह्मणस्य चरणयोर्लुलोठ। ततोऽसौ ब्राह्मणस्तं तथाविधं
दृष्ट्वा मम पुत्रोऽनेन भक्षित इत्यविचार्य तं व्यापादितवान्।
अनन्तरं यावदुपसृत्य पश्यति, ब्राह्मणस्तावद्बालकः सुस्थः
स्वपिति, सर्पस्तु व्यापादितस्तिष्ठति। ततोऽसौ ब्राह्मणो विषाद-
मुपगतः। अतोऽहं ब्रवीमि योऽर्थतत्त्वमविज्ञाय इत्यादि।१३८।
अपरञ्च,

कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा।
षड्वर्गमुत्सृजेदेनमस्मिंस्त्यक्ते सुखी भवेत्॥१३९॥

राजाह, मन्त्रिन् एष ते निश्चयः। मन्त्री ब्रूते, एव-
म्।१४०। यतः,

स्मृतिश्च परमार्थेषु वितर्को ज्ञाननिश्चयः।

[illegible]

विषादम् खेदं॥१३८॥

[illegible]

॥१३९॥

[illegible]

॥१४०॥

दृढता मन्त्रगुप्तिश्च मन्त्रिणः परमो गुणः ॥ १४१ ॥
प, सहसा विदधीत न क्रियामविवेकः परमापदां पदम्
णुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥ १४
यदीदानीमग्रसर्पणं क्रियते तदा सन्धाय गम्यताम्

प्युपायाश्चत्वारो निर्दिष्टाः साध्यसाधने ।
संख्यामात्रं फलं तेषां सिद्धिः साम्नि व्यवस्थिता ॥ १४३ ॥
, कथमेवं सत्वरं सम्भाव्यते । मन्त्री ब्रूते देव सत्वर
तिः । यतः

मृद्घटवत् सुखभेद्यो दुःसन्धानश्च दुर्जनो भवति ।
सुजनस्तु कनकघटवत् दुर्भेद्यश्चाशु सन्धेयः ॥ १४४ ॥

तिरिति । परमार्थेषु धर्मार्थेषु ख्यातिः मनोयोगः । विमर्शः सदसद्वि
ज्ञानानुचयः ध्याने, विमृशविषये निश्चयः बुद्धिस्थैर्यम् । दृढता स्थिर
। मन्त्रगुप्तिः मन्त्रस्य मन्त्रणायाः गुप्तिः गोपनम् । मन्त्रिणः
। श्लोकैकः । परमः श्रेष्ठः गुणः धर्मः ॥ १४१ ॥

इति । सहसा हठात्, अविमृश्येति यावत् । क्रियाम् कार्यं न
नाचरेत् । अविवेकः अज्ञानम् आपदानाम् सङ्कटानां परम श्रेष्ठ
मास्पदम् । सम्पदः विभूतयः गुणलुब्धाः नयगुणैर्लुब्धाः सन्तः
वरिणम् जनम् स्वयम् स्वतः एव वृणुते वाञ्छन्ति ॥ १४२ ॥
रीति । यद्यपि साध्यसाधने कार्यसम्पादने विषये चत्वारः सामदान-
रूपाः उपायाः साधनानि निर्दिष्टाः निरूपिताः नयविद्भिरिति यावत् ।
तेषां उपायानां संख्यामात्रं केवलम् गणनैव फलम् उत्कर्षः । सिद्धिः
साम्नि सन्धौ व्यवस्थिता प्रतिष्ठितम् ॥ १४३ ॥
दिति । दुर्जनः खलः मृद्घटवत् मृन्मयकलश इव सुखभेद्यः सुखं कना-
सेन भेद्यः विभाज्यः । पक्षे सुविभाज्यः । दुःसन्धानः दुःखेन सन्धानम्
यस्य स तथाविधः । पक्षे दुर्घटः भवति । सुजनः साधुः कनकघटवत्
इव दुर्भेद्यः कष्टविभाज्यः । पक्षे दुर्विभाज्यः । आशु शीघ्रं सन्धेयः
। पक्षे संघटनसमर्थः । भवतीति शेषः ॥ १४४ ॥

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ॥१४५॥

विशेषतश्च असौ धर्मज्ञो राजा सर्वज्ञो मन्त्री च। ज्ञातमेतन्मया पूर्वं मेघवर्णवचनात्, तत्कृतकार्यसन्दर्शनाच्च ॥१४६॥ यतः,

कर्मानुमेयाः सर्वत्र परोक्षगुणवृत्तयः।
तस्मात् परोक्षवृत्तीनां फलैः कर्म विभावयेत् ॥१४७॥

राजाह — अलमुत्तरोत्तरेण। यथाभिप्रेतमनुष्ठीयताम्। एतन्मन्त्रयित्वा गृध्रो महामन्त्री तत्र यथार्हं कर्त्तव्यमित्युक्त्वा दुर्गाभ्यन्तरं प्रचलितः। ततः प्रणिधिबकेनागत्य राज्ञो हिरण्यगर्भस्य निवेदितं देव सन्धिं कर्त्तुं महामन्त्री गृध्रोऽस्मत्समीपमागच्छति। राजहंसो ब्रूते मन्त्रिन् पुनः सम्बन्धिना केनचित् अत्रागन्तव्यम्। सर्वज्ञो विहस्याह देव न शङ्कास्पदमेतत्। यतो महाशयोऽसौ दूरदर्शी। अथवा स्थितिरियं

अज्ञ इति। अज्ञः मूर्खः सुखम् अनायासेन आराध्यः सेव्यः, तोष्य इति यावत्। भवतीति शेषः। विशेषज्ञः सारासारज्ञः सुखतरम् अनायासेन अधिकरूपेण आराध्यते सेव्यते। ज्ञानलवदुर्विदग्धम् ज्ञानस्य बोधस्य लवः कणा तेन दुर्विदग्धः वृथा गर्वितः तं नरम् ब्रह्मापि स्वयं कमलयोनिरपि न रञ्जयति तोषयितुं न शक्नोति ॥ १४५ ॥

विशेषत इति। तत्कृतकार्यसन्दर्शनात् ताभ्यां राजमन्त्रिभ्यां कृतस्य सम्पादितस्य कार्यस्य अनुष्ठानस्य दर्शनात् प्रत्यक्षीकरणात् ॥ १४६ ॥

कर्मेति। परोक्षे अप्रत्यक्षे सर्वत्र सर्वस्मिन् विषये गुणवृत्तयः गुणाः गुणधर्माः वृत्तयः शीलानि च कर्मानुमेयाः कर्मणा अनुष्ठितेन कार्येण अनुमया अनुमानेन ज्ञेयाः भवन्तीति शेषः। तस्मात् अतः परोक्षवृत्तीनाम् परोक्षे अप्रत्यक्षे वृत्तिः चेष्टा येषां तेषां स्वप्रभावादीनां कर्म अनुष्ठितं फलैः ऋद्धिभिः विभावयेत् विजानीत ॥ १४७ ॥

राजेति। उत्तरोत्तरेण परस्परं उक्तिप्रत्युक्तिरूपेण वाक्प्रपञ्चेन। तत्र हिरण्यगर्भसमीपे। सम्बन्धिना प्रियवर्गस्य कुटुम्बेन। कदाचित् सहैव

मन्दमतीनां कदाचित् सन्देह न क्रियते । कदाचित् स शङ्का । १४८ । तथाहि,

सरसि बहुशस्ताराच्छाये क्षणात् परिवञ्चितः
कुमुदविटपान्वेषी हंसो निशासु विचक्षणः ।
न दशति पुनस्ताराशङ्की दिवापि सितोत्पलं
कुहकचकितो लोकः सत्येऽप्यपायमपेक्षते ॥ १४९ ॥

दुर्जनदूषितमनसः सुजनेष्वपि नास्ति विश्वासः ।
बालः पायसदग्धो दध्यपि ननु फुत्कृतं भुङ्क्ते ॥ १५० ॥

तद्देव यथाशक्ति तत्पूजार्थं रत्नोपहारादिसामग्री सज्जीक्रियताम् । तथानुष्ठिते सति स गृध्रो मन्त्री दुर्गद्वारात् चक्रवाकेन सत्कृत्यानीय राजदर्शनं कारितो दत्तासनो चोपवेशितः

कस्मिंश्चिदपि विषये सन्देहमात्रमपि न क्रियते । कदाचित् सर्वशङ्का यावदीषत्स्वविशेषु सन्देहः क्रियते इति, एवम्विधा मन्दमतीनाम् खलबुद्धीनां स्थितिस्थिरता ॥ १४८ ॥

सरसीति । कुमुदं सितोत्पलं अन्विष्यति विचिन्वति यः स कुमुदान्वेषी विचक्षणः चतुरः हंसः निशासु रात्रौ बहुशः अनेकशः ताराच्छाये ताराणां नक्षत्राणां छाया प्रतिबिम्बं "छाया सूर्यप्रियाकान्तिः प्रतिबिम्बमनातपः" इत्यमरः । यत्र तत्र सरसि जलाशये क्षणात् आशु परिवञ्चितः कुमुदबुद्ध्या प्रतारितः सन्निति शेषः । दिवा दिवसेऽपि ताराशङ्की नक्षत्रभ्रमशाली सितोत्पलम् कुमुदं न दशति चञ्च्वा न स्पृशति । तथा कुहकचकितः कुहकेन इन्द्रजालेन चकितः सन्त्रासितः लोकः जनः सत्ये प्रकृतेऽपि वस्तुनि अपायम् विपत्तिं अपेक्षते आशङ्कते ॥ १४९ ॥

दुर्जनेति । दुर्जनदूषितमनसः दुर्जनेन खलेन दूषितं विपर्यासमापादितं मनः चित्तं यस्य तस्य तथाविधस्य सुजनेषु साधुष्वपि विश्वासः प्रत्ययः नास्ति न भवति । पायसदग्धः पायसेन पायसान्नेन दग्धः तापितमुखः बालः शिशुः ननु निश्चितं फुत्कृतं फुत्कारेण सह भुङ्क्ते ॥ १५० ॥

तदिति । तत्पूजार्थम् तस्य गृध्रस्य पूजार्थम् अर्हणाय "पूजा नमस्यापचितिः सपर्यार्चार्हणाः समाः" इत्यमरः । उपवेशितः उपवेशनं कारितः ।

ाक उवाच मन्त्रिन् युष्मदायत्तं सर्व्वं स्वेच्छयोपभुज्यतामिदं
म्। राजहंसो ब्रूते एवमेव। दूरदर्शी ब्रूते वज्रमपञ्चनं
ोजनम्। १५१। यतः

लुब्धमर्थेन गृह्णीयात् स्तब्धमञ्जलिकर्म्मणा।
मूर्खं छन्दानुवृत्तेन याथातथ्येन पण्डितम्॥ १५२॥

वं, सद्भावेन हरेन्मित्रं सम्भ्रमेण तु बान्धवान्।
स्त्रीभृत्यान् दानमानैश्च दाक्षिण्येनेतरं जनम्॥१५३॥

दानीं सन्धाय गम्यताम्। महाप्रतापश्चित्रवर्णो राजा।
ाको ब्रूते यथा सन्धानं कार्य्यं तदुच्यताम्। राजहंसो ब्रूते
प्रकाराः सन्धीनां सम्भवन्ति। गृध्रो वदति कथयामि
ताम्। १५४।

बलीयसाभियुक्तस्तु नृपोऽनन्यप्रतिक्रियः।

ायत्तम् युष्माकं भवतां आयत्तम् अधीनम्। वज्रमपञ्चनम् अनेकवाग्-
रः॥ १५१॥

लुब्धमिति। अर्थेन धनदानेन लुब्धम्। अञ्जलिकर्म्मणा अञ्जलिरचनया
म् अधिकम्। छन्दानुवृत्तेन वाक्याभ्यनुमोदनेन मूर्खम् अज्ञम्। याथातथ्येन
च पण्डितम् प्राज्ञजनम् गृह्णीयात् वशीकुर्य्यात्॥ १५२॥

सद्भावेनेति। सद्भावेन प्रणयेन मित्रम् बन्धुम्। सम्भ्रमेण समादरेण बान्ध-
वजनान्। दानमानैः दानैः [illegible] मानैः सत्कारैः स्त्रीभृत्यान्।
ाण्येन सारल्येन इतरम् अन्यं [illegible] हरेत्। अन्यम् परेषु [illegible]
हेत्, आयत्तीकुर्य्यादिति भावः॥ १५३॥

ादिति। यथा येन प्रकारेण। सन्धानम् सन्धिः। प्रकाराः भेदाः॥१५४॥

बलीयदिति। बलीयसा बलवत्तरेण अभियुक्तः आक्रान्तः अतः आपदः
दस्तु यदा अनन्यप्रतिक्रियः नास्ति अन्या सन्धिभिन्ना प्रतिक्रिया प्रतिविधानं
च प्रत्यङ्गः भवतीति शेषः। यदा [illegible] कुर्वीतः
ाक्रमः। कथ्यते [illegible]

आपन्नः सन्धिमन्विच्छेत् कुर्व्वाणः कालयापनम् ॥१५५॥

कपाल उपहारश्च सन्तानः सङ्गतस्तथा ।
उपन्यासः प्रतीकारः संयोगः पुरुषान्तरः ॥ १५६ ॥
अदृष्टनर आदिष्ट आत्मादिष्ट उपग्रहः ।
परिक्रयस्तथोच्छिन्नस्तथा च परभूषणः ॥ १५७ ॥
स्कन्धोपनेयः सन्धिश्च षोड़शैते प्रकीर्त्तिताः ।
इति षोड़शकं प्राहुः सन्धिं सन्धिविचक्षणाः ॥१५८॥

कपालसन्धिर्व्विज्ञेयः केवलं समसन्धितः ।
सम्प्रदानाद्भवति य उपहारः स उच्यते ॥ १५९ ॥

सन्तानसन्धिर्व्विज्ञेयो दारिकादानपूर्व्वकः ।
सद्भिस्तु सङ्गतः सन्धि मैत्रीपूर्व्व उदाहृतः ॥ १६० ॥

यावदायुःप्रमाणस्तु समानार्थप्रयोजनः ।
सम्पत्तौ वा विपत्तौ वा कारणैर्यो न भिद्यते ॥१६१॥

वि कपाल इत्यादिभिः त्रिभिः सन्धिप्रकाराणाह । सन्धिविधा(न)नविषये विचक्षणाः पण्डिताः । षोड़शकम् षोड़शप्रकारं ॥१५६ । १५८ ॥

(क)पेति । केवलम् कारणान्तरानपेक्षया । समसन्धितः सम(ं)ः सन्धितः सन्धानात् । पश्चम्यास्तसिल् । कपालसन्धिः कपा(लः) विज्ञेयः । सम्प्रदानात् द्रविणादिकं दत्त्वा यः सन्धिः भवति स(ः) उपहारः उच्यते ॥ १५९ ॥

(सन्ता)नेति । दारिकादानपूर्व्वकः दारिका कन्यका तस्याः दानं भार्या(र्थं) तत् पूर्व्वम् आरम्भकं यस्य स तथाभूतः । सन्धिः सन्तानसन्धिः सद्भिः परस्परं साधुजनैः मैत्रीपूर्व्वः मैत्री बन्धुभावः पूर्व्वः आरम्भ(को) यस्य तथाविधः सन्धिः सङ्गतः उदाहृतः कथितः ॥ १६० ॥

सङ्गतसन्धिं विशिनष्टि यावदिति द्वाभ्यां । यः सन्धिः यावदायुः प्रमा(णः) यावदायुः यावज्जीवनं प्रमाणं परिमाणं यस्य स तथाविधः । जीवितावधिकः जीवितपर्य्यन्तस्थायीत्यर्थः । समानानि साधारणानि अर्थाः कार्य्याणि ...

सङ्गतः सन्धिरेवायं प्रकृष्टत्वात् सुवर्णवत् ।
तथान्यैः सन्धिकुशलैः काञ्चनः स उदाहृतः ॥ १६२ ॥
द्रव्यात्मकार्यसिद्धिं तु समुद्दिश्य क्रियेत यः ।
स उपन्यासकुशलैरुपन्यास उदाहृतः ॥ १६३ ॥
मयास्योपकृतं पूर्वं ममाप्येषः करिष्यति ।
इति यः क्रियते सन्धिः प्रतीकारः स उच्यते ॥ १६४ ॥
उपकारं करोम्यस्य ममाप्येषः करिष्यति ।
अयं चापि प्रतीकारो रामसुग्रीवयोरिव ॥ १६५ ॥
एकार्थां सम्यगुद्दिश्य क्रियां यत्र हि गच्छति ।

[illegible] उद्देशाः यस्मिन् स समानार्थप्रयोजनः । सम्पत्तौ अभ्युदये विपत्तौ [illegible] कारणैः अभिसन्धिभिः वा यः न भिद्यते विशिष्टो न भवति । अयम् [illegible] सन्धिः सङ्गतः सङ्गतनामा सन्धिः । प्रकृष्टत्वात् सर्वश्रेष्ठत्वात् अयम् [illegible] सुवर्णवत् काञ्चनतुल्यः । तथा अतः स अन्यैः अपरैः सन्धिकुशलैः [illegible] काञ्चनः काञ्चननामा सन्धिः उदाहृतः । द्वाभ्यां युग्मम् ॥ १६१ ॥ १६२ ॥

द्रव्येति । द्रव्यात्मकार्यसिद्धिम् द्रव्यम् [illegible] । [illegible] । [illegible] प्रयोजनं । [illegible] । स सन्धिः उप[illegible] । उपन्यासकुशलैः [illegible] उदाहृतः ॥ १६३ ॥

मयेति । मया अस्य उपकृतम् उपकारः कृतः । एषः अयम् ममापि [illegible] करिष्यति उपकारमिति यावत् । इति [illegible] सन्धि [illegible] प्रतीकार उच्यते ॥ १६४ ॥

उपकारमिति । अस्य उपकारम् [illegible] करोमि [illegible] । [illegible] करिष्यति, उपकारमिति यावत् । इति [illegible] । रामसुग्रीवयोः [illegible] ॥ १६५ ॥ [illegible]

एकार्थामिति । एकार्थाम् एक [illegible] [illegible]

उपहाराहृते तस्मात् सन्धिरन्यो न विद्यते ॥ १७६ ॥

राजाह भवन्तो महापण्डिताः तदत्रास्माकं यथाकार्य्यमु

दिश्यताम् । दूरदर्शी ब्रूते आः किमुच्यते

आधिव्याधिपरीतापैरद्य श्वो वा विनाशिने ।
को हि नाम शरीराय धर्मापेतं समाचरेत् ॥ १७७

जलान्तश्चन्द्रचपलं जीवितं खलु देहिनाम् ।
तथाविधमिति ज्ञात्वा शश्वत् कल्याणमाचरेत् ॥ १७

मृगतृष्णासमं वीक्ष्य संसारं क्षणभङ्गुरम् ।
सज्जनैः सङ्गतं कुर्य्यात् धर्माय च सुखाय च ॥ १७६

तन्मम सम्मतेन तदेव क्रियताम् ।

अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते ॥ १८० ॥

हाराद् द्रविणाद्युपढौकनमूलकात् उपहार नाम्नः सन्धेः ऋते विना अ

अपरः सन्धिः न विद्यते न सम्भाव्यते ॥ १७६ ॥

आधीति । आधिः मनस्तापः । व्याधिः गदः । परीतापः शोकः ।

आधिव्याधिपरीतापैः । अद्य वर्त्तमाने दिवसे श्वः कल्ये वा विनाशिने

शीलाय शरीराय कायस्य कृते । कः पण्डित इति यावत् । धर्मा

अधर्मं, कर्मेति शेषः । समाचरेत् कुर्य्यात् । न कोऽपीत्यर्थः ॥ १७७ ॥

जलेति । देहीनाम् जीवितम् प्राणाः जलान्तश्चन्द्रचपलम् जलान्तः

चन्द्रः शशिबिम्बः तद्वत् चपलम् अस्थिरम् । तत् जीवितं तथाविधम्

इति ज्ञात्वा विज्ञाय शश्वत् सदा "पुनः सदार्थयोः शश्वत्" इत्य

पुण्यकर्म्म आचरेत् कुर्य्यात् ॥ १७८ ॥

मृगेति । क्षणभङ्गुरम् क्षणात् निमेषात् भङ्गुरम् नश्वरं संसारम्

मृगतृष्णया मरीचिकया समं तुल्यं वीक्ष्य दृष्ट्वा धर्माय

मङ्गललाभाय च सज्जनैः साधुभिः सह सङ्गतम्

अश्वमेधानां वाजिमेधानां यज्ञानां स

सत्याभिधानदिव्यपुरःसरं द्वयोरप्येतयोर्भूपालयोः काञ्च-
नसन्धिर्विधीयताम्। सर्व्वज्ञो वदति एवमस्तु। ततो
रादिना स मन्त्री दूरदर्शी पूजितः प्रहृष्टमनश्चक्रवाकं
 मयूरस्य राज्ञः समीपं गतः। तत्र चित्रवर्णेन राज्ञा
 प्रवचनात् बहुमानदानपुरःसरं सम्भाषितः। तथा-
सन्धिं स्वीकृत्य राजहंससमीपं प्रस्थापितः। दूरदर्शी
 सिद्धं नः समीहितम्। इदानीं स्वस्थानमेव विन्ध्या-
तिगम्यताम्। अथ सर्व्वे स्वस्थानं प्राप्य मनोवाञ्छितफल-
न्ति। विष्णुशर्म्मणोक्तम् अपरं किं कथयामि तदुच्य-
। राजपुत्रा ऊचुः आर्य्य तव प्रसादात् सकलराज्यव्यव-
 ज्ञातम्। ततः सुखिनो भूता वयम्। विष्णुशर्म्मोवाच
 तथापि अपरमपीदमस्तु। १८१।

सन्धिः सर्व्वमहीभुजां विजयिनामस्तु प्रमोदः सदा
सन्तः सन्तु निरापदः सुकृतिनां कीर्त्तिश्चिरं वर्द्धताम्।

[illegible]

नीतिर्वारविलासिनीव सततं वक्षःस्थले राजताम्
चक्रां चुम्बतु मन्त्रिणामहरहो भूयान्महानुत्सवः ॥ १८२ ॥

इति हितोपदेशे सन्धिर्नाम चतुर्थः कथासंग्रहः
समाप्तः ।

म् मुखञ्च चुम्बतु । अहरहः नित्यं महान् उत्सवः प्रमोदानुष्ठानं भूयात्
[त] । १८२ ।

इति हितोपदेशटीकायां श्रीपूर्णानन्दकृतायां सन्धिर्नाम
चतुर्थः कथासंग्रहः समाप्तः ।

सम्पूर्णम् ।

PRINTED BY SARADA PRASAD MAJUMDER AT THE B. P. M.'S P[RESS]
No. 22, Jhamapooker Lane.